इत्यादिना* । अस्या भामहसमालोचनायाः सर्वो विषयः प्रतिज्ञानाटिकायां वर्तते । अपि च प्रतिज्ञानाटिकायाः प्रथमाङ्के यानि "अणेण मम भादा हदो, अणेण मम पिदा, अणेण मम सुदो" इति प्राकृतवाक्यानि, तानि "हतोऽनेन मम भ्राता मम पुत्रः पिता मम" इति श्लोकरूपेणानूदितानि भामहेनास्मिन् न्यायविरोधसमालोचनप्रकरणे । अतो भामहेन प्रतिज्ञानाटिकैवानुसंहितेत्यूहितुं शक्यते । नाटिकाया नामधेयं तु तत्कालातिप्रसिद्धिवशादकथितमपि सुज्ञानमिति धिया भामहेन न निर्दिष्टं स्यात् । अस्य भामहसमालोचनाविषयभूतस्य कथावस्तुनो बृहत्कथायामपि सत्त्वाद् भामहेन सैवानुसंहिता, न तु प्रतिज्ञानाटिकेति तु न शङ्कनीयं, "हतोऽनेन मम भ्राते"ति भामहेनानूद्यमानस्य वाक्यस्य प्रतिज्ञायां प्रत्यक्षतयोपलब्धेः, बृहत्कथायां तस्य सद्भावकल्पनायां प्रमाणाभावात् । स चायं भामहः कालिदासात् प्राचीनः प्रतिभाति । तेन हि मेधावी, रामशर्मा, अश्मकवंशं, रत्नाहरणम्, अच्युतोत्तरम् इत्यस्मदविदितानि कविकाव्यनामानि गृहीतानि । सर्वलोकविदितस्य तु श्रीकालिदासस्य तत्काव्यस्य वा लोकोत्तरस्य कस्यचिन्न नामधेयं

---

* आङ्गलभाषोपोद्घातस्य सप्तमं पृष्ठं द्रष्टव्यम् ।

गृहीतम् । भामहाचार्यश्चेत् कालिदासकाव्यमद्रक्ष्यत्, तदवश्यं निरदेक्ष्यद् अतिप्रसिद्धत्वादनिर्दिशन्नपि विषयविचारादिद्वारेण प्रतिज्ञानाटिकामिव वास्मरिष्यत् । यद्यपि

" अयुक्तिमद् यथा दूता जलभृन्मारुतादयः ।
तथा भ्रमरहारीतचक्रवाकशुकादयः ॥"

इति युक्तायुक्तत्वविचारे मेघमारुतादिदूतीकरणं विषयतया भामहेन प्रसञ्जितं, तथापि तावता मेघदूतकाव्यं स जानातीति न युक्तं कल्पयितुम् । तथा सति ह्यस्तनेन केनापि कविना प्रणीतं शुकसन्देशमपि स जानातीति कल्पनीयमापद्येत । अतो, मन्ये, केषुचित् काव्येषु विप्रलम्भादिप्रसङ्गे मारुतचन्द्रमेघाद्यचेतनद्वारेण भ्रमरचक्रवाकशुकाद्यव्यक्तवाक्प्राणिद्वारेण च प्रियजनाय विरहिणां सन्देशप्रेषणं क्वचित् क्वचिद् यद् वर्ण्यते, तदनुन्मादावस्थायां नेष्यत इत्येतदेव सामान्यत आचार्यः श्लोकैरेभिरुपदिष्टवान्, तच्चेदमाचार्योपदेशतात्पर्यं हृदि निधायैवौचित्यवेदी कालिदासो मेघदूतस्यारम्भे तद्दूतीकरणानौचित्यमाशङ्क्य परिजहार 'धूमज्योतिस्सलिलमरुताम्' (पूर्वमेघ. ५) इति श्लोकेन । एवं तावत् सिद्धं भामहस्य कालिदासात् प्राचीनत्वम् ।

किञ्च, राज्यतन्त्रविद्याचार्यः कौटिल्य इति चाणक्य इति च पर्यायवाच्यो विष्णुगुप्तश्चन्द्रगुप्तसमानकालः कैस्तप्राचीने चतुर्थे वर्षशतके स्थित इति सुप्रसिद्धम् । तत्प्रणीते कौटिलीयार्थशास्त्रे मन्त्रिपुरोहितकरणीयस्य योधयुद्धप्रोत्साहनस्य प्रकारोपदेशावसरे " 'तुल्यवेतनोऽस्मि, भवद्भिः सहभोग्यमिदं राज्यं, मयाभिहितः परोऽभिहन्तव्यः' इति, वेदेष्वप्यनुश्रूयते समाप्तदक्षिणानां यज्ञानामवभृथेषु—'सा ते गतिर्या शूराणामि'ति, अपीह श्लोकौ भवतः —

'यान् यज्ञसङ्घैस्तपसा च विप्राः स्वर्गैषिणः पात्रचयैश्च यान्ति ।
क्षणेन तानप्यतियान्ति शूराः प्राणान् सुयुद्धेषु परित्यजन्तः ॥'
'नवं शरावं सलिलस्य पूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम् ।
तत् तस्य मा भून्नरकं च गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत् ॥'

इति मन्त्रिपुरोहिताभ्यामुत्साहयेद् योधान् " (कौटि० अर्थ० अधि० १०. अध्या० ३) इति दृश्यते । शूरस्य सद्गतिर्युद्धे प्राणांस्त्यक्तवतः यज्ञतपस्साध्यकामलाभः विजयिनः सम्र्हणा च लोके सुलभा इति, राज्ञः पिण्डदातुरर्थे युद्धमकुर्वन् पापीयान् भवतीति चोदाहृतवाक्यानामभिप्रायः । तत्र "नवं शरावं" इत्येष श्लोकः प्रतिज्ञायौगन्धरायणस्य चतुर्थाङ्के भटान् प्रति कस्यचित् प्रोत्साहनवाक्यतया निवेशितः । अस्य श्लोकस्य किमर्थशास्त्रान्नाटके समुद्धरणम् उताहो नाटकादर्थशास्त्रे इति चिन्तनीयम् । तत्र युद्धप्राणत्यागस्य धर्महेतुत्वं भर्तृपिण्डानिर्यातनस्य पापहेतुत्वं चार्थप्रधानेन यदुपदिश्यते, तत्

प्रमाणानुग्रहविकलमुपप्रलोभनप्रायमविश्वास्यं भवतीति तत्रावश्यं प्रमाणमुपदर्शनीयम् । तच्चादौ "सा ते गतिरि"त्यादि श्रौतमुपदर्शितम् । पश्चात्तु अभियुक्तवचनरूपं स्मृतिकल्पं श्लोकद्वयमिति स्वरसतः प्रतीतेः "नवं शरावम्" इति श्लोको नार्थशास्त्रकारस्य स्वोक्तिर्भवितुमर्हति । परोक्त्यनुवादसहपाठादप्ययं श्लोकोऽर्थशास्त्रकारस्य न स्वोक्तिः । "यान् यज्ञसङ्घैरि"ति पूर्वश्लोको हि 'यान्' 'तान्' इत्युभयत्राप्यनिर्दिष्टं विशेष्यं किमपि कामलक्षणं लोकलक्षणं वा पूर्वप्रकृतमाकाङ्क्षन्नसंशयं ग्रन्थान्तराभिजन इत्यनुवादरूपो निश्चितः । किञ्चार्थशास्त्रे कौटिल्यः स्वोक्तिरूपं श्लोकं श्लोकौ श्लोकान् वा न क्वचिदपि प्रतिज्ञापूर्वं लिखितवान् । इहैकत्र परम् "अपीह श्लोकौ भवत" इति तस्य पूर्वप्रतिज्ञाकरणमालक्ष्यमाणमुत्तरयोः श्लोकयोः परकीयतामेव द्योतयदर्थवद् भवति । काव्ये पुनः शास्त्रलोकसिद्धमर्थं वश्यवाचो महाकवय उत्सर्गतः स्वोक्त्यैव प्रतिपादयन्ति, यत्रक्वचित् परवचनानुपूर्वीमनुवदन्तो वा तेऽनुवादचिह्नमवश्यं कुर्वन्तीति प्रतिज्ञायौगन्धरायणे अनुवादलिङ्गाकरणाद् "नवं शरावम्" इति श्लोको भासमहाकवेरेव स्वोक्तिरिति युक्तं पश्यामः । तेनार्थशास्त्रकाराच्चाणक्यादप्यस्मन्महाकवेः प्राचीनत्वं सिद्धं भवति । यस्तु मेधातिथिः प्रतिमानाटकस्य पञ्चमाङ्के रामं प्रति रावणवाक्ये "भोः काश्यपगोत्रोऽस्मि, साङ्गोपाङ्गं वेदमधीये, मानवीयं धर्मशास्त्रं, माहेश्वरं योगशास्त्रं, बार्हस्पत्यमर्थशास्त्रं, मेधातिथेर्न्यायशास्त्रं, प्राचेतसं श्राद्धकल्पं च" इति स्मर्यते, स दिव्यानुभावपुरुषप्रायपाठात् तथाभूतः कश्चिन्महर्षिः स्याद्, न पुनर्मानवीयव्याख्याता पण्डितविशेष इति भासं प्रति नैतदर्वाचीनत्वभ्रान्तेरवकाशः । वस्तुत एषु रूपकेष्वार्षप्रयोगबाहुल्यादिदर्शनाद् भासः पाणिनेरपि प्राचीन इति प्रतिमानाटकोपोद्धाते निरूपितमस्माभिः ।

उपलभ्यते चैतावत्प्राचीनत्वानुगुणा नाटकेष्वेतेषु गुणसमृद्धिः । अत्र हि प्रसन्नोदारगम्भीरा सरसहृदयङ्गमा भाषायाः शैल्येव तावदन्यादृशी प्रायः, यस्या वर्षसहस्रादर्वाचीनेषु काव्येष्वतिविरलं दर्शनमभाव एव वा ।

काव्यगुणसमृद्धिः ।

सुशिक्षितमतिगोचरैः प्रशस्तैर्जनमनोविमर्शैर्नानारूपैः सन्ति सर्वतः समृद्धा इह वाक्यसमुदाहाराः ।

अवस्थाभेदभिन्ना; सुसूक्ष्मास्तत्तद्वस्तुपरमार्था यथा सचेतसां पुर इव परिस्फुरेयुस्तथेह प्रतिपादिताः ।

अपिच, यदौचित्यं नाम प्रतिपाद्यसङ्कोचविकासयोर्वा रसानुरूपशब्दार्थपरिग्रहे वा, तत् क्वचिदप्यत्र रसैकदृष्टिना महाकविना न लङ्घितम् ।

कामं वयं सरसभणितीनामनायासप्रसरं प्रसिद्धासु एकद्वमहाकविकृतिषु न खलु नालक्षयामः । किन्तु तस्य परमा काष्ठैतस्मिन् नाटकचक्रे संलक्ष्यते । इदं हि आत्मीयकवेर्मुखान्निःश्वसितनिर्विशेषं विनिस्सृतमिति न खलु नोदेति सचेतसामेतत् परिशीलयतां

बुद्धिः । सर्वथैतद्गतं शब्दार्थसौष्ठवमार्षसूक्तिसौष्ठवस्यैव, मन्ये, चारुतरं भूमिकान्तरमिति । अच्छन्दोबद्धानां च वाक्यानां सर्वेषामपि कामनीयकं श्लोकतोऽप्युत्कृष्टमेषु रूपकेषु सर्वत्र सजातीयसर्वग्रन्थान्तरातिशायि निरुपमं च । तदेतत् सर्वं ग्रन्थानुवाचनयैव सुखसंवेद्यं भावकानामिति नेदानीं तदुदाहरणप्रपञ्चनं कुर्मः ।

भासानुकरणम् ।

न खलु सा काचिद्रीतिः कालिदासादिनाटकेष्वभिलक्ष्यते; यां भासमहाकविः स्वेषु नाटकेषु न प्रस्थापयाम्बभूव । विक्रमाब्दारम्भोत्तरमनन्यगामिनीं कविचक्रवर्तिख्यातिं लब्धवतः कालिदासस्य कृतिष्वभ्यर्हिते अभिज्ञानशाकुन्तले भासकाव्यच्छायानामनुकरणं भूयिष्ठमुपलभ्यते । यथा—

“यस्यां न प्रियमण्डनापि महिषी देवस्य मन्दोदरी
स्नेहाल्लुम्पति पल्लवान् न च पुनर्वीजन्ति यस्यां भयात् ।
वीजन्तो मलयानिला अपि करैरस्पृष्टबालद्रुमा
सेयं शक्ररिपोरशोकवनिका भग्नेति विज्ञाप्यताम् ॥”

इत्ययमभिषेकनाटकचतुर्थाङ्कगतः श्लोकः । अस्यच्छाया शाकुन्तलचतुर्थाङ्कस्थे

“पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥”

इत्यस्मिन् पद्ये लक्ष्यते । न केवलमिह तच्छायामात्रस्य दर्शनं, किन्तु “प्रियमण्डनापि, स्नेहात्, पल्लवान्, सेयम्” इत्येषां सरसहृद्यानां तदीयपदानामप्युपादानमस्ति । बालचरितस्य प्रथमाङ्के शिशुमर्धरात्रे वसुदेवस्य हस्ते कथञ्चिदर्पयित्वा हृदयेन शिशुदिशं देहेन सूतिकागृहं च द्विदिकं गच्छन्तीं देवकीमधिकृत्य वसुदेवस्य वचनं—

“हृदयेनेह तत्राङ्गैर्द्विधाभूतेव गच्छति ।
यथा नभसि तोये च चन्द्रलेखा द्विधाकृता ॥”

इति । अस्यच्छाया शाकुन्तलप्रथमाङ्कस्थे

“गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥”

इति पद्ये स्पष्टा ।

किञ्च, स्वप्नवासवदत्तस्य—

१. प्रथमाङ्के यो ‘विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्ययाः’ इति पादः, तस्य कयाचिद् भङ्ग्यार्थानुकारः ‘विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः’ इति

शाकुन्तलप्रथमाङ्के कृतः । अधिकम् आङ्गलभाषोपोद्धातादवगन्तव्यम् । एवमन्यदपि भासनाटकच्छायानुविधानं कालिदासकृतौ द्रष्टव्यं प्रतिमानाटकोपोद्धातेऽस्माभिः प्रपञ्चितं च ।

भवभूतेरप्येतन्नाटकचक्रपरिशीलनजनिताः संस्कारास्तत्कृतिषु बहुलं प्रस्फुरन्ति । उत्तररामचरितस्य द्वितीयाङ्कगतो ह्यात्रेयीसंवादः स्वप्नवासवदत्तप्रथमाङ्कगतं ब्रह्मचारिसंवादमनुकरोति, षष्ठाङ्कगतश्च विद्याधरसंवादोऽभिषेकनाटकषष्ठाङ्कगतं विद्याधरसंवादम् । मालतीमाधवपञ्चमाङ्कस्थो दण्डकप्रयोगोऽविमारकपञ्चमाङ्कस्थं दण्डकप्रयोगमनुकरोति । एवं श्रीहर्षनाटकेष्वपि भासनाटकच्छायानुविधानं द्रष्टव्यम् ।

अपिच, यत् कालिदासात् प्राचीनं मन्यन्ते, तस्मिन् मृच्छकटिके न भासकाव्यच्छायामात्रस्यानुकरणम्, अपितु भासकाव्यवाक्यानामेव भूयिष्ठानां साक्षान्निवेशनमस्ति ।

मृच्छकटिकविचारः ।

चारुदत्तनाटके हि यानि पद्यानि चूर्णकवाक्यानि च, तानि तथैव वा मनागावापोद्वापाभ्यां व्यत्ययकरणेन वा मृच्छकटिके परिपठितानि । तत्र चारुदत्तनाटकस्य प्रथमाङ्के श्लोकः—

"यासां बलिर्भवति मद्गृहदेहलीनां हंसैश्च सारसगणैश्च विभक्तपुष्पः ।
तास्वेव पूर्वबलिरूढयवाङ्कुरासु बीजाञ्जलिः पतति कीटमुखावलीढः ॥"

इति । मृच्छकटिकस्य तु—

"यासां बलिः सपदि मद्गृहदेहलीनां हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
तास्वेव सम्प्रति विरूढतृणाङ्कुरासु बीजाञ्जलिः पतति कीटमुखावलीढः ॥"

इति । चारुदत्तनाटके "किण्णुखु अज्ज पच्चूस एव्व गेहादो णिक्खन्तस्स बुभुक्खाए पुक्खरपत्तपडिदजळविन्दू विअ चळचळाअन्ति विअ मे अक्खीणि । (परिक्रम्य) जाव गेहं गच्छिअ जाणामि किण्णुखु संविधा विहिदा ण वेत्ति । एदं अह्माणं गेहं । जाव पविसामि" इति सूत्रधारवाक्यानि । एतदर्थकानि मृच्छकटिके त्वेतानि "...... चिरसङ्गीदोवासणेण सुक्खपोक्खरणाळाइं विअ मे बुभुक्खाए मिळाणाइं अङ्गाइं । ता जाव गेहं गदुअ आणामि अत्थि किं पि कुटुम्बिणीए उववादिअं ण वेत्ति । (परिक्रम्यावलोक्य च) एदं तं अह्माणं गेहं, ता पविसामि ।"

चारुदत्तनाटकस्य तृतीयाङ्के वाक्यानि—

"चारुदत्तः—वयस्य ! वीणा नामासमुद्रोत्थितं रत्नम् । कुतः"

"विदूषकः—कामं पसंसेदु भवं । मम खु दाव गाअन्तो मणुस्सो इत्थिआ वि पठन्ती उभअं आदरं ण देदि । गाअन्तो दाव मणुस्सो रत्तसुमणावेढ्ढिदो विअ पुरोहिदो दिढं ण सोभइ । इत्थिआ वि पठन्ती छिण्णणासा विअ धेणुआ अदिविरूवा होइ ।"

मृच्छकटिके त्वेतानि—

"चारुदत्तः—अहो अहो साधु साधु रेभिलेन गीतम् । वीणा हि नामासमुद्रोत्थितं रत्नम् । कुतः "

"विदूषकः—मम दाव दुवेहिं जेव्व हस्सं जाअदि इत्थिआए सक्कअं पठन्तीए मणुस्सेण अ काअलिं गाअन्तेण । इत्थिआ दाव सक्कअं पठन्ती दिण्णणवणस्सा विअ गिट्ठी अहिअं सुसुआअदि । मणुस्सो वि काअलिं गाअन्तो सुक्खसुमणोदामवेट्ठिदो वुड्ढपुरोहिदो विअ मन्तं जवन्तो दिढं मे ण रोअदि ।"

एवमन्यान्यपि भूयिष्ठानि वाक्यानि श्लोकाश्च मृच्छकटिके चारुदत्तीयसंवादीनि दृश्यन्ते । इतिवृत्तं च द्वयोश्चारुदत्तचरितमेव । तेनैवं मन्तव्यं—तयोरन्यतरदन्यतरस्याधार इति । तत्रापि चारुदत्तनाटकमेव मृच्छकटिकस्य मूलमिति न्याय्यं, मृच्छकटिकेऽर्वाचीनकाव्याद्दतस्य प्रस्तावनायां कविकाव्यनामनिर्देशस्य दर्शनेन तस्य तन्निर्देशरहितचारुदत्तापेक्षयार्वाचीनत्वौचित्यात् । किञ्च, चारुदत्तनाटकादृष्टा अपि मनोहराः केपि ग्रन्थसन्दर्भा मृच्छकटिके सन्ति । तेन लघुग्रन्थरूपतया स्थितं चारुदत्तनाटकं प्रपञ्चनकुतुकिना शूद्रकेण कैश्चित् संस्कारैरुपेतं कृत्वा विस्तार्य च मृच्छकटिकसंज्ञया ख्यापितमिति युक्तमूहितुम् । एवञ्च मृच्छकटिकस्य चारुदत्तनाटकप्रायत्वात् तत्र सचेतसां चारुदत्तवदतिपुरातनत्वावभास उपपद्यते, तत्सङ्कलनमात्रकर्तरि च शूद्रके तन्मूलकवित्वभ्रमादतिप्राचीनत्वभ्रमः । काममयं कालिदासतः प्राचीन इत्यत्र प्रमाणाभावः, आलङ्कारिकवामनात् तु प्राचीन एवासौ । तदीयायां काव्यालङ्कारसूत्रवृत्तौ "शूद्रकादिरचितेषु प्रबन्धेष्वस्य (श्लेषाख्यगुणस्य) भूयान् प्रपञ्चो दृश्यते" इति कथनात् । तदेवं भासस्य कवित्ववैभवं कालिदासशूद्रकाद्युपजीव्यमासीदिति स्पष्टम् ॥

अत्र नाटकचक्रे ततइतः सन्ति केचिदार्षाः प्रयोगाः 'आपृच्छामि भवन्तौ' (स्वप्न० अ० १) इत्येवमादयो ये प्रतिमानाटकस्य परिशिष्टतया निर्दिष्टाः, त एते वाल्मीकिव्याससधर्मणस्तत्रभवतो वश्यवाङ्मयस्य महाकवेर्न दूषणम्, अपितु पाणिनिपुराणतरताया भूषणमिति विभावनीयम् ।

एवं प्रतिज्ञानाटिकायां भामहोद्भावितः पूर्वोक्तो न्यायविरोधोऽपि सुपरिहरः । चारशून्यतया सचिवोपेक्षया वा वत्सराजस्य महामतेः सतो गजच्छद्मप्रयोगविषयशत्रुप्रमाज्ञानं, क्रुद्धैर्बहुभिः शत्रुभिरसहायस्य करगतस्य तस्य हननाभावः, प्रत्यक्षदृष्टेऽपि कृत्रिमगजे दिवाविशेषाग्रहणम् इत्येतानर्थान् भामहो न्यायविरुद्धान् मन्यते । तत्र हि आद्ययोर्न काचिदनुपपत्तिः, चारवतो भक्तिमन्निपुणसचिवचिन्त्यमानकार्यस्य वृद्धदर्शनस्य च सतोऽपि गज-

भामहोक्तस्य न्यायविरोधस्य परिहारः ।

मृगयाव्यसनितयामात्यानुमतिमप्रतीक्ष्य रभसधाविनो राज्ञः शत्रुग्रमाज्ञानस्य सम्भवाद्, वीरः सावज्ञो मानवान् वैरी जीवग्राहं गृहीत्वा स्वस्वामिपादमूले यन्नीयते, तदेव तद्वधापेक्षया स्वामिपरितोषकरमिति, करगतस्य बहुप्रहारनिश्चेष्टस्य हननमतिक्षुद्रकर्मेति च विचारणया निपुणोदारभृत्यसाधारणया परामात्येन सालङ्कायनेन कृतस्य स्वयोधोपक्रान्तवत्सराजवधप्रतिषेधस्य न्याय्यत्वाच्च । अत एवारुचेर्मन्ये, भामहाचार्यस्तृतीयं न्यायविरोधं कृत्रिमगजगतविशेषाज्ञानलक्षणं पर्यन्ते समुद्भावयाम्बभूव । किन्तु सूक्ष्मेक्षिकायामेतदपि दूषणं न लगति । प्रतिज्ञानाटिकायां हि वत्सराजच्छलनवृत्तान्तं निवेदयन् हंसको नाम वक्ति—

"तदो दिउगं विअ अद्धाणं गच्छिअ साळरुक्खच्छाआए सवण्णदाणिळदाए परुभासिदेहि असरीरविणिक्खित्तेहि विअ दन्तजुअळेहि सूइदो धणुसदमत्तेण विअ दिट्ठो सो दिव्ववारणपडिच्छन्दो"

इति । यत्र स कृत्रिमो नीलहस्ती स्थापितस्तत्र वनोद्देशे सालवृक्षच्छायायास्तथा बाहुल्यमासीद्, यथा तद्देहनैल्यस्याविवेकोऽभवदित्यनेन वाक्येन प्रतीयते । तत् कथं दन्तयुगलानुमेयप्राये तस्मिन् कपटहस्तिनि दिवापि कृत्रिमत्वज्ञापकविशेषग्रहणस्य सम्भवः । कामम् 'अनर्धगते सूर्ये' मध्याह्वासन्नकाले वा वत्सराजस्यायं नीलहस्तिग्रहणसम्भ्रम इति प्रतिज्ञानाटिकातोऽवगमात् सान्द्रयापि वनच्छायया वासरमध्यालोकप्रभावस्यानभिभवनीयत्वाद् दिवा सालवृक्षच्छायया न गजगतविशेषतिरोधानं भवति, तया गजस्वरूपगतनैल्यावच्छादनोक्तिश्चेयमतिशयोक्तिमात्रमिति मत्वा भामहेन दूषणं दत्तम्, अस्माभिस्तु सालच्छायाबाहुल्येन दिनप्रभावाभिभवं सम्भावयद्भिरेनामनुभवसिद्धवस्तुवृत्तकथनरूपां मत्वा तद् दूषणं समाहितम् । यथा तूक्तं बृहत्कथाप्रतिबिम्बे कथासरित्सागरे* सान्ध्यतिमिरप्रसरोऽपि तदानीं स्थित इति, तथा कृत्रिमगजगतविशेषाज्ञानं वत्सराजस्य सुतरामेवोपपन्नम् । किन्त्वियं सान्ध्यतिमिरप्रसरवाचोयुक्तिः प्रतिज्ञानाटिकायां नास्ति । बृहत्कथायां तु एषा सोमदेवभट्टेन दृष्टा स्याद्, यां तन्मूले कथासरित्सागरे स निवेशितवान् । बृहत्कथायां चैषा तत्कर्त्रास्य भामहदूषणस्य परिहारदार्ढ्याय कल्पिता स्याद् इति सर्वमनवद्यम् ॥

---

* द्वितीयलम्बकस्य चतुर्थतरङ्गे अष्टादशश्लोकः —

"गान्धर्वदत्तचित्तत्वात् सन्ध्याध्वान्तवशाच्च सः ।
न तं वनगतं राजा मायागजमलक्षयत् ॥" इति ।

अस्य भासनाटकचक्रस्य कालिदासकाले निरङ्कुशः प्रचार आसीत्, 'प्रथितयशसां भाससौमिल्लकविपुत्रादीनां' इति कालिदासोक्तेः । शूद्रककाले तु स भृशं विरलोऽभवत् । अत एव मृच्छकटिके शूद्रकस्य चारुदत्तनाटकीयभूयिष्ठवाक्यसङ्कलनसंरम्भोपपत्तिः, तथा परवाक्यसङ्कलननिष्पादितस्य मृच्छकटिकस्य प्रचारोपपत्तिश्च । ततः प्रचारः क्रमशो हीयमानो गत एव तावदभावमद्यत्वे । तत्र किं कारणं स्यात् । न तावद् गुणविरहः कारणं, कालिदासादिस्पृहणीयगुणगणपौष्कल्यस्य प्रागुपपादनात् । नापि स्वरसभङ्गसमर्थनीयपूर्वोक्तकतिपयप्रयोगसंयुक्तत्वं कारणं, वार्त्तिक-महाभाष्यादिसाचिव्यदूराधिरूढमहिमनि सर्वतो व्याप्तिं गते पाणिनीये शब्दानुशासने, कासुचित् ततइतः प्रसृत्वरीषु मेधाविभामहाद्यालङ्कारिकप्रणीतासु शिक्षासु, तदुभयानुसरणनियमप्रणये च संस्कृताध्यायिनां सर्वतः सञ्जाते प्रादुर्भूतानां कालिदासकृतीनां तथाविधकतिपयप्रयोगसंयुक्तत्वेऽपि प्रचाराव्याघातात् । नापि ग्रन्थेषु कविनामानिवेशः कारणं, ग्रन्थानिविष्टकविनाम्नामपि रघुवंश--शिशुपालवधादीनां प्रचारदर्शनात् । अतोऽप्रचारे कारणमदृष्टमेव किञ्चित् कल्प्यं, यद्बलाद् आचार्यव्याडिप्रणीतः संग्रहो गुणाढ्यरचिता बृहत्कथेत्येवमादयो ग्रन्था नामशेषतां प्राप्ताः । अधिकं प्रतिमानाटकोपोद्घाते द्रष्टव्यम् ।

अप्रचारः ।

एवं चिरप्रनष्टानामतिपुराणानामेषां भासनाटकानां बहूनामयमिदानीं युगपदुपलम्भो मृतपुनरुत्थानवत् कस्य नाम जगति न भवेदाश्चर्याय चानन्दाय च । एष हि संस्कृतप्रणयिनां पुरावृत्तविमर्शकानां च महार्घो निधिलाभः । अनेन च प्रनष्टलाभप्रत्ययेन कापि जनिता मे प्रत्याशा---नाटकान्तराण्यपि तस्य जातुचिदुपलप्स्यीयेति, नखलु भासनाटकानि परिगणितानि केनचिदेतावन्तीति ॥

अनन्तशयनम्. त. गणपतिशास्त्री.

कथावस्तुसंग्रहः ।

अर्जुनसूनोरभिमन्योः पञ्चविंशः सन्तानः वासुकिभ्रातृवसुनेमिदत्तघोषवत्याख्यवीणागान्धर्वनिपुणः गजहृदयवेदी यो वत्सराज उदयनो नाम, तमवन्तीश्वरः प्रद्योतः वासवदत्तायाः स्वकन्यायाः पतिं चिकीर्षुः कुलरूपवयोविद्याशौर्यादिगुणप्रकर्षावज्ञातसकलराजकमृजुनोपायेन प्रवणयितुमक्षमः गजच्छद्मना वनान्तरमानाय्यासहायं ग्राहयित्वा स्वान्तःपुरे क्वचिदवरुध्य वासवदत्ताया वीणाशिक्षणकर्मणि नियुक्तवान् । अथ तद्वशाद् गुरुशिष्ययोः सर्वप्रकारपरस्परानुरूपयोर्दूरमुपचिते रहःप्रणये गुरुः स्वमन्त्रियौगन्धरायणप्रयुक्तनीतिमहिम्नावरोधान्मुक्तः स्वप्रेयस्या वासवदत्तयानुगम्यमानः प्रद्योतमनादृत्य वत्सान् प्रत्यापन्नः । इति कथा प्रतिज्ञानाटिकायामस्ति ।

तथापहृतया सर्वातिशायिगुणगणभूषितया स्वमहिष्या वासवदत्तया सह कौशाम्बीमधिष्ठाय सौख्यानि निर्विशतो धीरललितस्वभावस्य वत्सराजस्य कदाचिद् वत्सराज्यमारुणिनाम्ना शत्रुणा भूयिष्ठमपजह्रे । तद्विजयाय तदनन्तरमगधदेशाधिपतेर्दर्शकस्य साहाय्येऽपेक्ष्यमाणे दर्शकमैत्रीसिद्ध्यर्थं वत्सराजस्य दर्शकस्वसृपद्मावतीपरिणयोऽवश्यं घटयितव्य आसीत् । तं तु जीवन्त्यां प्राणवल्लभायां वासवदत्तायां वत्सराजः कथमपि न करिष्यति, पद्मावती च वत्सराजे प्रियदारानपेते नैवाभिलाषं वितनिष्यतीति मनीषया वत्सराजस्य मन्त्री यौगन्धरायणो रुमण्वदादिभिरन्यैरमात्यैर्वासवदत्तया च नीतिनिपुणया सम्मन्त्र्य वासवदत्तालीकमरणप्रख्यापनेन वञ्चनमेव राज्ञः पद्मावतीपरिणयघटनौपयिकं श्रेयस्करमिति निश्चिकाय ।

अनेनैवाभ्युपायेन शत्रुहृतराज्यप्रत्यानयनफलकस्य पद्मावतीविवाहस्य सिद्धिरत्र स्वप्नवासवदत्ते प्रतिपाद्यते ।

तत्र कदाचिद् राज्ञि लावाणकग्रामाद् मृगयायै निर्गते, प्रवृत्ते तद्ग्रामदाहे, 'वासवदत्ता तद्रक्षणव्यसनी यौगन्धरायणश्च दग्धावि'ति मिथ्याप्रवादे च बहुलीभूते, गृहीतपरिव्राजकलिङ्गस्यावन्तिदेशभवस्त्रीवेषधारिण्या वासवदत्तया सह तस्माद् ग्रामात् प्रस्थितस्य तस्याः समुचितं न्यासस्थानं गवेषयतो यौगन्धरायणस्य क्वचन मगधसन्निकृष्टे तपोवने गमनं, तत्र पद्मावत्या आश्रमस्थस्वमातृवन्दनाय यादृच्छिकमागमनं, तस्यास्तपस्विजनकाङ्क्षितार्थदानप्रतिज्ञोद्घोषणं, तमवसरं लब्ध्वा सिद्धादेशिकादिष्टभाविवत्सराजमहिषीत्वप्रत्ययात् पद्मावतीं विश्वसनीयतरं वासवदत्तान्यासस्थानं मन्यमानस्य यौगन्धरायणस्य प्रोषितभर्तृकस्वभगिनीव्यपदेशेन पद्मा-

वतीहस्ते वासवदत्तान्यासीकरणं, कार्यशेषसंविधानार्थं तस्य ततो गमनं, प्रियापायपरिदूनवत्सराजवृत्तान्तपरिज्ञानं, ततः पद्मावत्या वत्सराजविषयाभिलाषोदयश्च प्रथमाङ्के वस्तु ।

प्रवृद्धाभिलाषायाः पद्मावत्यास्तद्भ्रात्रा दर्शकेन वत्सराजाय वाचा दानं, वत्सराजेन प्रतिग्रहणं च द्वितीयाङ्के वस्तु । दानप्रतिग्रहयोर्निर्वृत्तिवचनाच्च दातुः पद्मावतीप्सितपरिज्ञानं, पद्मावतीप्रतिग्रहं प्रति वत्सराजाभिमुख्यसम्पत्तये तदमात्यरुमण्वद्द्वारेण महाप्रयत्नकरणं चार्थाक्षिप्तम् ।

वासवदत्तयैव पद्मावत्यर्थं कौतुकमालिकाया यद् गुम्फनं तत् तृतीयेऽङ्के वर्ण्यते ।

अनुभूयमानेऽपि पद्मावतीसम्प्रयोगे नायकस्य वासवदत्तास्मृतिसन्तानः तदुद्दीपितस्य वासवदत्ताशोकस्यानुभावाश्च चतुर्थेऽङ्केऽभिधीयन्ते ।

शृण्वत्यां वासवदत्तायां नायकस्य तद्विषयस्वप्नालापानां प्रवृत्तिः, पार्श्वस्थया वासवदत्तया तत्स्वप्नालापसम्भावनं, प्रबुद्धेन नायकेन दृष्टमात्राया वासवदत्तायास्तद्दृष्टिगोचराद् झटिति तिरोभावः, ततो नायकस्य सन्तापः, अथ दर्शकप्रोत्साहनवशाच्छत्रुविजयार्थं नायकस्योत्थानं च पञ्चमेऽङ्के विषयः ।

षष्ठे त्वङ्के राज्यप्रत्यानयनं, वासवदत्तोपयुक्तनष्टवीणाप्रतिलम्भेन नायकस्य शोकोद्रेकः, वासवदत्ताजनन्या वात्सल्यात् प्रियाशोकविनोदाय प्रेषितस्य वासवदत्तावैवाहिकचित्रफलकस्य नायकेनाधिगमनं, चित्रदृष्टवासवदत्तासदृशरूपा काचिदावन्तिकावेषा केनापि ब्राह्मणेन स्वान्तिके कन्याभावे न्यासीकृतेति पद्मावत्या नायकाय निवेदनं, तत्कालसन्निहितेन यौगन्धरायणेन कपटब्राह्मणेन न्यासप्रत्यर्पणार्थनं, चित्रावन्तिकयो रूपसंवादपरीक्षणारम्भे यौगन्धरायणवासवदत्ताभ्यां स्वात्मप्रकाशनम् , अथ ताभ्यां समागतस्य स्वामिपरमभक्तमन्त्रियौगन्धरायणनिवेदितदेव्यपनयादिप्रयोजनश्रवणमुदितस्य वत्सराजस्य वासवदत्तापद्मावत्यादिभिः सह निजश्वशुरसमाश्वासनार्थमुज्जयिनीं प्रति प्रस्थानं च प्रतिपाद्यन्ते ॥





पात्राणि

पुरुषाः—

राजा	= उदयननामा वत्सराजः ।
यौगन्धरायणः	= वत्सराजमन्त्री ।
विदूषकः	= वसन्तकनामा वत्सराजनर्मसचिवः ।
ब्रह्मचारी	= लावाणकेऽधीती ।
काञ्चुकीयः	= राजकुले भृत्यः ।
संभषकः, भटः	= पद्मावतीभृत्यौ ।

स्त्रियः—

वासवदत्ता	= उदयनस्य प्रथममहिषी । इयमावन्तिका च ।
पद्मावती	= मगधराजस्य दर्शकनाम्नो भगिनी ।
तापसी	
चेटी	= पद्मावत्याः किङ्करी ।
मधुकरिका, पद्मिनिका	= पद्मावत्याः सख्यौ चेट्यौ वा ।
धात्री	= पद्मावत्या उपमाता ।
विजया	= वत्सराजगृहे प्रतिहारी ।
धात्री	= वासवदत्ताया उपमाता ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

महाकविश्रीभासप्रणीतं

स्वप्नवासवदत्तं

गणपतिशास्त्रिप्रणीतया व्याख्यया समेतम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः—

उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम् ।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥ १ ॥

वन्देऽहं विघ्नराजं च वाग्देवीं च पुनः पुनः ।
पूर्यन्ते यत्कृपालेशान्मङ्क्षु नम्रमनोरथाः ॥ १ ॥

ग्रन्थानां ये सुवर्णानामकर्कशमनीरसम् ।
तन्वन्ति निकषं चेतस्ते जयन्ति सचेतसः ॥ २ ॥

जगत्युच्चावचा नाम मनोवाक्कायसंश्रयाः ।
देशकालादिभेदेन चेतनानां प्रवृत्तयः ॥ ३ ॥

लोकाख्यानप्रसिद्धास्ताः कविवाक्यसमर्पिताः ।
संस्कुर्वन्ति सुखाच्चित्तमुच्चैराह्लादयन्ति च ॥ ४ ॥

भिद्यन्ते जन्त्वजन्तूनां तथैवाकृतयो बहु ।
तासां चासां च रूपाणि चार्वचारूणि नैकधा ॥ ५ ॥

तत्र यच्चारु रूपं तत् सूक्ष्मप्रज्ञैकगोचरम् ।
विज्ञातुं चाभिधातुं च न सर्वे कवयोऽप्यलम् ॥ ६ ॥

अतोऽचारु च चार्वेकदेशं चैते कथञ्चन ।
आलम्ब्य तदुपस्कारमलङ्कारैर्वितन्वते ॥ ७ ॥

वर्त्मनानेन गच्छन्तः शललैरिव शल्यकम् ।
वस्तुरूपमलङ्कारैश्छन्नं कुर्वन्ति केचन ॥ ८ ॥

द्वाविमौ समुदाचारौ नैव रुच्यै सचेतसाम् ।
का वा कवियशस्कामैराभ्यां लभ्या कृतार्थता ॥ ९ ॥

अचारुणीषच्चारौ च वपुष्यासज्य भूषणम् ।
नहि तच्चारुताध्यासात् काचिच्चक्षुष्मतो रतिः ॥ १० ॥

शोभा भूषणवृन्दस्य तत्र मेलनतो यदि ।
सैषा भूषणमञ्जूषासाधारण्येव किं ततः ॥ ११ ॥

पूर्वोक्तसमुदाचारसम्प्रदायानुवर्त्तनात् ।
कालक्रमेण वस्तुस्थचारुरूपानपेक्षणम् ॥ १२ ॥

बोद्धॄणां च कवीनां च शीलनाद् रुच्यतां गतम् ।
तेन लोके रसापेतान् स्फीतानुपलभामहे ॥ १३ ॥

अत्युक्त्यतिशयोक्त्येकप्राणितार्थपरायणान् ॥
दृश्यवर्ग्यानपि ग्रन्थाञ्छब्दडम्बरसम्भृतान् ॥ १४ ॥

(त्रिभिः कुलकम्)

चारु रूपं तु वस्तूनामेकान्तत उपाश्रिताः ।
निबन्धाः केऽपि विद्यन्ते द्वित्राणां कविवेधसाम् ॥ १५ ॥

साक्षात् संवादभङ्ग्या च तत् तथा तत्र वर्ण्यते ।
यथा रसः प्रवहति व्यङ्ग्यं च बहु सर्वतः ॥ १६ ॥

वस्तुसिद्धस्य चारिम्णो निह्नवो न यथा, तथा ।
अयोज्यनन्यलभ्यार्थं तत्र चित्रं क्वचित् क्वचित् ॥ १७ ॥

वश्यवाचां विदग्धानां वस्तुतत्त्वैकशंसिनाम् ।
अनर्हपदमव्यङ्ग्यमसदर्थं च किं वचः ॥ १८ ॥

श्रीमद् **रामायणं** तत्र **भारतं** च निदर्शनम् ।
रसानां ते ह्यकूपारावर्थरत्नमहाखनी ॥ १९ ॥

इष्टार्थदाने स्वर्धेनू ते इहामुत्रयात्रिणाम् ।
न केवलं, ग्रन्थशिल्पमार्गयात्राजुषामपि ॥ २० ॥

तत्कृतौ मुनिवाल्मीकिव्यासयोरनुकारिणम् ।
मुनिप्रख्यं कमप्यन्यं विद्मोऽद्य कविवेधसम् ॥ २१ ॥

यं निःश्वसितनिर्यत्नप्रसरोदारभाषितम् ।
मन्ये रूपकनिर्माणसम्प्रदायादिदेशिकम् ॥ २२ ॥

व्याहर्तुं बहु शृङ्गारे नालं के, यः पुनः कविः ।
युक्तहृद्यं समस्तेषु रसेष्वोजायते समम् ॥ २३ ॥

स हि **भास** इति ख्यातः **कालिदासा**द्यभिष्टुतः ।
यत्कृतान्युपलब्धानि रूपकाणि त्रयोदश ॥ २४ ॥

ललितोदारमधुरं वाक्यमर्थः स्वभावजः ।
तद्रूपं चात्र चार्वस्ति नास्ति चारुतरं यतः ॥ २५ ॥

व्यङ्ग्यपीवसु सा कापि सुधाघनमयेष्विव ।
तद्वाक्यशकलेषु श्रीस्तद्वाक्यशकलेष्विव ॥ २६ ॥

तानि **शाकुन्तलं** शब्दैरर्थैर्भङ्ग्यन्तरैरपि ।
अनुकृत्य कृतीत्येष तद्गुणाख्यानसंग्रहः ॥ २७ ॥

चिरप्रनष्टाधिगतं सद्रूपककदम्बकम् ।
तज्जयत्यनवज्ञेयं जगतः परमं धनम् ॥ २८ ॥

साधुशीलित**वाल्मीकिवेदव्यासा**दिभाषितैः ।
शब्दार्थयोः सतत्त्वज्ञैश्चारुत्वान्तरवेदिभिः ॥ २९ ॥

प्रसन्नोदारगम्भीरं तच्च नासुगमं बुधैः ।
तत्तुष्ट्यै च परार्थं च तत्तु व्याख्यातुमुत्सहे ॥ ३० ॥

(युग्मकम्)

तत्रैकं रूपकव्यूहे नाटकं तावदुत्तमम् ।
स्वप्नवासवदत्ताख्यं विवृणोमि यथामति ॥ ३१ ॥

अथ श्रीवाल्मीकिव्यासदेश्यस्तत्रभवान् **भासः** स्वप्नवासवदत्ताभिधानं रङ्गप्रयोगप्रधानं काव्यं चिकीर्षुः, तदारम्भे प्रयोगसम्यङ्निष्पत्तिपरिपान्थिदुरितप्रशमौपयिकं पूर्वरङ्गप्रधानाङ्गं मङ्गलश्लोकपाठम्, उपक्रम्यमाणप्रयोगस्य कथावस्त्वंशस्य निवेदनं च प्रयोगनिर्वाहधूर्वहेण सूत्रधारेण रङ्गे प्रथमसमाचर-

णीयं पश्यन् सूत्रधारस्य प्रवेशं तावदाह — **'नान्द्यन्ते ततः प्रविशति सूत्रधारः'** इति। नान्दी आनकः। 'दुन्दुभिस्त्वानको भेरी भम्भा नासूश्च नान्द्यपि' इति वैजयन्ती। सा चोपलक्षणं वाद्यान्तराणामपि। तस्या अन्ते प्रयोगपूर्वाङ्गभूते आनकादिवाद्यवादनेऽवसित इत्यर्थः। अथवा नन्दिरानन्दः, तस्या इयं नान्दी गीतवाद्यवादनक्रिया, तस्या अन्ते। सा हि प्रयोगारम्भे देवतापरिषदानन्दार्थानुष्ठीयते। यद्यप्युक्तव्युत्पत्त्या देवस्तावकमङ्गलश्लोकपाठोऽपि नान्दी भवति, तथापि सा श्लोकनान्दी सत्काव्यरूपत्वाद् रङ्गप्रयोगयोग्या रङ्ग एव प्रयोक्ष्यत इति तदतिरिक्तैव नान्दीह ग्राह्या। ततः तदनन्तरं नान्दीपरिसमाप्त्यव्यवहितोत्तरकाल इत्यर्थः। 'नान्द्यन्ते प्रविशति सूत्रधार' इत्युक्तौ नान्द्यवसानसूत्रधारप्रवेशक्रिययोः पौर्वापर्यमात्रं प्रतीयते, न तु क्रियान्तराव्यवधानमपि, तयोः क्रियान्तरव्यवधानेऽपि पौर्वापर्यव्यवहाराहानात्। अतः तत इत्युक्तिः। तेन नान्द्यवसानक्रियानन्तरमेव, नान्यक्रियानन्तरमिति यथोक्तार्थलाभः

अथ प्रविष्टः सूत्रधारो मङ्गलमाचरति—उदयेति। उदयनवेन्दुसवर्णौ उदयकालनूतनचन्द्रतुल्यवर्णौ। दत्तमासवं मद्यं यस्यै सा आसवदत्ता। दत्तशब्दस्य परनिपात आहिताग्न्यादित्वात्, तथाभूताबला याभ्यां तौ आसवदत्ताबलौ। अथवा आसवेन मद्येनातिपीतेन दत्तमुत्पादितमबलं बलाभावोऽलसता याभ्यां तौ। बलभद्रस्य हि पानव्यसनित्वमितिहासेषु प्रसिद्धम्। पद्मायाः लक्ष्म्या अवतीर्णम् अवतारः सान्निध्यं, भावे क्तः, तेन पूर्णौ ऋद्धिमन्तौ। वसन्ते कम्रौ मनोज्ञौ तत्कालोचितशृङ्गारवेषपरिग्रहात्। वसन्ताख्यतालविशेषमनोज्ञौ वा दैर्घ्ययोगात्। बलस्य अच्युताग्रजस्य भुजौ बाहू। त्वां प्रेक्षकपरिषदिह युष्मदर्थः। पातां रक्षताम्। प्रयोगप्रेक्षणरूपाभिलषितार्थनिर्विघ्नसिद्ध्या योजयतामिति यावत्। सा चेयं परिषदिष्टसिद्धिः प्रयोगसम्यङ्निष्पत्तिनान्तरीयकेति तां प्रार्थयमानेन सूत्रधारेण स्वाभिलषितस्य प्रयोगसम्यगनुष्ठानस्य सिद्धिरप्यर्थात् प्रार्थिता। एतदेव मङ्गलं तन्त्रेण ग्रन्थविघ्नविघातार्थमपि भवतीति सर्वविधमङ्गलसिद्धिः।

अत्र **उदयन-वासवदत्ता-पद्मावती-वसन्तक**शब्दानां संश्लेषणभङ्ग्या तन्नामकप्रधानपात्रसूचनाद् **उदयन**चरितं नाटकप्रतिपाद्यमिति द्योतितम्। माङ्गलिकवाक्ये चैषा महाकवेः श्लेषतः पात्रनामधेयसूचनशैली नाटकान्तरेष्वपि स्वप्नवासवदत्तसहजेषु बहुशो लक्ष्यते। इदं चावधेयम्—यदि मङ्गलश्लोको 'नान्द्यन्त' इत्यादेः सूत्रधारप्रवेशवाक्यात् प्राङ्निबध्येत, तर्हि स सूत्रधारोक्तित्वाभावात् सूत्रधा-

एवमार्यमिश्रान् विज्ञापयामि । अये! किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

रप्रयोगस्य विषयो न स्यात्; अवश्यं चासौ रङ्गे प्रयोक्तुमर्हो यथोक्तफलसिद्धय इति सूत्रधारोक्तितां ग्रन्थकारेण नीत इति । एवं **प्रतिज्ञायौगन्धरायणा**दिष्वपि द्रष्टव्यम् ।

ये तु मङ्गलश्लोकपाठपूर्वकाः 'नान्द्यन्ते प्रविशति सूत्रधारः' इत्यादयः पाठा अर्वाचीननाटकेषु बहुलमुपलभ्यन्ते, तत्र मङ्गलश्लोकपाठोऽपि पूर्वोक्तव्युत्पत्त्या *नान्दी भवतीति नान्द्याः वाद्यवादनादिमङ्गलश्लोकपाठपर्यन्तायाः क्रियाया अन्ते सूत्रधारः प्रविशतीत्यर्थः । किन्तु सा श्लोकनान्दी प्रयोगयोग्यापि सती आनकवाद्यवादनादिक्रियावद् रङ्गाद् बहिरनुष्ठानविषय आपद्यते; नतु रङ्गे । रङ्गे हि प्रविष्ट एव कश्चित् सूत्रधारस्तद्वर्ग्यो वा तां प्रयोक्तुमर्हः, न पुनरप्रविष्टः । नच तादृशस्य कस्यचित् प्रयोक्तुः प्रवेशस्तेषु ग्रन्थेषु नान्दीश्लोकारम्भात् प्राङ् निबद्धः । तस्मात् सूत्रधारप्रवेशवाक्यपाठपूर्वका एव मङ्गलश्लोकपाठा नाटकेषु, मन्ये, श्लिष्टतराः । अथवा

"प्रयुज्य रङ्गान्निष्क्रामेत् सूत्रधारः सहानुगः ।
प्रयुज्य विधिनैवं तु पूर्वरङ्गं नियोगतः ।
स्थापकः प्रविशेत् तत्र सूत्रधारगुणाकृतिः ॥" (नाट्यशा० ५)

"पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते ।
प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥" (दशरू० ३)

इत्यादिलक्षणकारकल्पितसमयपरिपालनाय सूत्रधारद्वयमभ्युपगम्य नान्दीश्लोकात् प्रागपि "ततः प्रविशति सूत्रधारः" इति पाठस्तेषु कल्पनीयः; नान्दीश्लोकानन्तरं च 'निष्क्रान्त' इति पठनीयम् इत्यलं बहुना । प्रकृते मङ्गलश्लोके ये नान्द्या गुणाश्चन्द्रनामाङ्कितत्वाष्टपदत्वादयो लक्षणकाराणामिष्टाः, तेऽपि सम्भवन्तोऽनुसन्धेयाः ॥ १ ॥

एवं मङ्गलप्रयोगसम्मुखीकृतान् सामाजिकान् प्रति उपक्रंस्यमानकथावस्त्वंशविज्ञापनं प्रतिजानीते — **एवमार्यमिश्रानि**त्यादि । एवम् अनेन बुद्धिस्थेन प्रकारेण । आर्यमिश्रान् पूज्यतमान् । विज्ञापनप्रतिज्ञाश्रवणसमनन्तरमेव सूत्रधारस्येङ्गितं

* "पूर्वं कृता मया नान्दी आशीर्वचनसंयुता ।
अष्टाङ्गपदसंयुक्ता प्रशस्ता वेदसम्मता ॥"
(नाट्यशा० १) इति भरतः ।

(नेपथ्ये)

(क) उस्सरह उस्सरह अय्या! उस्सरह ।

सूत्रधारः —— भवतु, विज्ञातम् ।

भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः ।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः ॥ २ ॥

(निष्क्रान्तः ।)

स्थापना ।

(क) उत्सरतोत्सरतार्याः! उत्सरत ।

गृहीत्वा तद्वर्ग्यैर्विज्ञाप्यवस्तुप्रयोगोपक्रमसूचकः शब्दो नेपथ्ये समुत्थापितः । सूत्रधारस्तु अस्यार्थस्याज्ञानाभिनयचमत्कारेण तटस्थ इव तं शब्दं गृह्णन्नाह —— **अये** इत्यादि । अये इति विषादे कोपे वा । स च विज्ञापनसमाधिभेदिनः शब्दस्यातर्कितश्रवणात् । किन्नुखलु किं कारणम् । मयि विज्ञापनव्यग्रे सति विज्ञापनव्यासक्तमात्रे सति नतु कृत-विज्ञापने, शब्द इव विशेषाकारेणानिश्चितः शब्दः, इवपदस्यानिश्चयार्थत्वात् । मयि विज्ञापनोन्मुखे सति अविदितविशेषाकारः कोऽपि शब्दः केन कारणेन श्रूयत इति वाक्यार्थः । **अङ्ग! पश्यामी**ति । पश्यामि शब्दस्य विशेषाकारं कारणं च परीक्ष्य ज्ञास्यामि । अङ्गेति सम्भ्रमं दर्शनविषयं द्योतयति ॥

एवं शब्दस्य विशेषाकारनिश्चयाय श्रवणापेक्षायां तस्य नेपथ्ये प्रवृत्तिं कविः स्ववाक्येन सूचयति —— **नेपथ्ये** इति । वक्ष्यमाणाकारः शब्दो नेपथ्ये श्रूयत इत्यर्थः । **उस्सरहे**ति । उत्सरतोत्सरतार्याः! उत्सरतेति संस्कृतम् । उत्सरत मार्गाद् दूरं गच्छतेत्युत्सरणविधिः । सम्भ्रमादसकृदुक्तिः ॥

तं श्रुत्वा सूत्रधार आह —— **भवत्वि**ति । प्राप्तकाले लोट् । शब्द इति शेषः । नेपथ्योत्थितः शब्दो भवितुं प्राप्तावसर इत्यर्थः । प्राप्तावसरतया च शब्दस्य प्रकृतार्थविषयत्वं प्रत्यायितम् , अप्रकृतार्थपरत्वे प्राप्तावसरत्वायोगात् । तेन तस्य यथापेक्षं प्रवृत्तिरभ्यनुज्ञाता भवति । अभ्यनुज्ञानुगुणं शब्दगतं सर्वमव-गतमित्याह——**विज्ञात**मिति ।

विज्ञातं प्रकाशयति—**भृत्यैरिति** । तपोवनस्य प्रदेशे क्वचिदविलम्बभाविनि मगधराजकन्यायाः **पद्मावत्या** आगमने तत्पूर्वाङ्गभूतस्तन्मार्गसङ्गतसकलजनोत्सारणसमुदाचार उत्सरणविधिवाक्योद्घोषणपुरस्सरस्तद्भृत्यैर्निश्शङ्कमनुष्ठीयत इति श्लोकार्थः । एतावति सूत्रधारेण स्वोक्तेः परिसमापनाद् एष एव कथावस्त्वंशो 'विज्ञापयामी'ति प्राक् प्रकृतः सूत्रधारस्य विज्ञाप्योऽर्थ इति गम्यते ।

अत्र स्निग्धैरिति स्वाम्यनुरक्तत्वेनाप्तत्वमुक्तम् , न ह्यतादृशा भृत्या राजकन्यानुगमनरूपे कार्ये नियोक्तुं योग्याः । धृष्टमिति उत्सारणायां शङ्काविरहः, स्वनियोगानुष्ठाने शङ्कितव्याभावात् । सर्व इति यो यः पथि सङ्गतः पुमान् स्त्री वा, बालो वृद्धो वा, स सर्वोऽपि । तदिदम् उत्सारणाया भृत्यबुद्ध्यनुसारि न्याय्यत्वम् । अभिरूपदृष्ट्या तु तस्या अयुक्तत्वं वर्तिष्यमाणयौगन्धरायणादिसंवादानुगुणमिह बोद्धव्यम् । तथाहि—उत्सार्यमाणस्य जनस्य तपोवनगत इति विशेषणेन ग्रामगतजनसाधारणरागादिदोषास्पृष्टहृदयत्वम् आशंसनीयपुण्यदर्शनत्वं चानुत्सार्यत्वनिमित्तं ध्वनितम् । भृत्यैरिति भृत्यत्वादेव तेषां विद्यासंस्काराभावकृतं युक्तायुक्तविवेकाविकलत्वमौत्सर्गिकं सूचितम् । राजसम्बन्धित्वराजकन्यानुगमनविस्रम्भभाजनत्वाभ्यामवलेपः । धृष्टमिति अकार्येऽप्युत्सारणे शङ्काविरह उक्ताविवेकावलेपोभययोगादिति ॥ २ ॥

इत्थं नेपथ्योत्थशब्दविवरणभङ्ग्या विज्ञाप्यविज्ञापने निर्वृत्ते सूत्रधारस्य निष्क्रमणमाह—**निष्क्रान्त** इति । स्थापनेति । एवं कथावस्त्वंशस्य स्थापनात् स्थापना । स्थापना प्रस्तावनेति पर्यायौ ।

अथ "प्रसाद्य रङ्गं विधिवत् कवेर्नाम च कीर्तयेत् ।
प्रस्तावनां ततः कुर्यात् काव्यप्रख्यापनाश्रयाम् ॥" (नाट्यशा० ६)
"वाञ्छाकलापस्तु कवेरभीष्टार्थप्रकाशनम् ।
स्वाभिधेयगतत्वेन सा द्विधा परिपठ्यते ॥
स्वगतं तु स्वगोत्रादिस्वीयकीर्तिप्रशंसनम् ।
अभिधेयगतं यत् तत् काव्यनाम्ना प्रकाशनम् ॥" (भावप्र०)

इत्यादिलक्षणशास्त्रविहिता कविकाव्यकीर्त्तना **कालिदासा**दिनिखिलकविग्रामाचरितात्र स्थापनाप्रकरणे कर्तव्या सती कस्मान्न कृता । उच्यते—प्रस्तावनायां कविकाव्यकीर्त्तनसमुदाचारस्तावदस्य पुराणमहाकवेः काले नावर्तत । पश्चात्तु कालेन कवीनामुपजातं कविकाव्यकीर्त्तनसमुदाचारप्रणयं लक्ष्येषु भूयिष्ठमुपलभ्य तदनुसारि लक्षणं लक्षणकारैः प्रणीतमित्यदोषः । प्रकृतनाटकस्य तु मातृकाग्रन्थान्तदृष्टपाठानुसारेद्

(प्रविश्य)

भटौ — (क) उस्सरह उस्सरह अय्या ! उस्सरह ।

(ततः प्रविशति परिव्राजकवेषो यौगन्धरायण आवन्तिकावेषधारिणी वासवदत्ता च ।)

यौगन्धरायणः — (कर्णं दत्त्वा) कथमिहाप्युत्सार्यते । कुतः,

(क) उत्सरतोत्सरतार्याः ! उत्सरत ।

राजशेखरसूक्तिव्यवहारानुरोधाच्च **स्वप्ननाटक**मिति **स्वप्नवासवदत्तेति स्वप्नवासवदत्त**मिति च नामान्यवगतानि । तत्र स्वप्नप्रधानं नाटकमित्याद्यं नाम व्युत्पाद्यं, स्वप्नदृष्टा **वासवदत्ता** स्वप्नवासवदत्ता, तत्प्रतिपादके तच्छब्दोपचार इति द्वितीयं, स्वप्नदृष्टा **वासवदत्ता**त्रेति तृतीयम् । एतत्कवेश्च **भास** इति नामधेयमनुमितम् । यथा च तदनुमानसिद्धिस्तथैतदुपोद्घाते निरूपितम् ।

अत्र नाटके रसो वासवदत्तागत उदयनविषयः प्रवासविप्रलम्भः; स उदयनगतो वासवदत्ताविषयः करुणः, वासवदत्तावियोगस्यात्यन्तिकत्वभ्रमविषयतया शोकप्रकर्षकत्वात् । पद्मावत्युदयनयोः परस्परविषयः शृङ्गारस्तत्राङ्गम् । अयं चाङ्गशृङ्गारोऽर्थशृङ्गार इत्युच्यते, उदयनेन शत्रुहृतस्वराज्यप्रत्यापत्तिरूपार्थसिद्धये पद्मावत्याः परिणयनात् । इत्याद्यूहनीयम् ॥

अथ सूचितेषु भृत्येषु द्वयोरुत्सारणशब्दोद्घोषिणोः प्रवेशमाह—**प्रविश्य भटा**विति । 'ततः प्रविशतः साधारणौ' इति क्वचित् पाठः ; उत्तरत्र च भटाविति स्थाने उभाविति । **उस्सरहे**त्यादि ॥

उत्सारणीयजनेषु सूचितेषु उपयोगानुगुणं द्वौ जनौ प्रवेशयति—**ततः प्रविशती**त्यादि । तत्र यौगन्धरायणः कथानायकस्य **उदयनस्य** मन्त्री कार्यवशपरिगृहीतपरिव्राजकलिङ्गः, **वासवदत्ता** तु **उदयनस्य** महिषी । सा च परिगृहीतावन्तिकारूपा । अवन्तिषु जनपदे भवा आवन्ती अज्ञाता आवन्ती आवन्तिका । यौगन्धरायणस्य च शत्रुहृतस्वस्वामिराज्यप्रत्यापत्तेः सिद्धादिष्टस्वस्वामिपद्मावतीपरिणयोत्तरकालभावित्वमवधारिततो लावाणकग्रामदाहे स्वात्मवासवदत्तयोर्मिथ्यादाहप्रवादोत्पादनेन तस्माद् ग्रामात् स्वेनापनीतां वासवदत्तां पद्मावतीपरिणयं यावत् क्वचन विस्रम्भणीयतरतापसजनहस्ते न्यासं कर्तुं तया सहात्र तपोवने सन्निधानमिदं बोद्धव्यम् ।

धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-
र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते ।
उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः
कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया ॥ ३ ॥

वासवदत्ता — (क) अय्य ! को एसो उस्सारेदि ।

(क) आर्य ! क एष उत्सारयति ।

वासवदत्तापनयस्तु पद्मावत्या उदयनवरणाभिसन्धिजननाय उदयनस्य कथञ्चित् पद्मावतीपरिणयानुकूल्यसम्पादनाय च, अन्यथा हि तदुभयं न घटिष्यत इति ॥

कर्णं दत्त्वेति । शब्दव्यक्तिनिश्चयानुकूलतया कर्णमेकं शब्दागमनदिगभिमुखं कृत्वेत्यर्थः । श्रवणमार्थम् । **कथमिति** । इहापि तपोवनेऽपि । अपिशब्देनोत्सारणां प्रति तपोवनस्यास्थानत्वं द्योतितम् । तत्र कारणप्रश्नः — **कुत** इति ।

कारणमाह — **धीरस्येति** । धीरस्य अचञ्चलचित्तस्य । चित्तस्य चाचाञ्चल्यं विषयतृष्णानभिभूतत्वम् । तदेव समर्थ्यते त्रिभिर्विशेषणैः—आश्रमसंश्रितस्य वसतः आ समन्तात् श्राम्यन्ति तपसा कायं क्लेशयन्त्यत्रेति आश्रमः पर्णादिमयं मुनिगृहं, तमाश्रित्य वसतः, अनेन वसतिसुखवैतृष्ण्यमुक्तम् । वन्यैः वनभवैः फलैः । तुष्टस्य तृप्तस्येत्यशनसुखवैतृष्ण्यम् । वल्कलवतः चीरधारिण इति वसनभोगवैतृष्ण्यम् । अत एव मानार्हस्य पूजनीयस्य । जनस्य त्रासो भयम् । समुत्पाद्यते, उत्सरणाज्ञावाक्यघोषणया भृत्यैरिति शेषः । तदिदमकार्यमित्यस्थानमुत्सारणायास्तपोवनम् । अथवा कुत इति पदस्य समुत्पाद्यत इत्येतेन सम्बन्धः । कुतः केन निमित्तेन समुत्पाद्यते, न केनचिदपि निमित्तेन पूजनीयस्य जनस्य भयमुत्पादयितुं युक्तमित्यकार्या नामोत्सारणा तपोवन इत्याशयः । ईदृशाकार्यकर्तारो भृत्या न केवलं, किन्तु य एषां स्वामी, सोऽपि जनो गर्हणीय इत्यभिप्रायेणाह — उत्सिक्तः उद्गम्य सिञ्चति न तु स्वस्थाने तिष्ठतीत्युत्सिक्त उद्धत उन्मर्यादः । विनयात् कार्याकार्यविवेकशिक्षणात् । अपेतपुरुषः अपेताः पुरुषा भृत्या यस्य स तथाभूतः । चलैः अस्थिरैः । भाग्यैः विभवप्रभावादिभिः । विस्मितः गर्वितः । कोऽयं निभृतं शान्तम् । इदं तपोवनम् । आज्ञया ग्रामीकरोति अशान्तग्रामीणजनोचितोत्सरणाज्ञाप्रवर्तनेन ग्रामसमतां नयन्नवमन्यत इत्यर्थः । भो इति विषादे ॥ ३ ॥

यौगन्धरायणः — भवति! यो धर्मादात्मानमुत्सारयति ।

वासवदत्ता — (क) अय्य! ण हि एव्वं वत्तुकामा, अहं वि णाम उस्सारइदव्वा होमि त्ति ।

यौगन्धरायणः — भवति! एवमनिर्ज्ञातानि दैवतान्यवधूयन्ते ।

वासवदत्ता — (ख) अय्य! तह परिस्समो परिखेदं ण उप्पादेदि, जह अअं परिभवो ।

(क) आर्य! न ह्येवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति ।

(ख) आर्य! तथा परिश्रमः परिखेदं नोत्पादयति, यथायं परिभवः ।

उत्सारणमसहमाना वासवदत्ता पृच्छति — **अय्येति** । क एष उत्सारयति अर्थादस्मान् ॥

भवतीति । अत्र य इत्यनेन स इत्याक्षिप्यते, उत्सारयतीति च प्रश्नवाक्यगतमनुषज्यते स उत्सारयतीति । भवति! माननीये! । यो धर्माद् आत्मानम् उत्सारयति च्यावयति, सः अस्मानुत्सारयति । धर्मच्युतिनिमित्तमिदमकार्यमाचरन् क इति न ज्ञायत इत्यर्थः ॥

अय्य ण हीति । एवम् उत्सारयिता धर्माच्च्यवत इत्यनेन प्रकारेण । न हि वक्तुकामा वक्तुं नैव मे कामः । अहमपि नाम यस्या मम पूर्वदशायां गतागतप्रसङ्गे जनोत्सारणसमुदाचारो भटैरनुष्ठित आसीत्, साप्यहम् । उत्सारयितव्या भवामि इति वक्तुं मे कामः, अत्रापि वक्तुकामेत्यनुषङ्गात् । नाहमुत्सारयितारं गर्हितुं प्रवृत्ता, किन्त्वात्मदशां वक्तुमिति तात्पर्यम् ॥

भवतीति । अनिर्ज्ञातानि तत्त्वेनाविदितानि । दैवतानि देवतोपमाः पूज्यजनाः । एवमनेनोत्सारणादिरूपेण प्रकारेण । अवधूयन्ते अवज्ञायन्ते । स्वरूपावच्छादचारिणामीदृशानि परावज्ञानानि लोके सम्भवन्त्येव, किं कुर्मः, तानि सोढव्यान्येवेत्याशयः । अथवा एवमित्यस्य यथा भवती तथेत्यर्थः । दैवतशब्दश्च मुख्यवृत्तिः । यथा तावदनिर्ज्ञातत्वाद् भवती अवधूयते, तथा त्वत्तोऽप्यधिका देवता अनिर्ज्ञाता अवधूयन्ते इत्यर्थः । शेषं प्राग्वत् । 'अविज्ञातानि दैवतान्यपि' इति क्वचित् पाठः ॥

अय्य तहेत्यादि । परिश्रमः वनसञ्चारादिजनितः कायिक आयासः । परिखेदं मनोव्यथाम् । अयम् उत्सारणजन्मा ॥

यौगन्धरायणः — भुक्तोज्झित एष विषयोऽत्रभवत्या । नात्र चिन्ता कार्या । कुतः,

पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः ।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥ ४ ॥

भटौ — (क) उस्सरह अय्या ! उस्सरह ।

(क) उत्सरतार्याः ! उत्सरत ।

उत्सारणसमुदाचारदर्शनेन ईदृशसमुदाचारपरबहुपरिजनश्लाघितं नित्यानुभूतपूर्वं निजगमनवैभवं स्मरन्ती वासवदत्ता विमनायत इति मत्वा तामाश्वासयति— **भुक्तोज्झित** इत्यादि । भुक्तोज्झितः अनुभूतत्यक्तः, अनुभूतत्वादेव निस्सारत्वबुद्ध्योपेक्षित इत्यर्थः । एष विषयः परिजनश्लाघापुरस्सरं गमनम् । अत्रभवत्या स्वरूपावच्छादमभ्युपगच्छन्त्येत्यार्थम् । नात्र चिन्ता कार्या, इममर्थमनुचिन्त्य न मनः क्लेशनीयमित्यर्थः । तत्र हेतुप्रश्नः — **कुत** इति ।

पूर्वमिति । त्वयापि सम्प्रत्यवस्थाविशेषक्लिष्टयापि, समुच्चये वापिशब्दः, न केवलं प्रकृतभृत्यस्वामिना जनेनेत्यर्थः, गमनक्रियापेक्षे कर्तरि तृतीया । अभिमतम् इष्टम् । एवम् ईदृशं परिजनश्लाघितम् । गतं गमनम् । पूर्वं नगरवाससमये । आसीत् । आयतावपीदृशं ते गमनं नखलु न भविष्यतीत्याह — भर्तुः नायकस्य । विजयेन हेतुना । श्लाघ्यं श्लाघार्हं श्लाघायुक्तं वा यथा भवति तथा । पुनर्गमिष्यसि, उत्तरकालेऽपि त्वमीदृशं गमनभाग्यमनुभविष्यसीत्यर्थः । अतः कार्यवशाभ्युपेतं साम्प्रतिकमवस्थान्तरं ते न स्थायीत्याभिप्रायः । उक्तमर्थं सामान्यन्यायेन समर्थयते — जगतो लोकस्य भाग्यपङ्क्तिः भाग्यानां शुभाशुभादृष्टानां, तज्जन्यानां सुखदुःखानां वा जन्यजनकयोरभेदोपचारात् , पङ्क्तिः श्रेणिः । चक्रारपङ्क्तिरिव चक्रस्य रथाङ्गस्य अराणां नाभिनेम्यन्तरालवर्तिनामवयवानां पङ्क्तिरिव । कालक्रमेण कालपर्यायेण । परिवर्तमाना भ्रमन्ती सती । गच्छति कदाचिदुपरि कदाचिदधस्तात् कदाचिदन्तराल इति क्रमेण चलति, न तु क्वचिन्नियमेन तिष्ठतीत्यर्थः । उक्तन्यायार्थो विवृतो मेघदूते—"कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च गतिश्चक्रनेमिक्रमेण" ॥ इति ॥ ४ ॥

The s reis of the ... tinkles of fo: time ...

(ततः प्रविशति काञ्चुकीयः ।)

काञ्चुकीयः — सम्भषक ! नखलु नखलूत्सारणा कार्या । पश्य,

परिहरतु भवान् नृपापवादं
न परुषमाश्रमवासिषु प्रयोज्यम् ।
नगरपरिभवान् विमोक्तुमेते
वनमभिगम्य मनस्विनो वसन्ति ॥ ५ ॥

उस्सरहेति पुनरपि भटघोषणा ॥

भटयोरविवेकप्रवृत्तं तापसजनोत्सारणस्वाच्छन्द्यमनुवर्तमानं वारयितुं विवेकवतो भृत्यविशेषस्य प्रवेशमाह—**तत** इति । काञ्चुकीयः कञ्चुकी कञ्चुकशब्दान्मत्वर्थीयश्छण् मृग्यः । कृशाश्वादित्वकल्पनया वा निर्वृत्तार्थे कथञ्चिच्छण् साध्यः । कञ्चुकेन हि वैचित्र्यविशेषवता कञ्चुकीत्यधिकारव्यपदेशो निर्वर्तते इति कृत्वा तद्व्यपदेशिनि निर्वृत्तिरुपचर्यते ॥

नखल्विति । सम्भ्रमेण द्विरुक्तिः ॥

भटयोरेकतरमभ्यर्हितमुद्दिश्याह — **पश्ये**ति । उक्तं जानीहीत्यर्थः ।

परिहरत्विति । भवान् भासमानस्त्वं, बहुमानवचनमुपच्छन्दनार्थम् । नृपापवादं परिहरतु अकार्यायामुत्सारणायां भवत्प्रवृत्त्या सम्भाव्यमानमस्मन्नृपतेरकार्यप्रवर्तनाकलङ्कं मा तावदुत्पादयतु, परिहरतेरिहानुत्पादनार्थत्वात् । प्राप्तकाले च लोट् । उत्सरणाज्ञावाक्यप्रयोगस्य द्विरज्ञानादाचरणेऽपि बाहुल्येनानाचरणादद्यापि नृपापवादपरिहारस्य कालः प्राप्त एव वर्तते, न त्वतिक्रान्त इति परिसमाप्यतामेतावतायमुक्तवाक्यप्रयोगसमुदाचार इति भावः । नगरेष्ववारिताभ्यस्तोऽयं कस्मादिहानुष्ठीयमानो नृपापवादं जनयिष्यतीति चेदाह — परुषं निष्ठुरवचनसामान्यम् । आश्रमवासिषु विषये । न प्रयोज्यं प्रयोक्तुं न युक्तं, प्रकृतं चोत्सरणाज्ञावाक्यं स्वच्छन्दगतिप्रसभनिरोधपरिभवावहत्वादतिपरुषमिति सुतरां न प्रयोज्यमित्यर्थः । परुषवाक्यप्रयोगापरिभाव्यत्वनिमित्तभूतं नगरवासिव्यावृत्तमाश्रमवासिनां गुणविशेषमाह—**नगरे**ति । मनस्विनः प्रशस्तमनस्काः प्रशंसायां विनिः ; प्राशस्त्यं च विषयविरागतपोबलादियोगात् । एतेन परिभवप्रतीकारशक्तत्वं परदयालुत्वं चोक्तम् । एते आश्रमवासिनः । नगरपरिभवान् नगरवाससुलभानीदृशानि अवज्ञानानि विमोक्तुं परिहर्तुं, परिहारश्चात्मनः परिभवाविषयीभावो नगरवासिभिः परिभवाविषयीकरणं च भवतीति तदुभय-

उभौ — (क) अय्य ! तह ।

(निष्क्रान्तौ ।)

यौगन्धरायणः — हन्त सविज्ञानमस्य दर्शनम् । वत्से ! उपसर्पावस्तावदेनम् ।

वासवदत्ता — (ख) अय्य ! तह ।

यौगन्धरायणः — (उपसृत्य) भोः ! किङ्कृतेयमुत्सारणा ।

काञ्चुकीयः — भोस्तपस्विन् !

यौगन्धरायणः — (आत्मगतम्) तपस्विन्निति गुणवान् खल्वयमालापः । अपरिचयात्तु न श्लिष्यते मे मनसि ।

(क) आर्य ! तथा ।

(ख) आर्य ! तथा ।

सिद्ध्यर्थमिति यावत् । वनमभिगम्य वसन्ति नगरवासिसन्निकर्षमत्यन्तं त्यजन्तीत्यर्थः । वनेऽपि ते चेत् परिभूयेरन्, तदा परिभवितॄन् कुपिताः शपेयुः ; अथ ते क्षमावशान्न कुपिताः, तदा परिभावितारः पापेन युज्येरन्निति सर्वथैवाकार्यत्वादुक्तनिष्ठुरवाक्यप्रयोगस्य नृपापवादजनकत्वं सिद्धमिति भावः ॥ ५ ॥

अय्य तहेति । तथा, यथा भवतोपदिष्टं तथा कुर्व इत्यर्थः ॥

हन्तेत्यादि । हन्तेत्यानिष्टनिवारणेन हर्षः । अस्य भटवारयितुः काञ्चुकीयस्य । दर्शनं बुद्धिः । विज्ञानं विमर्शः धर्माधर्मविषयं विविच्यज्ञानं वा, तेन सह वर्तत इति सविज्ञानम् 'दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिषु' इति मेदिनी । मन्त्रिणोऽपि स्वस्वामिनीं प्रति 'वत्से' इति स्ववृद्धतानुगुणमामन्त्रणं, वक्ष्यमाणभगिनीव्यपदेशानुरूपं वा ॥

अय्य तहेति तयोक्ते यौगन्धरायण उपसृत्य कञ्चुकिनं पृच्छति — **भोः किमित्यादि** । भो इति सबहुमानं सम्बोधनम् । केन निमित्तेन कृता किङ्कृता ॥

तपस्विन्निति वेषसदृशमामन्त्रणम् ॥

आत्मगतमिति । सर्वाश्रव्यत्वादात्मनि चिन्त्यमानमात्मगतमिति स्वगतमिति चोच्यते । **तपस्विन्नितीति** । गुणवान् खलु गुणवानेव, गुणवत्त्वं च तपस्सम्बन्धशंसनात् । तु किन्तु । अपरिचयात् श्रवणपरिचयाभावात् । मे मनसि । न

काञ्चुकीयः — भोः ! श्रूयताम् । एषा खलु गुरुभिरभिहितनामधेयस्यास्माकं महाराजदर्शकस्य भगिनी पद्मावती नाम । सैषा नो महाराजमातरं महादेवीमाश्रमस्थामभिगम्यानुज्ञाता तत्रभवत्या राजगृहमेव यास्यति । तद् अद्यास्मिन्नाश्रमपदे वासोऽभिप्रेतोऽस्याः । तद् भवन्तः,

तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तु तपोधनानि ।
धर्मप्रिया नृपसुता न हि धर्मपीडा-
मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥ ६ ॥

यौगन्धरायणः — (स्वगतम्) एवम् । एषा सा मगधराजपुत्री पद्मा-

श्लिष्यते सङ्गतत्वेन न भासत इत्यर्थः । श्लिष्यत इत्यात्मनेपदं कर्मवद्भावेन कथञ्चिदुपपाद्यम् । आर्षो वायं प्रयोगो भासस्य स्याद् वाल्मीकिव्यासवत् ॥

श्रूयतामित्यादि । एषा सन्निकृष्टतरा, येदानीं दृष्टिगोचरं यास्यति । गुरुभिर्महद्भिः । अभिहितनामधेयस्य उच्चारितनाम्नः, स्वस्वामिनामधेयं स्वेन साक्षादुच्चारितं मा भूदिति तस्य गुरुजनोच्चारितत्वकथनम् । **महाराजदर्शकस्ये**ति । अत्र दर्शकस्येति गुर्वभिहितनामधेयानुवादः, महाराजेति पूजार्थम् । आश्रमस्थां वार्धकोचितमुनिवृत्तिपरिग्रहेणाश्रमस्थायिनीम् । तत्रभवत्या महादेव्या । **राजगृहं** तदाख्यां मगध राजधानीम् । अभिप्रेत इष्टः ॥

उत्सारणाया निमित्तमेतावता सूचयित्वा भटकृतोत्सारणाव्यलीकपरिहारायाह — **तद्भवन्तस्तीर्थोदकानी**ति । तत् राजपुत्रीसान्निध्याद्धेतोः । भवन्तः, तपोधनानि तपोनुकूलानि द्रव्याणि । कानि तानि, तीर्थोदकानि सर्वार्थानि । समिधः अग्निकार्यार्थाः । कुसुमानि देवार्चनार्थानि । दर्भान् सर्वव्रतार्थान् । वनात्, स्वैरम् अनिवारितम् । उपनयन्तु । तपोधनानामिति पाठे ऋषीणामुपनयन्त्विति योज्यम् । एतच्च धर्मकार्यं राजकन्यायाः प्रीतिकरमित्याह — नृपसुता धर्मप्रिया धर्मः प्रियो यस्याः सा तथाभूता । धर्मपीडां धर्मोपरोधं । सा न हीच्छेत् नैवाभिलषेत् कदाचिदपि । इदं धर्मपीडानेषणम् । अस्याः कुलव्रतं वंशधर्मः ॥ ६ ॥

कञ्चुकिप्रतिपादितमर्थं पद्मावतीप्रत्यभिज्ञानुगुणं स्वगतमनुसन्धत्ते — **एवमि**ति । एवम् उत्सारणानिमित्तस्यायं प्रकार इत्यर्थः । प्रत्यभिज्ञावाक्यम् **एषा सेत्यादि** ।

वती नाम, या पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति । ततः,

प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते ।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥ ७ ॥

वासवदत्ता — (स्वगतम्) (क) राअदारिअत्ति सुणिअ भइणिआसिणेहो वि मे एत्थ सम्पज्जइ ।

(ततः प्रविशति पद्मावती सपरिवारा चेटी च ।)

चेटी — (ख) एदु एदु भट्टिदारिआ, इदं अस्समपदं पविसदु ।

(क) राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र संपद्यते ।

(ख) एत्वेतु भर्तृदारिका, इदमाश्रमपदं प्रविशतु ।

एषा उत्सरणाज्ञाप्रवर्तकत्वबुद्ध्या मया प्रद्विष्य निन्दिता । **पुष्पकभद्रादिभिः पुष्पकभद्रप्रभृतिभिः**, आदेशिकैः दैवज्ञैः, ते हि त्रैकालिकशुभाशुभोपदेशलक्षणमादेशं कुर्वन्तीति । स्वामिन **उदयनस्य** । तत इति श्लोकान्वयि ।

प्रद्वेष इति । ततः यस्मादियं पद्मावती तस्मात् । अस्यां, मे, भर्तृदाराभिलाषित्वाद् भर्तुर्दाराः भर्तृदाराः भर्तृदारत्वेनाभिलाषः भर्तृदाराभिलाषः दारशब्दस्य भावप्रधानत्वविवक्षणात्, भर्तृदाराभिलाषोऽस्त्यस्येति भर्तृदाराभिलाषी तत्त्वाद्, इयं मद्भर्तुर्दारा भूयादितीच्छावशादिति यावत् । महती गुर्वी प्रद्वेषं न्यक्कृत्योद्रिक्ता । स्वता लक्षणया स्वीयत्वप्रणय इत्यर्थः । इदानीमस्तीति शेषः । उभयविधचित्तवृत्त्युदये सामान्यन्यायमाह — प्रद्वेषो, बहुमानो वा, सङ्कल्पाद् इदमेवमित्यध्यवसायाद् । उपजायते । पूर्वमन्यादृशात् सङ्कल्पात् प्रद्वेषो जातः, इदानीमन्यादृशाद् बहुमान इति भावः ॥ ७ ॥

राअदारिअत्तीत्यादि । अत्र पद्मावत्याम् ॥

तत इति । चेटी चेति क्वचिन्न पठ्यते । तदा परिवारान्तर्भावेण चेट्यपि प्रविष्टैवेति तस्या वक्तृत्वेन निर्देशोपपत्तिः ॥

एदु इत्यादि । एत्वेतु भर्तृदारिकेति मार्गादेशनम् । प्रविशत्वित्यत्र भर्तृदारिकेत्यनुषञ्जनीयम् ॥

(ततः प्रविशत्युपविष्टा तापसी ।)

तापसी — (क) साअदं राअदारिआए ।

वासवदत्ता — (स्वगतम्) (ख) इअं सा राअदारिआ । अभिजणाणुरूवं खु से रूवं ।

पद्मावती — (ग) अय्ये ! वन्दामि ।

तापसी — (घ) चिरं जीव । पविस जादे ! पविस । तवोवणाणि णाम आदिहिजणस्स सअगेहं ।

पद्मावती — (ङ) भोदु भोदु । अय्ये ! विस्सत्थह्मि । इमिणा बहुमाणवअणेण अणुग्गहिदह्मि ।

(क) स्वागतं राजदारिकायाः ।

(ख) इयं सा राजदारिका । अभिजनानुरूपं खल्वस्या रूपम् ।

(ग) आर्ये ! वन्दे ।

(घ) चिरं जीव। प्रविश जाते ! प्रविश । तपोवनानि नामातिथिजनस्य स्वगेहम् ।

(ङ) भवतु भवतु । आर्ये ! विश्वस्तास्मि । अनेन बहुमानवचनेनानुगृहीतास्मि ।

आश्रमपदे तापस्याः सन्निधानौचित्यात् प्रवेशमाह — ततः प्रविशतीत्यादि । उपविष्टेति राजदारिकागमनेऽप्यप्रत्युत्थानं तपोगौरवोचितं तापस्या आविष्कर्त्तुम् ॥

साअदमिति । राजदारिकाया राजकुमार्याः, स्वागतं शोभनमागमनमिति प्रश्नकाकुः ॥

इयमित्यादि । सा काञ्चुकीयवर्णिता । अभिजनानुरूपं कुलसदृशम् ॥

अय्ये इत्यादि । आर्ये इति तापसीं प्रत्यभिसम्बोधनम् ॥

चिरमित्यादि । जाते ! वत्से ! इति वात्सल्यामन्त्रणम् । प्रविश आश्रमाभ्यन्तरमागच्छ । स्वगेहमित्यतिथ्युपचारसर्वस्वाविष्करणम् ॥

भोदु इत्यादि । आश्रमस्य स्वगृहनिर्विशेषत्वं यत् त्वमवात्थ, तत् तथैव

वासवदत्ता — (स्वगतम्) (क) ण हि रूवं एव्व, वाआ वि खु से महुरा ।

तापसी — (ख) भद्दे ! इमं दाव भद्दमुहस्स भइणिअं कोच्चि राआ ण वरेदि ।

चेटी — (ग) अत्थि राआ पज्जोदो णाम उज्जइणीए । सो दारअस्स कारणादो दूदसम्पादं करेदि ।

वासवदत्ता — (आत्मगतम्) (घ) भोदु भोदु । एसा अ अत्तणीआ दाणिं संवुत्ता ।

(क) न हि रूपमेव, वागपि खल्वस्या मधुरा ।

(ख) भद्रे ! इमां तावद् भद्रमुखस्य भगिनिकां कश्चिद् राजा न वरयति ।

(ग) अस्ति राजा प्रद्योतो नामोज्जयिन्याः । स दारकस्य कारणाद् दूतसम्पातं करोति ।

(घ) भवतु भवतु । एषा चात्मीयेदानीं संवृत्ता ।

भवत्विति कृतोपचाराभ्युपगमः । द्विरुक्त्या च तत्र त्वराप्रदर्शनं भूयोऽप्युपचारो न्यजनेन मा कारीति । विश्वस्ता शङ्कारहिता ॥

णहीत्यादि । रूपमेव रूपं परम् । वाचो माधुर्यं स्वरतो वर्णतोऽर्थतश्च रमणीयता ॥

भद्दे इत्यादि । भद्रे इति पद्मावतीगते प्रष्टव्ये औचित्याच्चेटीं प्रत्यभिसम्बोधनम् । भद्रमुखस्य सौम्यस्य दर्शकस्य । न वरयतीति प्रश्नकाकुः ॥

अत्थीत्यादि । दारकस्य कारणात् स्वसूनोः पद्मावतीविवाहघटनार्थमिपर्थः । दूतसम्पातं दूतसम्प्रेषणं दूतमुखेन वार्त्ताप्रेषणसम्बन्धं वा ॥

भोदु इत्यादि । स्वभ्रातृनिमित्तो दूतसम्पातो बुद्धिस्थो भवनक्रियायाः कर्ता । स्य भवनमिष्टत्वादादरेण द्विरुच्यते 'भवतु भवत्वि'ति । आत्मीयेति स्वभ्रातृवरणकणमात्रात् स्वकीयत्वारोपः ॥

तापसी—(क) अहो खु इअं आइदी इमस्स बहुमाणस्स। उभआणि राअउळाणि महत्तराणि त्ति सुणीअदि।

पद्मावती—(ख) अय्य! किं दिट्ठो मुणिजणो अत्ताणं अणुग्गहीदुं। अभिप्पेदप्पदाणेण तवस्सिजणो उवणिमन्तीअदु दाव को किं एत्थ इच्छदि त्ति।

काञ्चुकीयः—यदभिप्रेतं भवत्या। भो भो आश्रमवासिनस्तपस्विनः! शृण्वन्तु शृण्वन्तु भवन्तः। इहात्रभवती मगधराजपुत्री अनेन विस्रम्भेणोत्पादितविस्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते।

(क) अहो खल्वियमाकृतिरस्य बहुमानस्य। उभे राजकुले महत्तरे इति श्रूयते।

(ख) आर्य! किं दृष्टो मुनिजन आत्मानमनुग्रहीतुम्। अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति।

अहोति। इयं रूपतो गुणतः शीलतश्च प्रत्यक्षदृश्यमानानुभावा। आकृतिः। कन्यासंस्थानम्। अस्य प्रद्योतकुलप्रातिरूपस्य। बहुमानस्य। अहो खलु योग्यैव। उभे राजकुले प्रद्योतकुलं दर्शककुलं चेत्येते। महत्तरे राजकुलान्तरापेक्षयातिशयेन प्रशस्ते। इति श्रूयते इत्ययमर्थः प्रसिद्ध इत्यर्थः॥

अय्य किमिति। आत्मानं माम्। अनुग्रहीतुं यत्किञ्चिन्मदीयद्रव्यस्वीकरणेन कृतार्थयितुम्। मुनिजनः, दृष्टः उपलब्धः किम्। त्वयेति शेषः। अनुग्रहे कर्त्तार्थान्मुनिजनः। तस्यान्तर्भावितण्यर्थत्वे दृशिकर्तैव कर्ता। तत्रापि प्रयोज्यकर्ता मुनिजन एव। स्वयमागतार्थ्युपलम्भविषयश्चायं प्रश्नः। इदानीमभीष्टार्थदानप्रतिज्ञया तपस्विजनोपनिमन्त्रणमादिशति—**अभिप्पेदे**त्यादि। उपनिमन्त्र्यताम् उपच्छन्द्य निमन्त्र्यतां प्रवर्त्यताम्, अर्थात् प्रतिग्रहे॥

यदित्यादि। यद् भवत्या। अभिप्रेतम् इष्यमाणम्। तत् करोमीति शेषः। विस्रम्भेण संस्तवेन, उत्पादितविस्रम्भा जनितविश्वासा जनितप्रणया वा। धर्मार्थं धर्माय। अर्थेन देयद्रव्येण करणेन। उपनिमन्त्रयते उपसान्त्व्य प्रवर्तयति। अर्थप्रतिग्रहे युष्मानित्यार्थम्।

कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत् ।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ॥

यौगन्धरायणः—हन्त दृष्ट उपायः । (प्रकाशम्) भोः ! अहमर्थी ।

पद्मावती—(क) दिट्ठिआ सहळं मे तवोवणाभिगमणं ।

(क) दिष्ट्या सफलं मे तपोवनाभिगमनम् ।

उपनिमन्त्रणस्य प्रकारमाह—**कस्येति** । कस्य मुनिजनस्य । कलशेन घटेन । र्थः प्रयोजनम् । कः वासो वस्त्रम् । मृगयते अन्विष्यति, इच्छतीत्यर्थः । इयम- र्थगतविशेषजिज्ञासा । यथानिश्चितम् इदमेवं कर्तव्यमिति निश्चयानतिक्रमेण । ीक्षामध्ययनव्रतं । पारितवान् परिसमापितवान् । जनः, किं पुनः किंरूपं तद्, उत्तर- ाक्यस्थयच्छब्देनेह तच्छब्दाक्षेपात् । इच्छति । यद्, गुरोः सम्बन्धसामान्ये षष्ठी । यं दक्षिणात्वेन दातुं योग्यं । भवेत् । इयमर्थगतविशेषजिज्ञासा । अर्थ्यर्थोभयगत- शेषजिज्ञासाविष्कारपूर्वं करिष्यमाणायामीप्सितवस्तुकथनप्रार्थनायामनुरोधादरं तप- वनामुत्पादयितुं पद्मावत्यास्तेषु भक्तिं तदनुग्रहार्थित्वं च श्रावयति — धर्माभि- मप्रिया धर्मेऽभिरामोऽभिरतिर्येषां ते धर्माभिरामास्तेषां प्रिया प्रीतिविधायिनी । नृप- ा राजपुत्री पद्मावती । इह तपोवने । आत्मानुग्रहम् इच्छति, स्वदीयमानभोग्य- स्तुप्रतिग्रहलक्षणमात्मनोऽनुग्रहं तपस्विभिः क्रियमाणमभिलषतीत्यर्थः । यद् यद्व- ु । यस्य तपस्विनः । समीप्सितं सम्यगाप्तुमिष्टम् । अस्ति । तद्, वदतु, अर्थात् इति कर्तृलाभः यथा 'तस्य यदिष्टं तद्वदतु' इति प्रयोगेऽर्थात् स इति व- क्रियाकर्तृलाभस्तद्वत् । पूर्ववाक्यस्थयत्पदबलेन वा स इत्याक्षिप्यताम् । किं, क- , अद्य इदानीमेव न कालान्तरप्रतीक्षयेत्यर्थः । दीयताम् । तस्य तस्यार्थिनस्त- दिष्टं विदितमात्रं राजपुत्र्या सद्य एव दायिष्यत इति दानप्रतिज्ञोद्घोषणेयम् ॥

हन्तेत्यादि । हन्तशब्दात् प्राक् स्वगतमिति पूरणीयं, प्रकाशमित्यनन्तरोक्तेः । न्त हर्षे । स्वाभीष्टस्य वासवदत्तानिक्षेपस्य वरणावसरलाभाद्धर्षः । अर्थी याचकः ॥

दिट्ठिएत्यादि । दिष्ट्येति हर्षे । सफलं सप्रयोजनं, निस्स्पृहजनाकीर्णे तपोवने स्यचिदर्थिनो यदृच्छया लाभात् ॥

तापसी—(क) संतुट्ठतपस्सिजणं इदं अस्समपदं । आअन्तुएण इमिणा होदव्वं ।

काञ्चुकीयः— भोः ! किं क्रियताम् ।

यौगन्धरायणः— इयं मे स्वसा । प्रोषितभर्तृकामिमामिच्छाम्यत्रभवत्या कञ्चित् कालं परिपाल्यमानाम् । कुतः,

कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रै-
नाहं काषायं वृत्तिहेतोः प्रपन्नः ।
धीरा कन्येयं दृष्टधर्मप्रचारा conversant with religion
शक्ता चारित्रं रक्षितुं मे भगिन्याः ॥ ९ ॥

(क) सन्तुष्टतपस्विजनमिदमाश्रमपदम् । आगन्तुकेनानेन भवितव्यम् ।

सन्तुट्ठेत्यादि । सन्तुष्टतपस्विजनं सन्तुष्टाः अयाचितसुलभवन्यपदार्थोपयोगसन्तृप्ततया निःस्पृहाः तपस्विजना यस्मिंस्तत् तथाभूतम् । आगन्तुकेन विदेशात् तदात्वागतेन, न त्वेतदाश्रमपदवासिना । अनेन सन्निहितेन जनेन अहमर्थीत्यर्थित्वमाविष्कृतवता ॥

भो इति । किं क्रियतां, किं तद् भवतोऽर्थितं यत् पद्मावत्या साधनीयमित्यर्थः ॥

इयमित्यादि । प्रोषितभर्तृकां प्रोषितो देशान्तरगतो भर्ता यस्यास्तां तथाभूताम् । इमाम्, इहान्वादेशेऽप्येनादेशाभावः । अत्रभवत्या पद्मावत्या कञ्चित् कालं परिपालनक्रियात्यन्तसंयोगे द्वितीया । परिपाल्यमानां रक्ष्यमाणाम् । इच्छामि, नान्यत् किञ्चिदिच्छामीत्यर्थः । तत्र कारणं वक्तुं तज्जिज्ञासामुत्थापयति — **कुत** इति ।

कारणमाह—**कार्यमिति** । अर्थैर्हिरण्यादिभिः । कार्यं नैव प्रयोजनं नास्त्येव । अर्थान्मम । भोगैरपि भोग्यवस्तुभिः कलत्रादिभिरपि । न कार्यं । वस्त्रैर्न कार्यम् । अहं काषायं कषायेण रक्तं वस्त्रं लक्षणया पारिव्राज्यमित्यर्थः । वृत्तिहेतोः जीविकार्थे । न प्रपन्नः न परिगृहीतवान् । अतोऽर्थाद्यनिच्छेति भावः । धीरा विदुषी । दृष्टः धर्मप्रचारः धर्मस्य प्रकर्षेण चरणं यया यस्यां वा सा तथाभूता । इयं कन्या पद्मावती । मे भगिन्याः, चारित्रं शीलं । रक्षितुं शक्ता समर्था । अतो भगिनीपरिपालनाभ्यर्थना,

वासवदत्ता—(आत्मगतम्) (क) हं । इह मं णिक्खिविदुकामो अय्य-योगन्धरायणो । होदु, अविआरिअ कमं ण करिस्सादि ।

काञ्चुकीयः—भवति! महती खल्वस्य व्यपाश्रयणा । कथं प्रतिजानीमः । कुतः,

सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ॥ १० ॥

पद्मावती — (ख) अय्य ! पढमं उग्घोसिअ को किं इच्छदि त्ति अजुत्तं दाणिं विआरिदुं । जं एसो भणादि, तं अणुचिट्ठदु अय्यो ।

(क) हम् । इह मां निक्षेप्तुकाम आर्ययौगन्धरायणः । भवतु, अविचार्य क्रमं न करिष्यति ।

(ख) आर्य! प्रथममुद्घोष्य कः किमिच्छतीत्ययुक्तमिदानीं विचारयितुम् । यदेष भणति, तदनुतिष्ठत्वार्यः ।

अन्यथा सापि नाकरिष्यतेतिभावः । अत्र धीरा दृष्टधर्मप्रचारेति पदार्थाभ्यां चारित्ररक्षणशक्तत्वसमर्थनात् काव्यलिङ्गम् ॥ ९ ॥

हमित्यादि । हमित्यसम्मतौ । अत्र पद्मावत्याम् । निक्षेतुकामः निक्षेतुं न्यासत्वेनार्पयितुं कामो यस्य सः । क्रमं न्यायम् ॥

भवतीति । अस्य परिव्राजकस्य । व्यपाश्रयणा आश्रयणं प्रार्थनेति यावत् । व्यपाङ्पूर्वाच्छ्रिञ्धातोर्बाहुलकाद् भावे युच् । महती गुर्वी खलु, महत्त्वं दुस्साधत्वेन वक्ष्यमाणेन । कथं प्रतिजानीमः तां साधयाम इत्यङ्गीकुर्मः ॥

सुखमिति । अर्थः धनं । सुखमनायासं यथा भवति तथा । दातुं, भवेत् शक्य इति शेषः, गम्यमानशकिक्रियासम्बन्धापेक्षया 'शकधृषे—'(३-४-६५)त्यादिसूत्रेण तुमुन् । अथवा दातुं भवेदिति अस्त्यर्थे भूधातावुपपदे तेनैव तुमुन् । अर्थस्य सुखदानविषयत्वसम्भवः सम्भावित इति तदर्थः । एवमुत्तरत्रापि । प्राणाः सुखं दातुं भवेयुः शक्याः, इह वचनविपरिणामः । तपः सुखं दातुं भवेच्छक्यम् । किन्तु न्यासस्य निक्षेपस्य । रक्षणं, दुःखं दुस्साधम् । अर्थप्राणतपःप्रभृतिदानादपि दुष्करतरं न्यासरक्षणमिति भावः ॥ १० ॥

काञ्चुकीयः — अनुरूपमेतद् भवत्याभिहितम् ।

चेटी — (क) चिरं जीवदु भट्टिदारिआ एवं सच्चवादिणी ।

तापसी — (ख) चिरं जीवदु भद्दे ! ।

काञ्चुकीयः — भवति ! तथा । (उपगम्य) भोः ! अभ्युपगतमत्रभवतो भगिन्याः परिपालनमत्रभवत्या ।

यौगन्धरायणः — अनुगृहीतोऽस्मि तत्रभवत्या । वत्से ! उपसर्पात्रभवतीम् ।

वासवदत्ता — (आत्मगतम्) (ग) का गई । एसा गच्छामि मन्दभाआ ।

(क) चिरं जीवतु भर्तृदारिकैवं सत्यवादिनी ।

(ख) चिरं जीवतु भद्रे ! ।

(ग) का गतिः । एषा गच्छामि मन्दभागा ।

अध्येत्यादि । विचारयितुम् अर्थिन इष्टमस्माभिः साधयितुं शक्यं न वेति चिन्तयितुम् ॥

अनुरूपमित्यादि । अनुरूपं विद्याप्रभुभावसदृशम् । एतद् यथाप्रतिश्रुतानुष्ठानम् ॥

चिरमित्यादि । एवं सत्यवादिनी इत्थंसत्यवदनशीला ॥

स्थाने चेट्या प्रयुक्तामाशिषमनुमोदमानान्वाशास्ते **चिरमित्यादि** । भद्रे ! इति चेटीं प्रति सम्बोधनम् ॥

भवतीति । तथा, यथा भवत्या आदेशस्तथानुतिष्ठामीत्यर्थः । उपगम्य यौगन्धरायणसमीपमागत्य । अभ्युपगतमङ्गीकृतम् । अत्रभवतः पूज्यस्य ते ॥

अनुगृहीत इत्यादि । अत्रभवतीं पद्मावतीम् ॥

प्रियतमवियोगदशायामस्यां धैर्यालम्बनममात्ययौगन्धरायणसान्निध्यमपि त्यक्तव्यमिदानीं संवृत्तमिति विषीदन्ती चिन्तयति — **केत्यादि** । का गतिः, अनन्तरकार्यघटनाय यौगन्धरायणेनान्यत्र गन्तव्ये मम पद्मावतीहस्तप्राप्तिमन्तरेण गतिर्नास्तीत्यर्थः । मन्दोऽल्पो भागो भाग्यं यस्याः सा मन्दभागा ॥

पद्मावती — (क) भोदु भोदु । अत्तणीआ दाणिं संवुत्ता ।

तापसी — (ख) जा ईदिसी से आइदी, इयं वि राअदारिअत्ति तक्केमि ।

चेटी — (ग) सुट्ठु अय्या भणादि । अहं वि अणुहूदसुहत्ति पेक्खामि ।

यौगन्धरायणः — (आत्मगतम्) हन्त भोः! अर्धमवसितं भारस्य । यथा मन्त्रिभिः सह समर्थितं, तथा परिणमति । ततः प्रतिष्ठिते स्वा-

---

(क) भवतु भवतु । आत्मीयेदानीं संवृत्ता ।

(ख) या ईदृश्यस्या आकृतिः, इयमपि राजदारिकेति तर्कयामि ।

(ग) सुष्ठु आर्या भणति । अहमप्यनुभूतसुखेति पश्यामि ।

भोदु इत्यादि । भवतु भवत्विति वासवदत्तोपसर्पणाभ्युपगमः । आदरेण द्विरुक्तिः । संवृत्ता सम्पन्ना । संवृतुक्रियायाः कर्त्री प्रकृतार्थिभगिनी ॥

जेति । या, अस्या अर्थिभगिन्याः । आकृतिः, ईदृशी दृश्यमानोदाररूपानुभावा भवति । इयमपि राजदारिकेति तर्कयामि, अपिशब्दः पद्मावतीसमुच्चयाभिप्रायः ॥

चेटी तापसीतर्कमनुमोदमाना तत्संवादिनं स्वतर्कमाह — सुट्ठु इत्यादि । अनुभूतसुखेत्यस्य विशेष्यम् इयमिति गम्यम् । इदमर्थश्चार्थिभगिनी सन्निहिता । पश्यामि तर्कयामि, प्रेक्षे इति वा संस्कृतम् ॥

हन्तेति । हन्त भो इत्याश्वासजन्यहर्षद्योतनम् । आश्वासे हेतुमाह — भारस्य गुरुणः कार्यस्य स्वनिर्वाह्यस्य । अर्धं समांशः विश्वासयोग्ये स्थाने वासवदत्ताया न्यासीकरणरूपः । अवसितं निष्पन्नं, स्वनिष्पाद्यत्वेनावशिष्टानां पद्मावतीपरिणयघटनानुकूलसंविधानप्रभृतीनां वासवदत्तोदयनपुनस्समागमघटनपर्यन्तानां कार्यांशानां बहूनां समुदायोऽपरमर्धमिति मत्वा तदपेक्षयार्धत्वं निष्पन्नस्योक्तम् । यथा येन प्रकारेण क्वचिद् विश्वसनीये जने न्यासीकरणलक्षणेन । मन्त्रिभिः रुमण्वदादिभिः सह समर्थितं सम्प्रधारितं कर्तव्यतया निर्णीतमिति यावत् । वासवदत्तापरिपालनं मयेति शेषः । तथा तेन प्रकारेण । परिणमति तत् फलतीत्यर्थः । क्वचिद्विश्वसनीये जने न्यासीकरणेन वासवदत्तायाः परिपालनं निर्वाह्यमिति पूर्वं विमृश्य निर्णीत एवार्थ इदानीं दैवाद् इहैवं घटित इत्यभिप्रायः । वासवदत्तायाः पद्मावत्यां न्यासी-

मिनि तत्रभवतीमुपनयतो मे इहात्रभवती मगधराजपुत्री विश्वासस्थानं भविष्यति । कुतः,

पद्मावती नरपतेर्महिषी भवित्री
दृष्टा विपत्तिरथ यैः प्रथमं प्रदिष्टा ।
तत्प्रत्ययात् कृतमिदं न हि सिद्धवाक्या-
न्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि ॥ ११ ॥

(ततः प्रविशति ब्रह्मचारी ।)

ब्रह्मचारी — (ऊर्ध्वमवलोक्य) स्थितो मध्याह्नः । दृढमस्मि परिश्रा-

---

करणेऽस्मिन् गुणमाह — **तत** इति । ततः पश्चात् । स्वामिनि उदयने । प्रतिष्ठिते शत्रुहृतराज्यप्रतिलम्भरूपां प्रतिष्ठां प्राप्ते सति । तत्रभवतीं वासवदत्ताम् । उपनयतः स्वामिसमीपं प्रापयतः । एतेन वासवदत्ताया आस्वामिप्रतिष्ठाप्राप्तेर्न्यासत्वानुवृत्तिः सूचिता । मे, इह वासवदत्तायां विषये तच्छीलशुद्धिनिवेदनविषय इति यावत् । अत्रभवती मगधराजपुत्री, विश्वासस्थानं विश्वासहेतुः साक्षिणीत्यर्थः । भविष्यति । विश्वासस्थानत्वे कारणं पृच्छति — **कुत** इति ।

कारणमाह — **पद्मेति** । पद्मावती, नरपतेः उदयनस्य । महिषी कृताभिषेका पत्नी । भवित्री भविता कालान्तरे । अतस्तदा तया साक्ष्यमुच्यमानमन्यसाक्ष्याद् विश्वसनीयतरं भविष्यतीति भावः । उदयनस्य पद्मावती पत्नी भविष्यतीति कः प्रत्ययः, येन तपस्विजनमुपेक्ष्य पद्मावत्यां वासवदत्ता न्यासत्वेन निवेशितेत्याकाङ्क्षायामाह — यैः आदेशिकैः । प्रथमं पूर्वम् । प्रदिष्टा भावित्वेनादिष्टा । विपत्तिः स्वामिराज्यापहाररूपा विपत् । अथ पश्चात् । दृष्टा अनुभूता, अस्माभिरिति शेषः । तत्प्रत्ययात् तेषु आदेशिकेषु प्रत्ययाद् यथा स्वामिराज्यापहारविपत्तिस्तैः पूर्वमादिष्टा पश्चात् फलिता तथा पद्मावतीपरिणयरूपा स्वामिवृद्धिरपि पूर्वमादिष्टा कालान्तरेऽवश्यं फलिष्यतीति विश्वासात् । इदं बुद्धिस्थं पद्मावत्यां वासवदत्ताया न्यासत्वेन निवेशनम् । कृतम् । तत्प्रत्ययस्य न्याय्यत्वं समर्थयते — विधिः भवितव्यता । सुपरीक्षितानि सम्यक् परीक्ष्यार्थसंवादित्वेन निश्चितानि । सिद्धवाक्यानि सिद्धानां त्रैकाल्यज्ञानवतां वाक्यानि । उत्क्रम्य, न गच्छति, किन्तु सर्वात्मनानुसरत्येवेत्यर्थः ॥ ११ ॥

उक्तेन पद्मावत्युदयनयोर्विवाहस्यावश्यम्भावित्वेन तद्घटनोचितसामग्रीष्वपेक्ष्यमाणासु पद्मावत्या उदयनेऽभिलापस्तावन्मुख्या सामग्री । स च स्वोत्पत्तये

न्तः । अथ कस्मिन् प्रदेशे विश्रमयिष्ये । (परिक्रम्य) भवतु, दृष्टम् । अभितस्तपोवनेन भवितव्यम् । तथाहि —

विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया-
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः ।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः ॥ १२ ॥

उदयनगतगुणवत्त्वनूतनपत्नीसापेक्षत्वादिज्ञानमपेक्षते । अतः पद्मावत्यास्तथाविधज्ञानोत्पादानुकूलम् उदयनवृत्तान्तं प्रियवियोगदुःखितवासवदत्तासमाश्वासनादिरूपप्रयोजनान्तरघटनक्षमं श्रावयितव्यत्वेन प्रसक्तं श्रावयितुं तदाख्यातुर्ब्रह्मचारिणः प्रवेशमाह — ततः प्रविशतीत्यादि ।

स्थित इत्यादि । विश्रमयिष्ये आत्मानमिति शेषः । भवतु इहैव विश्रमणमस्त्वित्यर्थः । दृष्टमालोकितम् । इदं स्थलमित्यर्थलभ्यम् । अभितः समन्तात् । तपोवनेन भवितव्यं दृष्टमिदं स्थलं तपोवनं भवितुमर्हतीत्यर्थः ।

विस्रब्धमिति । देशागतप्रत्ययाः देशे देशविषये आगतः प्रत्ययो विश्वासो येषां ते तथाभूताः । अत एव अचकिताः आगन्तुकसन्निधावपि निर्भयाः । विस्रब्धं देशे देशचारिजने च प्रणययुक्तं यथा भवति तथा । चरन्ति अत्रेति शेषः । एवमुत्तरेष्वपि वाक्येषु । सर्वे वृक्षाः । पुष्पफलैः समृद्धविटपाः परिपूर्णशाखाः । अथापि दयारक्षिताः दयया पुष्पफलानुपपीडया रक्षिताः सन्ति । एतेन तपोवनवासिनामलोभ उक्तः । अथवा दयारक्षिताः सेचनादिना भङ्गच्छेदाद्यकरणेन च पालिताः, अत एव पुष्पफलैः समृद्धविटपा इति योजना । कपिलानि कपिलवर्णानि । कपिलानाम्* अतिपावनत्वेनाश्रमार्हत्वाद् विशिष्योक्तिः । गोकुलधनानि प्रयत्नरक्ष्यतया धनतुल्यानि गोकदम्बकानि । भूयिष्ठं बहुतरं सन्ति । दिशः परिसरप्रदेशाः । अक्षेत्रवत्यः क्षेत्राणि केदाराः, यानि ग्रामीणाः कृष्यर्थमुपासते, तद्वत्यो न भवन्तीत्यक्षेत्रवत्यः । अतः इदं दृश्यमानं तपोवनम् । निस्सन्दिग्धं तपोवनत्वे सन्देहो नास्तीत्यर्थः । हि अस्मात् कारणात् । अयं दृश्यमानः । धूमः, बह्वाश्रयः बहव आश्रया उद्गमस्थानानि अर्थादग्निशरणानि आश्रमा वा यस्य स तथाभूतः भवति ।

---

*"अग्निचित् कपिला सत्री राजा भिक्षुर्महोदधिः । दृष्टमात्राः पुनन्त्येते" इति स्मृतिः ।

यावत् प्रविशामि । (प्रविश्य) अये आश्रमविरुद्धः खल्वेष जनः । (अन्यतो विलोक्य) अथवा तपस्विजनोऽप्यत्र । निर्दोषमुपसर्पणम् । अये स्त्रीजनः ।

काञ्चुकीयः—स्वैरं स्वैरं प्रविशतु भवान् । सर्वजनसाधारणमाश्रमपदं नाम ।

वासवदत्ता—हं ।

पद्मावती—(क) अम्मो परपुरुसदंसणं परिहरदि अय्या । भोदु, सुपरिवाळणीओ खु मण्णासो ।

काञ्चुकीयः—भोः ! पूर्वं प्रविष्टाः स्मः । प्रतिगृह्यतामतिथिसत्कारः ।

(क) अम्मो परपुरुषदर्शनं परिहरत्यार्या । भवतु, सुपरिपालनीयः खलु मन्न्यासः ।

अस्य तपोवनत्वादेवात्र बहुभ्य आश्रयेभ्यो माध्यन्दिनाग्निकार्यवशाद् धूमोऽयमुद्गच्छतीति भावः । अपरा व्याख्या—एवमुक्तैर्हेतुभिस्तपोवनत्वनिश्चयं प्रतिपन्न एव वक्ता तदुत्तरक्षणोपलब्धं हेत्वन्तरमपि निश्चयदार्ढ्याय निर्दिशति — हि यस्मात् । अयम् इदानीं मद्दृष्टिगोचरं गच्छन् । धूमः, बह्वाश्रयः भवति ॥ १२ ॥

यावत् प्रविशामि प्रवेक्ष्यामि, पुरस्स्थितमाश्रमपदं कर्म । प्रविश्य प्रवेष्टुमुपक्रम्य । विलोक्येत्यपि पूरणीयम् । अये इति प्रवेशं प्रति शङ्कोक्तिः । आश्रमविरुद्धः नागरिकः । एष जनः काञ्चुकीयः । तपस्विजनोऽपि, न केवलं नागरिकः । तपस्विजनस्तापसी परिव्राजकश्च । तपस्विजनसान्निध्यादुपसर्पणमदुष्टमिति मन्यमान एव पद्मावत्यादीन् स्त्रीजनान् दृष्ट्वा पुनः शङ्कते — अये स्त्रीजन इति ॥

स्वैरमित्यादि । स्वैरमशङ्कितम् ॥

स्वैरप्रवेशाभ्यनुज्ञानेन निश्शङ्कं प्रविष्टे ब्रह्मचारिणि तद्दर्शनं परिजिहीर्षन्त्या वासवदत्तायाः शङ्काध्वनिः — हमिति । हंशब्दोऽसम्मतौ ॥

अम्मो इत्यादि । अम्मो इति सम्भ्रमे । स च वासवदत्तां प्रति परपुरुषदर्शनपरिहारसौकर्यसद्यस्संविधित्साजन्यः । आश्चर्ये वायं निपातः । तच्च शीलपालनविषयतच्छ्रद्धाप्रकर्षदर्शनजन्यम् ॥

ब्रह्मचारी—(आचम्य) भवतु भवतु । निवृत्तपरिश्रमोऽस्मि ।

यौगन्धरायणः—भोः ! कुत आगम्यते, क्व गन्तव्यं, क्वाधिष्ठानमार्यस्य ।

ब्रह्मचारी—भोः ! श्रूयताम् । राजगृहतोऽस्मि । श्रुतिविशेषणार्थं वत्सभूमौ लावाणकं नाम ग्रामस्तत्रोषितवानस्मि ।

वासवदत्ता—(आत्मगतम्) (क) हा ळावाणअं णाम । ळावाणअसंकित्तणेण पुणो णवीकिदो विअ मे सन्दावो ।

यौगन्धरायणः—अथ परिसमाप्ता विद्या ।

ब्रह्मचारी—न खलु तावत् ।

(क) हा लावाणकं नाम । लावाणकसङ्कीर्तनेन पुनर्नवीकृत इव मे सन्तापः ।

भोः पूर्वमिति । पूर्वं प्रविष्टाः स्मः, अत आश्रमं प्रत्युत्तरकालागतभवदपेक्षयाभ्यधिकास्माकं स्वतेति भावः । अस्तु किं तत इति चेदाह — **अतिथिसत्कारः** अस्माभिः क्रियमाणातिथिपूजा । प्रतिगृह्यतां भवता स्वीक्रियताम् ॥

आचम्येत्यादि । आचम्य काञ्चुकीयकृतमुपचारमाचमनीयान्तं स्वीकृत्येत्यर्थः । भवतु भवतु तिष्ठतु तिष्ठतु, भूय उपचारो मास्त्वित्यर्थः ॥

भो इत्यादि । अधिष्ठानं वासः ॥

भोः श्रूयतामित्यादि । राजगृहतः आगच्छामीत्यार्थम् । अस्मि अहम् । श्रुतिविशेषणार्थं श्रुतेर्वेदस्याधीतस्य विशेषणमर्थश्रवणादिनोपस्करणं तदर्थं । वत्सभूमौ लावाणकं नाम यो ग्रामः, तत्पदेन यत्पदाक्षेपात् । तत्र ग्रामे । उषितवानस्मि मम वासः पूर्वमासीत् , नेदानीमस्तीत्यर्थः ॥

हेत्यादि । हा कष्टम् । लावाणकसङ्कीर्तनेन लावाणकनामधेयोच्चारणेन । सन्तापः प्रियविश्लेषाज्ञातवासाद्यध्यवसायकालिकं दुःखम् ॥

विद्यापरिसमाप्तेः प्राक् तद्वासत्यागायोगात् पृच्छति — **अथेत्यादि** । प्रश्नेऽथशब्दः ॥

नखलु तावदिति । नैव परिसमाप्ता विद्येत्यर्थः ॥

यौगन्धरायणः—यद्यनवसिता विद्या, किमागमनप्रयोजनम् ।

ब्रह्मचारी—तत्र खल्वतिदारुणं व्यसनं संवृत्तम् ।

यौगन्धरायणः—कथमिव ।

ब्रह्मचारी—तत्रोदयनो नाम राजा प्रतिवसति ।

यौगन्धरायणः—श्रूयते तत्रभवानुदयनः । किं सः ।

ब्रह्मचारी—तस्यावन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढमभिप्रेता किल ।

यौगन्धरायणः—भवितव्यम् । ततस्ततः ।

ब्रह्मचारी—ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा ।

वासवदत्ता—(आत्मगतम्) (क) अलिअं अलिअं खु एदं । जीवामि मन्दभाआ ।

(क) अलीकमलीकं खल्वेतत् । जीवामि मन्दभागा ।

यदीत्यादि । अनवसिता अपरिसमाप्ता । आगमनप्रयोजनम् आगमनस्य लावाणकवासत्यागस्य प्रयोजनं कारणमित्यर्थः, तद्ग्रामत्यागेनागमनस्य फलं वा ॥

तत्रेति । अतिदारुणमत्यन्तासह्यम् । व्यसनं दुःखम् । संवृत्तं जातम् ॥

कथमिवेति । व्यसनप्रकारः कथ्यतामित्यर्थः ॥

तत्रेत्यादि । तत्र लावाणके ॥

श्रूयत इत्यादि । किं स इति । स उदयनः । किं कर्म, अकार्षीत् करोति करिष्यति वेति क्रियासामान्याध्याहारः । उदयनसंबद्धं किं वृत्तमिति प्रश्नार्थः ॥

तस्येत्यादि । दृढम् अभिप्रेता अत्यर्थमिष्टा । किलेति वार्त्तायाम् ॥

भवितव्यमिति । भवितव्यं तथा भवितुं युक्तम् । ततस्तत इति शेषश्रवणत्वरया द्विर्वचनम् ॥

तत इत्यादि । मृगयानिष्क्रान्ते मृगयया हेतुना निष्क्रान्ते सति ॥

अलिअमित्यादि । अलीकं मिथ्या । दार्ढ्यार्थं द्विरुक्तम् ॥

यौगन्धरायणः —— ततस्ततः ।

ब्रह्मचारी — ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नाम सचिवस्तस्मिन्नेवाग्नौ पतितः ।

यौगन्धरायणः —— सत्यं पतित इति । ततस्ततः ।

ब्रह्मचारी —— ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽमात्यैर्महता यत्नेन वारितः ।

वासवदत्ता —— (आत्मगतम्) (क) जाणामि जाणामि अय्यउत्तस्स मइ साणुक्कोसत्तणं ।

यौगन्धरायणः —— ततस्ततः ।

ब्रह्मचारी — ततस्तस्याः शरीरोपभुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य राजा मोहमुपगतः ।

(क) जानामि जानाम्यार्यपुत्रस्य मयि सानुक्रोशत्वम् ।

ततस्तत इति । पुनः शेषकथनत्वरणम् ॥

तत इत्यादि । तां वासवदत्ताम् । अभ्यवपत्तुकामः अभ्यवपत्तुम् अग्निदाहव्यसनाद् रक्षितुं कामो यस्य स तथाभूतः । "व्यसनसाहाय्यमभ्यवपत्तिः" (कौटिलीयार्थशा० २-१०-२८) इति कौटिल्यः ॥

सत्यमित्यादि । अत्र प्रश्नकाकुः । पतित इति किं सत्यमित्यर्थः ॥

तत इत्यादि । प्रतिनिवृत्तः मृगयायाः प्रत्यागतः । तयोः वासवदत्तायौगन्धरायणयोः ॥

जाणामीत्यादि । सानुक्रोशत्वम् अनुक्रोशः अनुकम्पा, तेन सह वर्तत इति सानुक्रोशः, तत्त्वम् ॥

ततस्तत इति । पुनश्शेषकथनत्वरणम् ॥

तत इत्यादि । शरीरोपभुक्तानि देहोपयुक्तानि । दग्धशेषाणि दग्धान्येवैकदेशे शेषाण्येकदेशान्तरे दाहाभावेनावशिष्टानि । अथवा दग्धानि दाहनाशितविशेषा-

सर्वे — हा ।

वासवदत्ता — (स्वगतम्) (क) सकामो दाणिं अय्यजोअन्धराअणो होदु ।

चेटी — (ख) भट्टिदारिए ! रोदिदि खु इअं अय्या ।

पद्मावती — (ग) साणुक्कोसाए होदव्वं ।

यौगन्धरायणः —अथकिमथकिम् । प्रकृत्या सानुक्रोशा मे भगिनी। ततस्ततः ।

(क) सकाम इदानीमार्ययौगन्धरायणो भवतु । get what he desires / get him now

(ख) भर्तृदारिके ! रोदिति खल्वियमार्या ।

(ग) सानुक्रोशया भवितव्यम् ।

काराणि शेषाणि प्रकृतिभूतसुवर्णाद्याकारेणावशिष्टानीत्यर्थः । परिष्वज्य आश्लिष्य । क्वचिदस्य द्विरुक्तिर्दृश्यते । मोहं मूर्छाम् ॥

हेति । सर्वेषां शोकाविष्करणम् ॥

सकाम इत्यादि । सकामः समृद्धमनोरथः समृद्धकामितार्थो वा । सहशब्दस्य समृद्ध्यर्थस्य 'तेन सहे' (२-२०-२८)ति तुल्ययोगवचनप्रायिकत्वाद् बहुव्रीहिः । यद्यपि राजमोहानर्थो यौगन्धरायणस्य न कामितः, तथापि यौगन्धरायणप्रयुक्तया वासवदत्तापनयनीत्या स उपनत इत्येतावता तत्र कामितत्वारोपो यौगन्धरायणोपालम्भार्थः ॥

प्रियमोहश्रवणजनितं दुःखमन्तर्नियन्त्रयितुमपारयन्त्या वासवदत्ताया विप्रलम्भानुभावभूतमश्रुविमोचनं दृष्ट्वा चेटी ब्रवीति — **भट्टिदारिए** इत्यादि । अत्र रोदनकारणस्य विमर्शनीयत्वध्वननम् ॥

साणुक्कोसाए इत्यादि । सानुक्रोशया अनुक्रोशः परदुःखदुःखित्वं तद्वत्या । अनयेत्यार्थम् । परदुःखदुःखिन्यो हि स्त्रियः परजनस्यात्यन्तापरिदृष्टस्यापि विपदि यदृच्छयोपश्रुतायां शोकावेशाद् रुदत्यो लोके दृश्यन्ते; तादृशमेवेदमार्याया रोदनं स्यादिति नात्र किञ्चित् कारणं विमर्शनीयमस्तीत्यभिप्रायः ॥

अथकिमित्यादि । यत् पद्मावत्या सम्भावितं सानुक्रोशत्वरूपं वासवदत्ताया

ब्रह्मचारी — ततः शनैः शनैः प्रतिलब्धसंज्ञः संवृत्तः ।

पद्मावती — (क) दिट्ठिआ धरइ । मोहं गदो त्ति सुणिअ सुण्णं विअ मे हिअअं ।

यौगन्धरायणः — ततस्ततः ।

ब्रह्मचारी — ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय हा वासवदत्ते ! हा अवन्तिराजपुत्रि ! हा प्रिये ! हा प्रियशिष्ये ! इति किमपि किमपि बहु प्रलपितवान् । किं बहुना,

नैवेदानीं तादृशाश्चक्रवाका
नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः ।
धन्या सा स्त्री यां तथा वेत्ति भर्ता
भर्तृस्नेहात् सा हि दग्धाप्यदग्धा ॥ १३ ॥

(क) दिष्ट्या ध्रियते । मोहं गत इति श्रुत्वा शून्यमिव मे हृदयम् ।

रोदनस्य कारणं, तदनेन वाक्येन द्रढयति उदयनबन्धुत्वरूपकारणान्तरशङ्का लेशतोऽपि मा भूदिति ॥

तत इत्यादि । शनैश्शनैरिति संज्ञाप्रतिलम्भे चिरकालापेक्षोक्ता । तेन तं प्रति दृढा प्रत्याशा तदनुजीविनां पूर्वं नासीदिति ध्वन्यते ॥

दिट्ठिआ इत्यादि । ध्रियते जीवति । 'धृङ् अवस्थाने' । धरतीति वा संस्कृतम्, आत्मानमिति शेषः, प्राणानिति वा ॥

ततस्तत इति पुनश्शेषकथनाय चोदित आह — **ततः स** इत्यादि । महीतलपरिसर्पणपांसुपाटलशरीरः महीतले परिसर्पणेन परिलुठनेन संलग्ना ये पांसवः, तैः पाटलमीषद्रक्तं शरीरं यस्य स तथाभूतः । किं बहुना बहुना भाषितेन किं फलम्, प्रियाविरहदुःखम् उदयनस्य संक्षेपतो निवेदयामीत्यर्थः ।

नैवेति । इदानीम् उदयनदुःखावस्थायां चिन्त्यमानायामित्यर्थः । चक्रवाकाः प्रियाविरहदुःखासहिष्णुषु मूर्धाभिषिक्ततया सुप्रसिद्धाः पक्षिविशेषाः । तादृशा नैव यादृश उदयनस्तादृशा न भवन्त्येव । उदयनस्य यावती विरहदुःखमात्रा, ततो हीनैव सा चक्रवाकाणामिति भावः । स्त्रीविशेषैः कुलशीलविद्यारूपप्रेमादिगुणजात-

यौगन्धरायणः — अथ भोः ! तं तु पर्यवस्थापयितुं न कश्चिद् यत्नवानमात्यः ।

ब्रह्मचारी — अस्ति रुमण्वान्नामामात्यो दृढं प्रयत्नवांस्तत्रभवन्तं पर्यवस्थापयितुम् । स हि,

अनाहारे तुल्यः प्रततरुदितक्षामवदनः
शरीरे संस्कारं नृपतिसमदुःखं परिवहन् ।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः ॥ १४ ॥

न्यकृतस्त्रीसामान्याभिः इन्दुमतीसीतादिभिरितिहासप्रख्याताभिः स्त्रीव्यक्तिभिः । वियुक्ताः, अन्येऽपि अजरामप्रभृतय इतरेऽपि । तादृशा नैव यादृश उदयनः । प्रियाविरहदुःखसंवेदनविषये सर्वांश्चेतनान् उदयनोऽतिशेत इति भावः । इयञ्चास्य वासवदत्तां प्रति दुःखसंवेदनं तस्यां स्नेहेन निरतिशयेन जनितमिति तस्यास्तथाविधभर्तृस्नेहभाजनीभावं स्मरंस्ताम् अभिनन्दति — भर्ता उदयनः । यां, तथा तेन प्रकारेण, तथाविधस्वस्नेहार्हत्वेनेति यावत् । वेत्ति अवगच्छति । सा वासवदत्ताख्या स्त्री । धन्या पुण्यवती अर्थात् स्त्रीषु मध्ये । एतावताभिनन्दनेनापरितुष्यन् भर्तृस्नेहानुमितलोकोत्तरतद्गुणपक्षपाताद् भूयोऽपि तां श्लाघते — सा वासवदत्ता । दग्धापि, भर्तृस्नेहात्, अदग्धा हि दाहमप्राप्तैव भर्तृस्नेहसमर्पितेन शरीरेण जीवत्येवेत्यभिप्रायः ॥ १३ ॥

अथेत्यादि । अथभो इति प्रश्ने । पर्यवस्थापयितुं विकृतिपरिहारेण प्रकृतावस्थापयितुम् ॥

अस्तीत्यादि । प्रयत्नवान् प्रकृष्टा बहवो यत्ना अस्येति प्रयत्नशब्दाद् भूम्नि मतुप् । स हीति श्लोकान्वयि ।

अनाहार इति । स हि रुमण्वान् । दिवा वा रात्रौ वा दिवा च रात्रौ च, समुच्चये वाशब्दः । यत्नैः, नरपतिं, परिचरति शुश्रूषते । स कथम्भूतः अनाहारे आहाराग्रहणे । तुल्यः समानो राज्ञा, तत्र राज्ञ आहाराग्रहणे निमित्तं पत्नीशोकः, अपरस्य राजगतपत्नीशोकजः शोकः । प्रततरुदितक्षामवदनः प्रततेन सन्ततेन रुदितेन क्षामं कृशं वदनं यस्य स तथाभूतः, सततरुदितेति पाठे सततेत्यव्ययम् । शरीरे संस्कारं स्नानादिरूपं । नृपतिसमदुःखं नृपतेः समं दुःखम् अरुचिनिमित्तः श्रमो यस्मिन् कर्मणि तद् यथा भवति तथा । इदं संस्कारविशेषणं वा । परिवहन्

वासवदत्ता — (स्वगतम्) (क) दिट्ठिआ सुणिक्खित्तो दाणीं अय्यउत्तो ।

यौगन्धरायणः — (आत्मगतम्) अहो महद्भारमुद्वहति रुमण्वान् । कुतः,

सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः ।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः ॥ १५ ॥

(प्रकाशम्) अथ भोः! पर्यवस्थापित इदानीं स राजा ।

ब्रह्मचारी — तदिदानीं न जाने । इह तया सह हसितम्, इह

(क) दिष्ट्या सुनिक्षिप्त इदानीमार्यपुत्रः ।

आवहन्, अनेन नृपतिवदस्य देहसंस्कारानास्थोक्ता । अस्य नृपानुवृत्तेः परां काष्ठामाह—नृपः, सद्यः प्राणान् यदि त्यजति दुःखासहनतया, तदा, तस्यापि रुमण्वतोऽपि । उपरमः प्राणापायः । सम्भावनीय इति शेषः ॥ १४ ॥

विपद्गतस्य भर्तुः समुचितरक्षास्थानप्राप्त्या वासवदत्ता किञ्चिदाश्वस्ता ब्रवीति—**दिट्ठिआ** इत्यादि । सुनिक्षिप्तः सुष्ठु निक्षिप्तो निक्षेपत्वं प्राप्तः, रुमण्वद्रक्षणीयतां प्राप्त इत्येतच्छोभनमित्यर्थः ॥

अहो इत्यादि । महद्भारं महता अतिसमर्थेन निर्वहणीयो भारो गुरुकार्यं महद्भारः, तम् ।

सविश्रम इति । अयं नराधिपदाररक्षणरूपो मदीयो भारः । सविश्रमो हि विश्रमः श्रममुक्तिः तेन सहित एव पद्मावत्यां तन्न्यसनादित्यर्थः । तस्य रुमण्वतः । प्रसक्तो भारस्तु नराधिपरक्षणलक्षणः । श्रमः सातिशयश्रमहेतुः । श्रमहेतौ श्रमतादात्म्योपचारः श्रममहत्त्वप्रतिपत्त्यर्थः । कस्मात् पुनः सातिशयश्रमहेतुरित्याकाङ्क्षायामाह— हि यस्मात् कारणात् । नराधिपः राजा । यत्राधीनः यस्मिन्नायत्तः । तस्मिन् रुमण्वति । सर्वं राष्ट्रदुर्गबलादिकं यद्यन्नराधिपाधीनं तदखिलम् । अधीनम् आयत्तम् । नराधिपरक्षणं कुर्वतो नराधिपरक्षणीयराष्ट्रदुर्गादिरक्षणमप्यवर्जनीयतया कर्तव्यमापतितमिति सिद्धा सातिशयश्रमजनकता रुमण्वतो भारस्येति भावः ॥ १५ ॥

अथभो इत्यादि । पर्यवस्थापितः विकृतिपरिहारेण प्रकृतावस्थापितः ॥

तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम्, इह तया सह शयितम्, इत्येवं तं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद् ग्रामाद् गृहीत्वापक्रान्तम्। ततो निष्क्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः। ततोऽहमपि निर्गतोऽस्मि।

तापसी — (क) सो खु गुणवन्तो णाम राआ, जो आअन्तुएण वि इमिणा एव्वं पसंसीअदि।

चेटी — (ख) भट्टिदारिए! किंणुखु अवरा इत्थिआ तस्स हत्थं गमिस्सदि।

पद्मावती — (आत्मगतम्) (ग) मम हिअएण एव्व सह मन्तिदं।

(क) स खलु गुणवान् नाम राजा, य आगन्तुकेनाप्यनेनैवं प्रशस्यते।

(ख) भर्तृदारिके! किन्नुखल्वपरा स्त्री तस्य हस्तं गमिष्यति।

(ग) मम हृदयेनैव सह मन्त्रितम्।

तदिदानीमित्यादि। इहेत्यादिः शयितमित्यन्तो विलापप्रकारः। हसितं मयेति शेषः। एवं कथितमित्यादिष्वपि। पर्युषितं परित उषितम्। महता यत्नेनेति गृहीत्वेत्यनेनान्वेति। ग्रहणस्य महायत्नसिद्धत्वोक्त्या च तं ग्रामं प्रति राज्ञः स्वप्राणनायिकाधिष्ठानत्वप्रेमकृता त्यागानिच्छा द्योतिता। ततः तस्माद् ग्रामात्। तृतीयार्थे वा तसिस्तत इति, तैरमात्यैः सहेत्यर्थः। एषामेवोपमेयविशेषणानाम् उपमानविशेषणनक्षत्ररूपप्रतिबिम्बापेक्षया बिम्बत्वम्। ततः ग्रामस्यारमणीयत्वाद्धेतोः॥

सो खु इत्यादि। आगन्तुकेनापि पथिकेन उदासीनेनापीत्यर्थः॥

भट्टिदारिए इति। अपरा स्त्री, तस्य पत्न्यामुपरतायामप्यनुवर्तमाननिस्सीमस्नेहस्य उदयनस्य। हस्तं, किन्नुखलु गमिष्यति नैव गमिष्यति अपरामुद्दिश्य तदपेक्षाया असम्भाव्यत्वाद्, अथ यदि या काचिद् दैवात् तस्य हस्तं गच्छेद्, धन्यैव सा नूनं सानुक्रोशलोकोत्तरभर्तृलाभादित्याशयः। स चायं वरार्थिनीं पद्मावतीं प्रत्येव तदभ्युदयैककामया सूचयितुमुचित इति भर्तृदारिके! इति तदभिसम्बोधनम्। तेन कथमपि स ते वरणीय इति स्वाभिप्रायाविष्करणम्। अथवा किंनुखलु गमिष्यति कच्चिद् गमिष्यतीत्यर्थः, यदि गच्छेत् तथाविधभर्तृस्नेहसाम्राज्यभाजनत्वाद् धन्या सेत्याशयः। शेषं प्राग्वत्॥

ब्रह्मचारी — आपृच्छामि भवन्तौ । गच्छामस्तावत् ।

उभौ — गम्यतामर्थसिद्धये ।

ब्रह्मचारी — तथास्तु । (निष्क्रान्तः ।)

यौगन्धरायणः—साधु, अहमपि तत्रभवत्याभ्यनुज्ञातो गन्तुमिच्छामि ।

काञ्चुकीयः — तत्रभवत्याभ्यनुज्ञातो गन्तुमिच्छति किल ।

पद्मावती — (क) अय्यस्स भइणिआ अय्येण विना उक्कण्ठिस्सिदि ।

(क) आर्यस्य भगिनिकार्येण विनोत्कण्ठिष्यते ।

आत्मगतमिति । स्वगोचरतथाविधद्योत्यार्थगर्भस्य चेटीवाक्यस्यानुमोदनं स्वाचिकीर्षितमप्रकाश्यमिति मनस्येव तच्चिन्त्यते । **ममेति** । मम हृदयेन सहैव, नैकाकिन्या चेट्या, किन्तु मद्धृदयसहितयैव । मन्त्रितं भणितं, यदिदं चेट्या मां प्रति मन्त्रितं, तन्मम हृदयेनापि मन्त्रितमित्यर्थः । चेटीप्रतिपादितोऽर्थो ममापि हृदये प्रतिभात इति तात्पर्यम् । स एष पद्मावत्या उदयनविषयाभिलाषस्य बीजावापो वेदितव्यः ॥

आपृच्छामीत्यादि । आपृच्छामि आमन्त्रये । 'आङि नुपृच्छयोः' (वा० १-३-२१) इति नित्यस्तङिह न कृतः । एवञ्जातीयं सूत्रवार्त्तिकाननुसरणं सूत्रवार्त्तिककारापेक्षयातिदूरपूर्वकालविप्रकर्षं व्यासादेरिव भासस्य सूचयति । भवन्ताविति परिव्राजककाञ्चुकीयाभिप्रायं द्वित्वम् । गच्छाम इत्यस्य स्थाने साधयाम इति पाठोऽप्यस्ति । गच्छाम इति तदर्थः ॥

गम्यतामित्यादि । अर्थसिद्धय इति फलवचनं श्रुतिविशेषणरूपार्थेच्छुं ब्रह्मचारिणं प्रति शुभाशंसां वृद्धभावोचितामाविष्कर्तुम् ॥

तथास्त्विति । वृद्धाशीःप्रतिग्रहः ॥

साध्वित्यादि । साधु परमं मद्भगिनीरक्षणाभ्युपगमनं सम्यङ् निर्वृत्तमित्यर्थः । तत्रभवत्या पद्मावत्या ॥

तत्रेत्यादि । किलेत्यनुनये ॥

अय्यस्स इत्यादि । उत्कण्ठिष्यते उत्सुका भविष्यति । अतोऽनुत्कण्ठार्थं यावच्छक्ति यतिष्ये, न तत्रार्येण चिन्ता कार्येत्याशयः ॥

यौगन्धरायणः — साधुजनहस्तगतैषा नोत्कण्ठिष्यति । (काञ्चुकीयमवलोक्य) गच्छामस्तावत् ।

काञ्चुकीयः — गच्छतु भवान् पुनर्दर्शनाय ।

यौगन्धरायणः — तथास्तु । (निष्क्रान्तः ।)

काञ्चुकीयः — समय इदानीमभ्यन्तरं प्रवेष्टुम् ।

पद्मावती — (क) अय्ये ! वन्दामि ।

तापसी — (ख) जादे ! तव सदिसं भत्तारं ळभेहि ।

वासवदत्ता — (ग) अय्ये ! वन्दामि दाव अहं ।

(क) आर्ये ! वन्दे ।

(ख) जाते ! तव सदृशं भर्तारं लभस्व ।

(ग) आर्ये ! वन्दे तावदहम् ।

साधुजनेत्यादि । नोत्कण्ठिष्यतीत्यनुत्कण्ठावचनात् पद्मावत्यां स्निग्धबन्धुविस्रम्भः सूचितः । अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वादिह तङ् न कृतः; उत्कण्ठिष्यत इति वा पाठः ॥

पद्मावतीवचनगृहीतेङ्गितः काञ्चुकीयः परिव्राजकस्य गमनं सत्कारवादपूर्वमभ्यनुजानाति — **गच्छत्वि**त्यादि । पुनर्दर्शनाय औचित्यादस्माकं भवत्पुनःप्रेक्षणसिद्धये । पुनर्दर्शनं हि नाम पुनरागमनेन साध्यं, पुनरागमनं च तत्प्राचीनेन गमनेन निर्वर्त्यमित्यतो गमनं प्रति तत्प्रयोज्यपुनरागमनद्वारेण पुनर्दर्शनस्य फलत्वमबाधितं द्रष्टव्यम् । तदेष व्यङ्ग्यसम्भिन्नो वाक्यार्थः—भवतु काममिदानीं भवतो गमनं, भवत्पुनर्दर्शनकामास्तु वयं भवत्पुनरागमनं प्रार्थयामह इति ॥

तथास्त्विति उक्तपुनरागमनप्रार्थनाभ्युपगमः ॥

समय इत्यादि । अभ्यन्तरम् अन्तरुटजम् ॥

अभ्यन्तरं प्रतिष्ठासमाना पद्मावती तापसीं प्रति आमन्त्रणवन्दनमाह— **अय्ये** इत्यादि ॥

जादे इत्यादि । प्रस्तुतपद्मावत्यभिलाषानुगुण आशीर्वादोऽयम् ॥

वासवदत्ताप्यामन्त्रणवन्दनमाह—**अय्ये** इत्यादि ॥

तापसी — (क) तुवं पि अइरेण भत्तारं समासादेहि ।

वासवदत्ता — (ख) अणुग्गहीदह्मि ।

काञ्चुकीयः — तदागम्यताम् । इत इतो भवति! । सम्प्रति हि,

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम् ।
परिभ्रष्टो दूराद् रविरपि च संक्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम् ॥ १६ ॥

(निष्क्रान्ताः सर्वे ।)

प्रथमोऽङ्कः ।

(क) त्वमप्यचिरेण भर्तारं समासादय ।

(ख) अनुगृहीतास्मि ।

तुवमित्यादि । भर्तारं प्रोषितं पतिम् । समासादय प्रतिलभस्व ॥

आशिषं ससत्कारं प्रतिगृह्णाति—**अणिव**त्यादि । पद्मावत्या तु न किञ्चिदाशीर्वादाभिनन्दनवाक्यमुक्तं कन्याभावभूषणभूताद् व्रीडात् ॥

तदित्यादि । तत् तस्मात् । सम्प्रति हीति श्लोकान्वयि ।

खगा इति । खगाः पक्षिणः । वासोपेताः वासं स्वगृहं कुलायादिकम् उपेताः प्राप्ताः । द्वितीयेति योगविभागात् समासः । अथवा वासेनोपेता इति तृतीयासमासः । मुनिजनः, सलिलम् अवगाढः स्नातुं प्रविष्टः । विलोडनस्य गतिरूपत्वाद् 'गत्यर्थाकर्मक—' (३-४-७२) इति कर्तरि क्तः । अग्निः वैतानो वह्निः । प्रदीप्तः प्रणयनवशात् प्रज्वलितः । भाति । धूमः उक्ताग्निजन्यः । मुनिवनं तपोवनं । प्रविचरति प्रकर्षेण विचरति व्याप्नोति । अपिच, दूरात् परिभ्रष्टः नभोमध्याद् दूरेऽधोदेशे पतितः । असौ दूरस्थः । रविः, सङ्क्षिप्तकिरणः सङ्क्षिप्ताः प्रत्युपसंहृताः किरणा येन स तथाभूतः सन् । रथं व्यावर्त्य जवगतेर्निवार्य । शनैर्मन्दम् । अस्तशिखरं चरमगिरिशृङ्गं । प्रविशति । सायंसन्ध्या प्रत्यासीदतीत्यर्थः । सूर्यगतिजवस्य व्यवस्थितत्वेऽपि द्रष्टृबुद्ध्यनुसारात् प्रवेशमान्द्यवचनं, तदानुगुण्याच्च रथव्यावर्तनकल्पनमिति बोद्धव्यम् ॥ १६ ॥

निष्क्रान्ताः सर्वे इति । सर्वपात्रनिष्क्रमणेन प्रथमाङ्कपरिसमाप्तिः ॥

कानि पुनरत्र वासवदत्तायौगन्धरायणयोः पद्मावत्याश्च परस्परसमागमघटनायाः प्रयोजनानि । उच्यते—वासवदत्तायास्तावत् पद्मावतीरूपशीलादिसाक्षात्करणेन तस्यां सज्जनत्वबुद्ध्युत्पादः, तेन स्नेहः, तत आत्मरक्षाभ्युपगमेन नित्यपरिचयेन च तस्यां बहुमानस्नेहयोः काष्ठाप्राप्तिः, तया तस्यां निरतिशयो भगिनीविस्रम्भः सपत्नीभावेनाप्यविचाल्य इत्येवञ्जातीयं प्रयोजनम् ; यौगन्धरायणस्य विस्रम्भणीयतरे स्थाने वासवदत्तान्यासघटनद्वारेण कार्यशेषविषयसमुद्यमस्वाच्छन्द्यसम्पत्तिरित्येवम्प्रायम्; पद्मावत्याश्च वासवदत्तानित्यसंस्तवात् तदीयसद्गुणानाम् उदयनहृदयहारिणामात्मनि सङ्क्रम इत्येवम्प्रकारम् ।

अथ ब्रह्मचारिसंवादघटनायाः किं प्रयोजनम् । उच्यते—वासवदत्तापनयानन्तरजातस्य उदयनवृत्तान्तस्य विज्ञानं, तेन वासवदत्ताया विप्रलम्भपरिपोषः, स्वभर्तुः सन्मन्त्रिहस्तन्यस्तत्वज्ञानेन समाश्वास इत्येतत् प्रयोजनं; पद्मावत्या उदयनवृत्तावगमेन तद्विषयाभिलाषजननं, तथा पद्मावतीपक्ष्याणाम् उदयनाय पद्मावतीं दापयितुं समुद्यमकरणम् । इत्यादिकम् ऊहनीयम् ॥

इति प्रथमोऽङ्कः ।

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति चेटी ।)

चेटी — (क) कुञ्जरिए ! कुञ्जरिए ! कहिं कहिं भट्टिदारिआ पदुमावदी । किं भणासि, एसा भट्टिदारिआ माहवीळदामण्डवस्स पस्सदो कन्दुएण कीळदित्ति । जाव भट्टिदारिअं उवसप्पामि । (परिक्रम्यावलोक्य) अम्मो इअं भट्टिदारिआ उक्करिदकण्णचूळिएण वाआमसञ्जादसेदबिन्दुविइत्तिदेण

(क) कुञ्जरिके ! कुञ्जरिके ! कुत्र कुत्र भर्तृदारिका पद्मावती । किं भणसि, एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडतीति । यावद् भर्तृदारिकामुपसर्पामि । अम्मो इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायाम-

---

अथ द्वितीयोऽङ्कः ।

अथ द्वितीयेऽङ्के प्रथमाङ्कसूचितस्य पद्मावत्या उदयनविषयाभिलाषस्य परिपोषः, पद्मावतीभ्रातुर्दर्शकस्योदयनार्थे पद्मावतीं स्वयं दातुमध्यवसायः, पद्मावतीकौतुकमङ्गलसद्यःकरणत्वरेत्येतावन्तोऽर्थाः प्रतिपाद्याः । तत्राभिलाषपरिपोषः कन्दुककेलिमिलितसखीसंवादभङ्ग्या प्रकाशयिष्यते । अतस्तत्पूर्वघटनीयस्य कन्दुककेलिप्रसक्तपद्मावतीप्रवेशस्य सूचनार्थं प्रवेशकं रचयितुं तदनुरूपस्य पात्रस्य चेटीरूपस्य प्रवेशमाह—**ततः प्रविशती**त्यादि ।

अप्रविष्टामेवान्यां सजातीयां जिज्ञासितमर्थं पृच्छति—**कुञ्जरिए ! इ**त्यादि । अनुक्तमपि तयोत्तरं श्रुतमिवाभिनयन्ती तस्य 'एसा'इत्यादिना'कीळदि'इत्यन्तेन स्वकल्पितेनाकारेणानुवादमप्याभिनयिकमाह—**किं भणासी**त्यादि । इदमाकाशभाषितमिति नाट्यविद्भिरुच्यते । यदाह—"किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ॥" (दश० १) इति । माधवीलतामण्डपस्य वासन्तीलतामयस्य मण्डपस्य । यावदित्यादि । अम्मो इति सम्भ्रमे । उत्कृतकर्णचूलिकेन उत्कृता लम्बनपरिहारायोर्ध्वं कृता कर्णचूलिका कर्णाभरणविशेषो यस्मिंस्तेन तथाभूतेन, 'उक्कण्णिदकण्णचूळिएण' इत्यपि पाठः । व्यायामसञ्जातस्वेदबिन्दुविचित्रितेन व्यायामेन कन्दुकताडनायासेन सञ्जातैः स्वेदबि-

परिस्सन्तरमणीअदंसणेण मुहेण कन्दुएण कीळन्दी इदो एव्व आअच्छदि । जाव उवसप्पिस्सं ।

(निष्क्रान्ता ।)

प्रवेशकः ।

(ततः प्रविशति कन्दुकेन क्रीडन्ती पद्मावती सपरिवारा वासवदत्तया सह ।)

वासवदत्ता — (क) हळा ! एसो दे कन्दुओ ।

पद्मावती — (ख) अय्ये ! भोदु दाणिं एत्तअं ।

वासवदत्ता—(ग) हळा ! अदिचिरं कन्दुएण कीळिअ अहिअ-सञ्जादराआ परकेरआ विअ दे हत्था संवुत्ता ।

सञ्जातस्वेदबिन्दुविचित्रितेन परिश्रान्तरमणीयदर्शनेन मुखेन कन्दुकेन क्रीडन्तीत एवागच्छति । यावदुपसर्प्स्यामि ।

(क) हला ! एष ते कन्दुकः ।

(ख) आर्ये ! भवत्विदानीमेतावत् ।

(ग) हला ! अतिचिरं कन्दुकेन क्रीडित्वाधिकसञ्जातरागौ परकीयावि-व ते हस्तौ संवृत्तौ ।

न्दुभिर्विचित्रितेन शोभावैचित्र्यं प्रापितेन । परिश्रान्तरमणीयदर्शनेन परिश्रान्तेन परिश्रान्तिवशादेव रमणीयदर्शनेन दृष्टिप्रियेण । मुखेन उपलक्षितेति शेषः ॥

ततः प्रविशतीत्यादि ॥

हळेति । एष ते कन्दुक इति ताडनप्रमादभ्रष्टं पद्मावतीकन्दुकं स्वयं गृहीत्वा तस्यै प्रत्यर्पयन्त्या उक्तिः । भूयः क्रीडितुमिच्छा चेत् क्रीड्यतामनेनेति वाक्यशेषः ॥

चिरक्रीडनपरिश्रमेण भूयः क्रीडामनिच्छन्त्याह—**अय्ये** इति । इदानीम्, एतावद् यावन्निर्वृत्तं तावत् । भवतु अस्तु ततोऽधिकं मास्त्वित्यर्थः । अर्थात् कन्दुकक्रीडनं कर्तृ ॥

वासवदत्ता तदभिप्रायमभिनन्दन्त्याह—**हळा** इत्यादि । अधिकसञ्जातरागौ अधिकः कन्दुकताडनवशात् प्रवृद्धः सञ्जातो रागः स्वभावसिद्धो ययोस्तौ **तथाभूतौ** ।

चेटी — (क) कीळदु कीळदु दाव भट्टिदारिआ । णिव्वत्तीअदु दाव अअं कण्णाभावरमणीओ काळो ।

पद्मावती — (ख) अय्ये ! किं दाणिं मं ओहसिदुं विअ णिज्झाअसि ।

वासवदत्ता — (ग) णहि णहि । हळा ! अधिअं अज्ज सोहदि । अभिदो विअ दे अज्ज वरमुहं पेक्खामि ।

(क) क्रीडतु क्रीडतु तावद् भर्तृदारिका । निर्वर्त्यतां तावद् अयं कन्याभावरमणीयः कालः ।

(ख) आर्ये ! किमिदानीं मामपहसितुमिव निध्यायसि ।

(ग) नहि नहि । हळा ! अधिकमद्य शोभते । अभित इव तेऽद्य वरमुखं पश्यामि ।

परकीयाविव अवसादवशेनास्वतन्त्रत्वात् परकीयतुल्यौ आत्मेच्छानुसारेण कन्दुके सम्यग् व्यापरितुमशक्ताविति यावत् ॥

कीळदु इति । भर्तृदारिका क्रीडतु क्रीडतु अभीक्ष्णं क्रीडतु 'नित्यवीप्सयोः' (८-१-२)इति द्वित्वम् । कन्याभावरमणीयः कन्यात्वकमनीयः अयं कालः वयः । निर्वर्त्यतां परिसमाप्यतां तावत् अर्थात् क्रीडनेनैव । विवाहस्य प्रत्यासन्नत्वात् कन्यार्हं क्रीडनं न परिशेषयितव्यमिति चेट्या अभिप्रायः ॥

श्रमानुभावसम्भेदगुणितां चक्षुरानन्दजननीं पद्मावत्याः शोभां साकूतं निर्वर्णयन्तीं वासवदत्तां पद्मावत्याह — **अय्ये** इति । इदानीं मामपहसितुमिव, किं निध्यायसि किं निर्वर्णयसि, इदं ते मन्निर्वर्णनं मत्परिहासविधानार्थमिति मे प्रतिभातीत्यर्थः ॥

णहीति । नहि नहि, त्वामपहसितुं नैव निध्यायामीत्यर्थः । द्विरुक्तिर्निषेधदार्ढ्याय । किमर्थं तर्हि निध्यायसीति चेदाह — अद्य इदानीम् । अधिकमत्यर्थं सातिशयम् । शोभते भवती, विशेषानुक्त्या सर्वाङ्गावच्छेदेनेति बोद्धव्यम् । अतस्त्वां मच्चक्षुःप्रीतये निध्यायामीति भावः । "प्रियेषु सौभाग्यफला हि चारुते"ति न्यायेन कन्यकाभीप्सितं वरं प्रति मनोहारित्वं नाम कन्यकाशोभाप्रकर्षस्य प्रयोजनं, तत् तवावश्यं सेत्स्यतीति सपरिहासमाह — ते तव, अभितश्शब्दयोगेऽपि द्वितीया न कृता कविना । दे इत्यस्य त्वामिति वा संस्कृतं प्राकृते विभक्त्यनियमात् । ते इति

पद्मावती—(क) अवेहि । मा दाणिं मं ओहस ।

वासवदत्ता — (ख) एसह्मि तुह्णीआ भविस्सम्महासेणवहू ! ।

पद्मावती — (ग) को एसो महासेणो णाम ।

(क) अपेहि । मेदानीं मामपहस ।

(ख) एषास्मि तूष्णीका भविष्यन्महासेनवधूः ! ।

(ग) क एष महासेनो नाम ।

सुप्रतिरूपमव्ययं वा । अभितः अग्रे पश्चात् पार्श्वतश्च, तव पुरोङ्गे पृष्ठाङ्गे पार्श्वाङ्गे चेति यावत्, वरमुखं वरस्य वरणीयत्वेनेष्टस्य यूनो मुखं साम्मुख्यं तत्तदङ्गगतसौन्दर्यदर्शनोन्मुखत्वमित्यर्थः, पश्यामि इव साक्षात्करोमीव । साक्षात्कारसम्भावना चेयं वरसाम्मुख्यस्य सम्भवदार्ढ्यप्रतिपादनाय । तेन पूर्वोक्तः शोभाप्रकर्षस्तवाङ्गमङ्गं प्रति वरस्य सम्मुखतामवश्यमुत्पादयिष्यतीति भावः । अथवा तेऽभितो वरमुखं वराणां कन्यार्थिनां मुखं साम्मुख्यं पश्यामीव, अनया प्रत्यङ्गस्फुरितया तवातिशोभया समाकृष्टाः कन्यार्थिन आत्मवरणप्रत्याशया त्वां परितः सम्मुखीभूय स्थास्यन्तीति मे तर्क इति भावः । यद्वा वरमुखं वरो वरणं भर्तृत्वेन स्वीकरणं विवाह इति यावत्, तस्य मुखं पूर्वाङ्गभूतं पुरन्ध्रीजनवर्धापनादिकमाभ्युदयिकं कर्म, तेऽभितः पश्यामीव तव समन्तात् साक्षात्करोमीव । भाविनः प्रत्यक्षायमाणत्ववचनं शीघ्रभावित्वप्रतिपत्त्यर्थम् । तेनापूर्वोऽयं शोभाप्रकर्षस्तव विवाहमङ्गलस्यातिप्रत्यासन्नतां सूचयतीति भावः ॥

अवेहीत्यादि । अपेहीति प्रियसखीसाधारणं प्रणयरोषवचनम् । मेति माङर्थो माशब्दः, तेन 'माङि लुङ्' (३-३-१७५) इति लुङ्भावः ॥

अभीप्सितवरसाम्मुख्यकथनभङ्ग्या पूर्वमपहास आरब्धः । तमिदानीं वरविशेषसूचनगर्भेण चारुतरेण प्रकारेणोपसंहरति—**एसह्मीति** । महासेनस्य तदपरपर्यायस्य प्रद्योतस्य वधूः स्नुषा महासेनवधूः, भविष्यन्ती च सा महासेनवधूश्च भविष्यन्महासेनवधूः, तस्याः सम्बुद्धिः, हे भविष्यन्महासेनवधूः ! एषा अहं । तूष्णीकास्मि मौनिनी भवामि नैव भूयः किञ्चिद् वक्तुमिच्छामि, महासेनपुत्रस्तव हृदयस्थो वर इत्येतावद् वदन्ती सम्प्रति विरमामीत्यर्थः । एतच्च पद्मावतीहृदयपरीक्षार्थमुपक्षिप्तम् ॥

महासेन इति नाम्ना प्रद्योतस्याज्ञातत्वात् पृच्छति—**को** इत्यादि ॥

वासवदत्ता — (क) अत्थि उज्जइणीओ राआ पज्जोदो णाम । तस्स बळपरिमाणणिव्वुत्तं णामहेअं महासेणो त्ति ।

चेटी — (ख) भट्टिदारिआ तेण रञ्ञा सह सम्बन्धं णेच्छदि ।

वासवदत्ता — (ग) अह केण खु दाणिं अभिळसादि ।

चेटी — (घ) अत्थि वच्छराओ उअअणो णाम । तस्स गुणाणि भट्टिदारिआ अभिळसदि ।

वासवदत्ता — (आत्मगतम्) (ङ) अय्यउत्तं भत्तारं अभिळसदि । (प्रकाशम्) केण कारणेण ।

(क) अस्त्युज्जयिनीयो राजा प्रद्योतो नाम । तस्य बलपरिमाणनिर्वृत्तं नामधेयं महासेन इति ।

(ख) भर्तृदारिका तेन राज्ञा सह संबन्धं नेच्छति ।

(ग) अथ केन खल्विदानीमभिलषति ।

(घ) अस्ति वत्सराज उदयनो नाम । तस्य गुणान् भर्तृदारिकाभिलषति ।

(ङ) आर्यपुत्रं भर्तारमभिलषति । केन कारणेन ।

अत्थि इत्यादि । बलपरिमाणनिर्वृत्तं बलस्य सेनायाः परिमाणेन इयत्तया निर्वृत्तं निष्पन्नं, महती राजान्तरसेनापेक्षया परिमाणतोऽधिका सेना यस्य स इति महासेनपदस्य व्युत्पन्नत्वात् ॥

पद्मावतीहृदयं तत्प्रियसखीं प्रत्यगोपनीयत्वात् प्रकाशयति—**भट्टिदारिआ** इति । भर्तृदारिका तेन राज्ञा सह, सम्बन्धं तत्पुत्रवरणद्वारकं बन्धुत्वम् । नेच्छति ॥

अहेत्यादि । अभिलषति, अर्थात् सम्बन्धम् ॥

अत्थीत्यादि । तस्य गुणान् अभिलषति तद्गुणपक्षपातात् तं कामयत इत्यर्थः ॥

अय्यउत्तमित्यादि । आर्यपुत्रं मन्नायकं । भर्तारमभिलषति स्वभर्तृतयेच्छति । आर्यपुत्र इति भर्तारं प्रति पत्न्याः समुदाचारो नाट्ये । पद्मावत्यभिलाषं वस्तुतः स्वसापत्न्यकामनारूपमपि श्रुत्वा वासवदत्तयैतावदेव मनसि चिन्तयन्त्योदासितं, न तु

चेटी — (क) साणुक्कोसो त्ति ।

वासवदत्ता — (आत्मगतम्) (ख) जाणामि जाणामि । अअं वि जणो एव्वं उम्मादिदो ।

चेटी — (ग) भट्टिदारिए! जदि सो राआ विरूवो भवे ।

वासवदत्ता — (घ) णहि णहि । दंसणीओ एव्व ।

(क) सानुक्रोश इति ।

(ख) जानामि जानामि । अयमपि जन एवमुन्मादितः ।

(ग) भर्तृदारिके! यदि स राजा विरूपो भवेत् ।

(घ) नहि नहि । दर्शनीय एव ।

पद्मावत्यामीर्ष्या लेशतोऽप्याविष्कृता, यौगन्धरायणसमीहितभर्तृस्वार्थानुरोधात् स्वपरमोपकारिपद्मावतीपक्षपाताच्चेति द्रष्टव्यम् । उदयनकामनायामभिहितेऽपि गुणरूपे कारणे केन कारणेनेति प्रश्नः, अन्यराजपुत्रापोहेनैकत्राभिलाषस्थापनायां निमित्तभूतः को नाम गुणो लोकोत्तर उदयने दृष्ट इति जिज्ञासया कृतः ॥

साणुक्कोसो इति । अनुक्रोशः कृपा, तद्वान् सानुक्रोशः । इति अतः कारणात् । तमभिलषतीत्यार्थम् । सानुक्रोशत्वं खलु नाम वरे मृग्य कन्याजनकाम्यं गुणसर्वस्वम् । तच्च वासवदत्तामन्तरेण सुपरीक्षितं वत्सराजे प्रथितं चेत्यतस्तमभिलषतीति भावः ॥

जाणामीति । जानामि जानामि सम्यग् वेद्मि, अर्थादार्यपुत्रगतं सानुक्रोशत्वम् । अयं जनोऽपि अहमपि । उन्मादितः उन्मत्तः कृतः विवशः कृतः, अर्थात् सानुक्रोशत्वेनैव ॥

भट्टीति । भर्तृदारिके! स राजा उदयनः । विरूपः असुन्दरः । यदि भवेत् । तदा किं कुर्यामेति वाक्यशेषः । अतस्तं साक्षाददृष्ट्वैव तदभिलाषप्रवृत्तिरियं ते चिन्त्येति भावः । कर्णाकर्णिकया श्रुतचरमवन्तिराजपुत्रीभर्तुरुदयनस्य सुरूपत्वम् अवन्तिसुलभतद्दर्शनया आर्यावन्तिकयास्मत्परमासया यदि दृष्टचरं, सा तत् पद्मावतीं श्रावयत्विति मन्यमानायाश्चेट्या अयमुदयनविरूपत्वशङ्कोपन्यासस्तत्सम्बद्धावन्तिकावचनावसरदानार्थः ॥

णहीत्यादि । नहि नहीति द्विरुक्तिर्विरूपत्वप्रतिषेधदार्ढ्याय । दर्शनीय एव सुरूप एव ॥

पद्मावती — (क) अय्ये! कहं तुवं जाणासि ।

वासवदत्ता — (आत्मगतम्) (ख) अय्यउत्तपक्खवादेण अदिक्कन्दो समुदाआरो । किं दाणिं करिस्सं । होदु, दिट्ठं । (प्रकाशम्) हळा! एव्वं उज्जइणीओ जणो मन्तेदि ।

पद्मावती — (ग) जुज्जइ । णखु एसो उज्जइणीदुल्ळहो । सव्वजणमणोभिरामं खु सोभग्गं णाम ।

(क) आर्ये! कथं त्वं जानासि ।

(ख) आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः । किमिदानीं करिष्यामि । भवतु, दृष्टम् । हळा! एवमुज्जयिनीयो जनो मन्त्रयते ।

(ग) युज्यते । न खल्वेष उज्जयिनीदुर्लभः । सर्वजनमनोभिरामं खलु सौभाग्यं नाम ।

अय्ये! इत्यादि । कथं केन प्रकारेण, किं साक्षाद्दर्शनेन उत श्रवणेनेत्यर्थः । जानासीत्यस्य दर्शनीयत्वं कर्म । आवन्तिकाकृतेन स्वेप्सितस्य वरस्य दर्शनीयत्वस्थापनेन परितुष्टाया अपि पद्मावत्या अयं दर्शनीयत्वप्रमितिकरणप्रश्नो भूयः प्रियकथानुवृत्त्यर्थः परितोषातिशयार्थश्च ॥

अय्यउत्तेति । आर्यपुत्रपक्षपातेन भर्तृस्नेहेन । समुदाचारः छन्नावस्थानुगुण आचारः । अतिक्रान्तः लङ्घितः, आर्यपुत्रस्य विरूपत्वप्रतिषेधपूर्वं सौभाग्यमुक्तवत्या मयार्यपुत्रपरिचयशङ्कोत्थापनादित्यर्थः । इदानीं किं करिष्यामि अस्याः प्रश्नस्य किमुत्तरं प्रतिपत्स्ये । किञ्चिद्विचिन्त्याह — भवतु यन्ममार्यपुत्रसौभाग्यवचनं तत् तथैवास्तु, तेन मे रहस्यं नोद्भिन्नं भविष्यतीत्यर्थः । कुत इत्याह—दृष्टं प्रश्नस्योचितमुत्तरमार्यपुत्रपरिचयशङ्कानिवारकं मे प्रतिभातमित्यर्थः । तदेवाह—हळेति । हळा सखि ! उज्जायिनीयः उज्जयिन्यां भवः । जनः जनसामान्यं न केवलमहमित्यर्थः । एवं 'स राजा दर्शनीय' इत्यनेन प्रकारेण मन्त्रयते । यथान्य उज्जयिनीजनास्तद्दर्शनेनायत्नलब्धेन तत्सौभाग्यं ज्ञात्वा कथयन्ति, तथाहं कथयामीत्याशयः ॥

जुज्जइ इति । युज्यते त्वदुक्तमुपपद्यते । तत्र हेतुमाह—एष उदयनः । उज्जयिनीदुर्लभो न खलु उज्जयिनीजनस्य दुर्लभो नैव भवति, किन्त्वानिच्छतोऽप्यसकृद् द्रष्टुं सुलभ इत्यर्थः । अदुष्टं च सुभगपुरुषदर्शनं सर्वविधस्यापि जनस्येत्याह—

(ततः प्रविशति धात्री ।)

धात्री —(क) जेदु भट्टिदारिआ । भट्टिदारिए! दिण्णासि ।

(क) जयतु भर्तृदारिका । भर्तृदारिके ! दत्तासि ।

सौभाग्यं सुरूपत्वं नाम सर्वजनमनोभिरामं सर्वेषामुदासीनानामपि जनानां मनसोऽभिरामं हृद्यं भवति । अत उदासीनदृष्ट्या तव तद्दर्शनघटनं युक्तमिति तात्पर्यम् ॥

एवं तावत् पद्मावत्याः परमातावन्तिकावाक्येन वरगतं सौभाग्यं प्रति प्रत्ययोऽप्युपजनितः । तेन वरविषयाभिलाषस्य परमः परिपोषः सूचितो वेदितव्यः ॥

अथ पद्मावत्यभिलषितसाधकमनन्तराकाङ्क्षितं वस्तु प्रस्तोतव्यम् । तत्तु पद्मावतीभ्रातुर्दर्शकस्य तदभिलाषाभिनन्दनं वरहृदयानुकूल्यं विवाहपूर्वाङ्गक्रियारम्भश्च । तत्त्रितयसिद्धिलक्षणं पद्मावतीप्रियमाख्यातुं धात्र्याः प्रवेशमाह — **ततः प्रविशती**त्यादि ।

जेदु इत्यादि । जयतु वर्धताम् । दत्तासि दानं च वाचा, प्रकारान्तरस्येदानीमयोगात् । वाग्दानं च नाम क्रियादानस्य मुख्यस्य कर्तव्यस्य पूर्वाङ्गभूता दातृप्रतिग्रहीत्रुभयानुमता काचित् संवित्, केनचिदपि कारणेन क्रियादाननिर्वृत्तिरुभाभ्यां मा विघानीत्येवमर्थं क्रियमाणा । दानस्य कर्ता दर्शकः, तस्यैव पद्मावतीपितृस्थानीयस्य तत्र प्रभविष्णुत्वात् । दानक्रियोद्देश्यश्च उदयनः पद्मावतीतद्बान्धवोभयाभिरुचितः पद्मावतीहृदयस्थ एवेति कृत्वा शब्देन न निर्दिष्टः । दत्तेति वाग्दानस्य निर्वृत्तत्वकथनाद् देयदातृप्रतिग्रहीतॄणां पद्मावतीदर्शकोदयनानां तस्मिन्नेकाभिप्रायत्वमावेदितं, तत्त्रितयसमवायनिर्वर्त्यस्य तस्यान्यतमचित्तविसंवादे निर्वृत्त्ययोगात् । ततश्च पद्मावत्यभिलषितसाधकपूर्वोक्तत्रयस्य सिद्धिः स्फुटैव । एतेन पद्मावतीविषया उदयनगतापि रतिः सूचिता बोद्धव्या । किन्तु सा विधुरत्वपरिहाराय सुहृत्प्रार्थनानुरोधाय चावश्यकर्तव्यतया प्राप्ते नवपत्नीपरिग्रहे पद्मावतीमन्तरेणोदयनस्य मनसि तदप्रत्याख्यानपर्याप्ततयाविर्भूतापि वासवदत्ताशोकोद्रेकन्यक्कृतस्वरूपतया नोद्भिन्ना भवितुमर्हतीति न वर्णिता महाकविना, अपितु सूचितैव केवलम् । यदा पुनर्विवाहानन्तरं पद्मावतीपरिचयवशात् सा रतिः क्रमप्रवृद्धा भवति, तदा वर्ण्यत एव यथोचितं सा । एतच्च चतुर्थपञ्चमाङ्कयोः स्पष्टम् ॥

वासवदत्ता — (क) अय्ये! कस्स ।

धात्री — (ख) वच्छराअस्स उदअणस्स ।

वासवदत्ता — (ग) अह कुसळी सो राआ ।

धात्री — (घ) कुसळी सो आअदो । तस्स भट्टिदारिआ पडिच्छिदा अ ।

वासवदत्ता — (ङ) अच्चाहिदं ।

धात्री — (च) किं एत्थ अच्चाहिदं ।

वासवदत्ता — (छ) ण हु किञ्चि । तह णाम सन्तप्पिअ उदासीणो होदि त्ति ।

(क) आर्ये ! कस्मै ।

(ख) वत्सराजायोदयनाय ।

(ग) अथ कुशली स राजा ।

(घ) कुशली स आगतः । तस्य भर्तृदारिका प्रतीष्टा च ।

(ङ) अत्याहितम् ।

(च) किमत्रात्याहितम् ।

(छ) न खलु किञ्चित् । तथा नाम सन्तप्योदासीनो भवतीति ।

स्वभर्तुरात्मशोकसन्तप्तस्य नवपत्नीस्वीकारमसम्भावयन्ती सम्प्रदानं पृच्छति—**अय्ये !** इति । कस्स कस्मै । दत्तेत्यनुकर्षः ॥

श्रुतेऽप्युदयनस्य सम्प्रदानत्वे, तस्यात्मविषयशोकदशायां कुशलमेव तावदसम्भावितं, का कथा नूतनपत्नीपरिग्रहस्येति मन्वाना तस्य कुशलं पृच्छति —**अहे**त्यादि ॥

स कुशली च, राजगृहमागतश्च, भर्तृदारिकां वाचा प्रतिगृहीतवांश्चेति वदन्ती तस्याः सन्देहं छिनत्ति—**कुशली**त्यादि । तस्येति सम्बन्धषष्ठी, तेनेत्यर्थः ॥

अत्याहितमिति । अत्याहितं महाभीतिः । तच्चान्याय्याचरणं प्रकृते ॥

किमित्यादि । अत्र उदयनस्य नवपत्नीपरिग्रहे ॥

धात्री — (क) अय्ये ! आअमप्पहाणाणि सुळहपय्यवत्थाणाणि महापुरुसहिअआणि होन्ति ।

वासवदत्ता — (ख) अय्ये ! सअं एव्व तेण वरिदा ।

धात्री — (ग) णहि णहि । अण्णप्पओअणेण इह आअदस्स अभिजणविञ्ञाणवओरूवं पेक्खिअ सअं एव्व महाराएण दिण्णा ।

(क) आर्ये ! आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति ।

(ख) आर्ये ! स्वयमेव तेन वरिता ।

(ग) नहि नहि । अन्यप्रयोजनेनेहागतस्याभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता ।

णहु इति । नखलु किञ्चिदिति काकुगर्भम् । विद्यत इति च शेषः । अत्याहितं किञ्चिन्नखलु विद्यते, विद्यत एवेत्यर्थः । किं तदित्याह — तथा नाम ब्रह्मचार्युक्तेन प्रकारेण । सन्तप्य वासवदत्तावियोगसन्तापं बहिः प्रकाश्य । उदासीनो भवति, नवां पत्नीं प्रतिगृह्णन् वासवदत्तायां निस्स्नेहो भवति । इति एतदेवात्याहितमित्यर्थः । अथवा नखलुकिञ्चिदित्यस्य वक्ष्यमाणादन्यदत्याहितं न किञ्चिदित्यर्थः ॥

उदयनस्तथा दुःखितोऽपि पूर्वं पश्चाद् विवेकादिना हृदयं पर्यवस्थाप्यावर्जनीयेषु राजभावोचितेषु कार्येषु नवपत्नीस्वीकारादिषु व्याप्रियेतैव महापुरुषत्वात् ; न च तावता तस्य वासवदत्तानिःस्नेहत्वं शङ्कितुं युक्तमित्यभिप्रायेणाह — **अय्ये** इति । आगमप्रधानानि आगमः शास्त्रं सुहृदुपदेशो वा प्रधानं येषां तानि तथाभूतानि । महापुरुषहृदयानि । अत एव सुलभपर्यवस्थानानि सुलभं पर्यवस्थानं विकृतिपरिहारेण प्रकृतावस्थितिर्यैस्तानि तथाभूतानि भवन्ति ॥

कामं कृतो भवतु वत्सराजेन विवेकपर्यवस्थापितात्मना पद्मावत्याः स्वीकारः, यद्यप्रार्थितोपनतायास्तस्या अप्रत्याख्यानलक्षणः स स्यात् । यदि तु स्वप्रार्थनापुरस्सर एव स भवेत्, तथाविधस्य वासवदत्तास्नेहप्रकर्षस्य सर्वथैव स विपरीत इत्यभिप्रायं मनसि निधाय पृच्छति — **अय्ये सअमित्यादि** । वरिता प्रार्थनापूर्वं स्वीकृता । अत्र प्रश्नकाकुः । वरधातुरदन्तश्चुरादिः ॥

णहीत्यादि । अन्यप्रयोजनेन फलान्तरोद्देशेन । इह राजगृहे । अभिजनवि-

वासवदत्ता — (आत्मगतम्) (क) एव्वं । अणवरद्धो दाणिं एत्थ अय्यउत्तो ।

(प्रविश्यापरा)

चेटी — (ख) तुवरदु तुवरदु दाव अय्या । अज्ज एव्व किळ सोभणं णक्खत्तं । अज्ज एव्व कोदुअमङ्गळं कादव्वं त्ति अह्माणं भट्टिणी भणादि ।

वासवदत्ता — (आत्मगतम्) (ग) जह जह तुवरदि, तह तह अन्धीकरेदि मे हिअअं ।

(क) एवम् । अनपराद्ध इदानीमत्रार्यपुत्रः ।

(ख) त्वरतां त्वरतां तावदार्या । अद्यैव किल शोभनं नक्षत्रम् । अद्यैव कौतुकमङ्गलं कर्तव्यमित्यस्माकं भट्टिनी भणति ।

(ग) यथा यथा त्वरते, तथा तथान्धीकरोति मे हृदयम् ।

ज्ञानवयोरूपमिति समाहारद्वन्द्वः । अभिजनः कुलं, विज्ञानं विद्या । स्वयमेव वत्सराजप्रार्थनां विनैव । महाराजेन दर्शकेन ॥

एव्वमित्यादि । एवं पद्मावतीस्वीकारस्य प्रकार ईदृशः, अप्रार्थितोपहृतायास्तस्या अप्रत्याख्यानलक्षण इत्यर्थः । इदानीम् एवं सति । अनपराद्धः अपराधरहितः । यद्यार्यपुत्रः स्वयं पद्मावतीमवरयिष्यत्, मयि सापराधोऽभविष्यत् स्वेनैव मत्स्नेहविस्मरणात् । अप्रार्थितसमर्पितायास्तु तस्याः परिग्रहणमक्षतेऽपि मत्स्नेहे घटत एवेति नास्त्यार्यपुत्रं प्रति अपराधशङ्काया अवकाश इति भावः ॥

इत्थं सर्वानुमते विवाहे तदङ्गस्य कौतुकमङ्गलस्य प्रस्तावार्थमपरां चेटीं प्रवेशयति — **प्रविश्येत्यादि** । **तुवरदु** इत्यादि । आर्येति धात्र्यभिप्रायम् । *कौतुकमङ्गलं विवाहसूत्रबन्धरूपं मङ्गलम् । भट्टिनी दर्शकपत्नी । तदागम्यतामिति वाक्यशेषः ॥

---

*'कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः ।
तथा परम्परायाते मङ्गले च कुतूहले ॥
विवाहसूत्रगीतादिभोगयोरपि न द्वयोः ॥' इति मेदिनी ॥

धात्री —(क) एदु एदु भट्टिदारिआ ।

(निष्क्रान्ताः सर्वे ।)

द्वितीयोऽङ्कः ।

(क) एत्वेतु भर्तृदारिका ।

जह इत्यादि । अन्धीकरोति प्रतिपत्तिशून्यं करोति अर्थात् त्वरातिकर्त्री । अखण्डमात्मनानुभूयमानं भर्तृस्नेहसाम्राज्यं स्वभाग्यदोषेण सपत्नीविभाज्यमापतिष्यतीति दुःखाद् वासवदत्तायाश्चिन्तारम्भोऽयम् । पद्मावत्यां तु नास्या ईर्ष्येति प्रागवोचाम ॥

एदु इत्यादि । त्वरासूचनाय द्विरुक्तिः ॥

द्वितीयोऽङ्कः ॥

अथ तृतीयोऽङ्कः ।

(ततः प्रविशति विचिन्तयन्ती वासवदत्ता ।)

वासवदत्ता — (क) विवाहामोदसङ्कुळे अन्तेउरचउस्साळे परित्तिअ पदुमावदिं इह आअदह्मि पमदवणं । जाव दाणिं भाअधेअणिव्वुत्तं दुःखं विणोदेमि । (परिक्रम्य) अहो अच्चाहिदं । अय्यउत्तो वि णाम परकेरओ संवुत्तो । जाव उवविसामि । (उपविश्य) धञ्ञा खु चक्कवाअवहू,

---

(क) विवाहामोदसङ्कुले अन्तःपुरचतुश्शाले परित्यज्य पद्मावतीमिहागतास्मि प्रमदवनम् । यावदिदानीं भागधेयनिर्वृत्तं दुःखं विनोदयामि । अहो अत्याहितम् । आर्यपुत्रोऽपि नाम परकीयः संवृत्तः । यावद् उपविशामि ।

अथ तृतीयोऽङ्कः ।

सपत्नीनिष्पत्तिहेतुभूतं भागधेयमनुचिन्त्य विमनायमानयापि वासवदत्तया स्वकराभ्यामेव पद्मावतीकौतुकमङ्गलमालिकाया गुम्फनमिह तृतीयेऽङ्के वस्तु । तदिदमतिसरससंवादसुन्दरं घटयिष्यन् वासवदत्तायाः पूर्वाङ्कशेषोपक्षिप्तदुःखचिन्तायाः प्रवेशमाह — **ततः प्रविशती**त्यादि ।

विवाहेत्यादि । विवाहामोदसङ्कुले विवाहस्यामोदेन चिरप्रार्थितं पद्मावतीपरिणयमहोत्सवमनुभवितुमयमवसरः प्राप्त इति प्रमोदेन हेतुना सङ्कुले नानाबन्धुजनव्याप्ते । अन्तःपुरचतुश्शाले अन्तःपुरे विद्यमानं चतुश्शालं मिथोऽभिमुखीभिश्चतसृभिः शालाभिर्युक्तं गृहं, तस्मिन् । स्थितामिति शेषः । स्थितिश्च वरागमनप्रतीक्षया । पद्मावतीं परित्यज्य, जनाकीर्णे मत्स्थितिपरिहाराय पद्मावत्यन्वासनमुपेक्ष्येति भावः । इह अस्मिन् प्रदेशे । प्रमदवनं स्त्रीवासोचितमुद्यानम् । आगतास्मि । भागधेयनिर्वृत्तं मदीयादृष्टनिष्पन्नम् । दुःखम् । इदानीम् अपूर्वलब्धेऽस्मिन् विजनावस्थानावसरे । विनोदयामि तद्विषयचिन्तया किञ्चिदुपशमयामीत्यर्थः । **परिक्रम्ये**ति । इदं परिक्रमणं वक्ष्यमाणं चोपवेशनं चिन्ताकार्यमेकत्रानवस्थानलक्षणं बोद्धव्यम् । **अहो अच्चाहिदमि**ति । अहो कष्टम् । अत्याहितं महाभीतिस्थानम् । किं तदित्याह— आर्यपुत्रोऽपि नाम अपिशब्दः परकीयत्वविरुद्धधर्मयोगद्योतकः, तेन मदेकन्यस्तसमस्तान्तरभावो मद्भर्तापीत्यर्थः । परकीयः परस्याः संबन्धी । संवृत्तः । यावदुपविशामि उपवेक्ष्यामि । 'यावत्पुरानिपातयोर्लट् ' (३-३-४) इति भविष्यति लट् ।

जा अण्णोण्णविरहिदा ण जीवइ । ण खु अहं पाणाणि परित्तजामि । अय्यउत्तं पेक्खामि त्ति एदिणा मणोरहेण जीवामि मन्दभाआ ।

(ततः प्रविशति पुष्पाणि गृहीत्वा चेटी ।)

चेटी—(क) कहिंणुखु गदा अय्या आवन्तिआ । (परिक्रम्यावलोक्य) अम्मो इअं चिन्तासुञ्ञहिअआ णीहारपडिहदचन्दळेहा विअ अमण्डिदभद्दअं वेसं धारअन्दी पिअङ्गुसिळापट्टए उवविट्ठा । जाव उवसप्पामि । (उपसृत्य) अय्ये ! आवन्तिए ! को काळो, तुमं अण्णेसामि ।

वासवदत्ता—(ख) किंणिमित्तं ।

धन्या खलु चक्रवाकवधूः, यान्योन्यविरहिता न जीवति । न खल्वहं प्राणान् परित्यजामि । आर्यपुत्रं पश्यामीत्येतेन मनोरथेन जीवामि मन्दभागा ।

(क) क्वनुखलु गता आर्यावन्तिका । अम्मो इयं चिन्ताशून्यहृदया नीहारप्रतिहतचन्द्रलेखेवामण्डितभद्रकं वेषं धारयन्ती प्रियङ्गुशिलापट्टके उपविष्टा । यावदुपसर्पामि । आर्ये! आवन्तिके! कः कालः, त्वामन्विष्यामि ।

(ख) किन्निमित्तम् ।

अन्योन्यविरहिता प्रियवियुक्तेत्यर्थः । चिरविच्छिन्नदर्शन आर्यपुत्र इह विवाहप्रसङ्गे द्रष्टुं लभ्यत इत्येषेच्छैवेदानीं प्राणधारणे कारणमित्याह — **अय्यउत्तमित्यादि** ॥

अस्मिन्नन्तरे पद्मावतीपरिणयमङ्गलमालिकानिर्माणप्रार्थनार्थमावन्तिकामन्विष्यन्त्या नवावचितपुष्पपाणेश्चेट्याः प्रवेशमाह — **ततः प्रविशतीत्यादि** ॥

कहिंणुखु इत्यादि । चिन्ताशून्यहृदया चिन्तया हेतुना शून्यं स्वव्यापारापट्टु हृदयं यस्याः सा तथाभूता । अत एव विच्छायत्वात् चन्द्रलेखया हिमच्छन्नच्छायया साम्यम् । अमण्डितभद्रकम् अनलङ्कृतसुन्दरम् । प्रियङ्गुशिलापट्टके प्रियङ्गोर्गन्धफलीवृक्षस्य शिलापट्टके तन्मूलस्थशिलापीठे । अय्ये! इति । आर्ये! आवन्तिके! कः कालः कियान् कालः यापित इति शेषः । केन व्यापारेणेत्याकाङ्क्षायां त्वदन्वेषणेनेत्याह—त्वामन्विष्यामि विचिनोमि, अन्वेषे इति वा । त्वामन्विष्यन्त्या मया बहवः क्षणा यापिताः, दिष्ट्येदानीं दृष्टासीत्यभिप्रायः ॥

चेटी—(क) अह्माअं भट्टिणी भणादि —महाकुळप्पसूदा सिणिद्धा णिउणा त्ति । इमं दाव कोदुअमाळिअं गुह्मदु अय्या ।

वासवदत्ता—(ख) अह कस्स किळ गुह्मिदव्वं ।

चेटी—(ग) अह्माअं भट्टिदारिआए ।

वासवदत्ता—(आत्मगतम्) (घ) एदं पि मए कत्तव्वं आसी । अहो अकरुणा खु इस्सरा ।

(क) अस्माकं भट्टिनी भणति —महाकुलप्रसूता स्निग्धा निपुणेति । इमां तावत् कौतुकमालिकां गुम्फत्वार्या ।

(ख) अथ कस्मै किल गुम्फितव्यम् ।

(ग) अस्माकं भर्तृदारिकायै ।

(घ) एतदपि मया कर्तव्यमासीत् । अहो अकरुणाः खल्वीश्वराः ।

किमिति । किं निमित्तं केन कारणेन । 'निमित्तपर्यायप्रयोग' इति वचनात् प्रथमा । अन्विष्यसीति पूर्वतो विपरिणतमनुषञ्जनीयम् ॥

अह्माअमित्यादि । भट्टिनी दर्शकपत्नी । महाकुलप्रसूतेति पद्मावतीं प्रत्यनुग्रहणयोग्यतोक्ता । स्निग्धेति स्नेहवत्त्वं यद्रहिता माङ्गलिके कर्मणि न नियोज्याः । निपुणेति मालिकाशिल्पकौशलम् । एषां विशेषणानां विशेष्या त्वर्थादार्यैव । गुम्फतु, प्रार्थनायां लोट् । सा च चेटीकर्तृका । भट्टिन्या तु सा क्रियमाणावन्तिकायाश्चेतसि कदाचिदाज्ञेव प्रतिभायादिति स्वभणितौ नोपात्ता । निष्पत्स्यमानायामपि कौतुकमालिकायां पुष्पादिरूपतन्निर्माणसामग्रीगतं सन्निहितत्वमारोप्य इमामिति सन्निहितत्ववचनम् । तच्च लघुनिष्पाद्यत्वध्वननाय ॥

कस्मै जनाय मालिकागुम्फनं प्रार्थयस इति पृच्छति— **अहेत्यादि** । कस्मै जनाय । जनविशेषं प्रकरणाज्जानानयाप्यजानानयेव चेटी पृच्छयते तत्प्रार्थितेऽर्थे रुचिविरहात् ॥

अह्माअमित्यादि । अर्थावगम्यस्यात्मसम्बन्धस्य अस्माकमिति शब्देन वचनं पद्मावत्यामात्मनो ममतानुरागातिशयस्य प्रार्थनाविशेषनिमित्तस्य द्योतनार्थम् । तत्रापि बहुवचनमावन्तिकाया अपि सङ्ग्रहार्थं, न केवलं मम, तवापि प्रियसखीत्वेन सम्बन्धिनी भर्तृदारिकेति ॥

चेटी — (क) अय्ये ! मा दाणिं अञ्ञं चिन्तिअ । एसो जामादुओ मणिभूमीए ह्णाअदि । सिग्घं दाव गुह्मदु अय्या ।

वासवदत्ता — (आत्मगतम्) (ख) ण सक्कुणोमि अण्णं चिन्तेदुं । (प्रकाशम्) हळा ! किं दिट्ठो जामादुओ ।

चेटी — (ग) आम, दिट्ठो भट्टिदारिआए सिणेहेण अह्माअं कोदूहळेण अ ।

वासवदत्ता — (घ) कीदिसो जामादुओ ।

(क) आर्ये! मेदानीमन्यच्चिन्तयित्वा । एष जामाता मणिभूम्यां स्नायति । शीघ्रं तावद् गुम्फत्वार्या ।

(ख) न शक्नोम्यन्यच्चिन्तयितुम् । हळा! किं दृष्टो जामाता ।

(ग) आम, दृष्टो भर्तृदारिकायाः स्नेहेनास्माकं कौतूहलेन च ।

(घ) कीदृशो जामाता ।

एदं पीति । एतदपि स्वसपत्नीनिष्पत्तिपरमद्वारं कौतुकमाल्यगुम्फनमपि । मया कर्तव्यम् आसीत् मयैव करणीयमापतितम् , अनिष्टस्यापि तस्य मत्परमोपकारिप्रियसखीपक्षपातेनाप्रत्याख्येयत्वादिति भावः । ईश्वराः मदनिष्टसाधनमपि मया कारयितुं प्रभविष्णवो देवा इत्यर्थः । अकरुणाः मयि कृपारहिताः खलु ॥

इति चिन्तयन्तीमावन्तिकां कार्यकालातिपातभिया चेटी त्वरयति—**अय्ये!** इति । आर्ये ! इदानीं भर्तृदारिकाविवाहकार्यानुष्ठानार्हेऽस्मिन्नवसरे । अन्यत् कार्यान्तरम् । मा चिन्तयित्वा मा चिन्तयेत्यर्थः । प्रतिषेधार्थमाशब्दयोगे क्त्वाप्रत्ययो महाकविना प्रयुक्तोऽपाणिनीयोऽपि । 'अलंखल्वोः प्रतिषेधयो—' (३-४-१६) इति सूत्रे अलंखलुग्रहणस्योपलक्षणार्थत्वकल्पना तु साहसम् । ह्णाअदि स्नायति । 'ष्णै शौचे' इति भौवादिको धातुः । स्नानवचनं तदुत्तरकालकार्यस्य कौतुकमालिकाया विनियोगस्य प्रत्यासन्नत्वबोधनार्थम् । अत एवाह — शीघ्रमित्यादि ॥

णेति । अन्यत् मदीयं दुःखं । चिन्तयितुं न शक्नोमि इच्छन्त्यप्यवसराभावाच्छक्ता न भवामीत्यर्थः । तेन दुःखं निगृह्य प्रकृतानुगुणं स्वभ ्परं सल्लापमारभते — हळेत्यादि ॥

आमेत्यादि । आमेत्यभ्युपगमे ॥

चेटी — (क) अय्ये ! भणामि दाव, ण ईरिसो दिट्ठपुरुवो ।

वासवदत्ता — (ख) हळा ! भणाहि भणाहि, किं दंसणीओ ।

चेटी — (ग) सक्कं भणिदुं सरचावहीणो कामदेवो त्ति ।

वासवदत्ता — (घ) होदु एत्तअं ।

चेटी — (ङ) किण्णिमित्तं वारेसि ।

वासवदत्ता — (च) अजुत्तं परपुरुससङ्कित्तणं सोदुं ।

(क) आर्ये ! भणामि तावद्, नेदृशो दृष्टपूर्वः ।
(ख) हळा ! भण भण, किं दर्शनीयः ।
(ग) शक्यं भणितुं शरचापहीनः कामदेव इति ।
(घ) भवत्वेतावत् ।
(ङ) किन्निमित्तं वारयासि ।
(च) अयुक्तं परपुरुषसङ्कीर्तनं श्रोतुम् ।

कीदिसो इत्यादि । कीदृशः किं विरूप उत दर्शनीयः ॥

अय्ये इत्यादि । भणन्त्या एव 'भणामि तावदि'ति प्रतिज्ञानं भणनस्य भूतार्थविषयत्वध्वननार्थम् । तेन ईदृशो युवा न दृष्टपूर्व इति मद्वचनं सत्यमेव, नातिशयवादः स्नेहादिनिमित्त इति भावः ॥

हळेत्यादि । विरूपत्वदर्शनीयत्वयोस्तटस्थमिव ते वचनं लक्ष्यते; दर्शनीयत्वं प्रति च मदीया जिज्ञासा; तद् विशिष्य कथयेति तात्पर्यम् ॥

सक्कमिति । इह जामातेति पूर्वतोऽनुकर्षः । जामाता शरचापहीनः शरचापाभ्यां पुष्पमयाभ्यां हीनः शरचापहीनः । कामदेव इति भणितुं शक्यम् । 'सअं खु भअवं सरचावहीणो कामदेवो त्ति' इत्यपि पाठः । सव्यतिरेकरूपकमत्रालङ्कारः ॥

होदु इति । एतावद्, इयद् वर्णनं, भवतु अस्तु इतोऽधिकं मास्त्वित्यर्थः ॥

किमिति । किंनिमित्तं केन कारणेन । वारयसि, अर्थाज्जामातृवर्णनम् ॥

अजुत्तमिति । परपुरुषसङ्कीर्तनम् अन्यपुरुषश्लाघनम् । श्रोतुम् अयुक्तम् । अतो वारयामीत्यार्थम् ॥

चेटी — (क) तेण हि गुह्मदु अय्या सिग्घं ।

वासवदत्ता — (ख) इअं गुह्मामि । आणेहि दाव ।

चेटी — (ग) गह्णदु अय्या ।

वासवदत्ता — (वर्जयित्वा विलोक्य) (घ) इमं दाव ओसहं किं णाम ।

चेटी — (ङ) अविहवाकरणं णाम ।

वासवदत्ता — (आत्मगतम्) (च) इदं बहुसो गुह्मिदव्वं मम अ पदुमावदीए अ । (प्रकाशम्) इमं दाव ओसहं किं णाम ।

(क) तेन हि गुम्फत्वार्या शीघ्रम् ।

(ख) इयं गुम्फामि । आनय तावत् ।

(ग) गृह्णात्वार्या ।

(घ) इदं तावदौषधं किं नाम ।

(ङ) अविधवाकरणं नाम ।

(च) इदं बहुशो गुम्फितव्यं मम च पद्मावत्याश्च । इदं तावदौषधं किं नाम।

तेण हीत्यादि । तेण हि तर्हि ॥

इअमिति । इयम् अहं गुम्फामि गुम्फितुमारभे इत्यर्थः । आनय तावत् अर्थात् पुष्पभाजनम् । "आणेहि । (आत्मगतम्) इअं गुह्मामि मन्दभाआ" इत्यपि पाठः ॥

गह्णदु इत्यादि । एतदुत्तरं पुष्पभाजनार्पणग्रहणयोरर्थसिद्धत्वादनुक्तिः ॥

वर्जयित्वेत्यादि । वर्जनमिह निस्सारणं, तेन भाजनात् पुष्पाणि बहिर्निस्सार्येत्यर्थः । आवर्जयित्वेत्यपि पाठोऽस्ति । तत्र ल्यबकरणमार्षम् । विलोक्य अर्थात् पुष्पाणि तैः सह गुम्फनार्थं निवेशितमन्यच्च दृष्ट्वा ॥

पुष्पेषु जिज्ञासाभावादन्यदुद्दिश्य पृच्छति — **इम**मित्यादि । औषधम् ओषधिविकारः । कौतुकमालिकायां रक्षार्थमौषधगुम्फनं सामुदाचारिकम् ॥

अविधवेति । अविधवा क्रियतेऽनेन धारितेनेत्यविधवाकरणम् ॥

चेटी — (क) सवत्तिमद्दणं णाम ।

वासवदत्ता — (ख) इदं ण गुम्फिदव्वं ।

चेटी — (ग) कीस ।

वासवदत्ता — (घ) उवरदा तस्स भय्या, तं णिप्पओअणं त्ति ।

(प्रविश्यापरा)

चेटी — (ङ) तुवरदु तुवरदु अय्या । एसो जामादुओ अविहवाहि अब्भन्तरचउस्सालं पवेसीअदि ।

(क) सपत्नीमर्दनं नाम ।

(ख) इदं न गुम्फितव्यम् ।

(ग) कस्मात् ।

(घ) उपरता तस्य भार्या, तन्निष्प्रयोजनमिति ।

(ङ) त्वरतां त्वरतामार्या । एष जामाता अविधवाभिरभ्यन्तरचतुश्शालं प्रवेश्यते ।

इदमित्यादि । मह्यं च पद्मावत्यै च आवयोरुभयोरवैधव्यायेत्यर्थः । अपरमौषधं प्रति पृच्छति — **इमं दावेति** ॥

सवत्तीति । सपत्नी मर्द्यतेऽनेन धारितेनेति सपत्नीमर्दनं नाम ॥

इदमित्यादि । इदं सपत्नीमर्दनम् ॥

कीसेति । कस्माद्, इदं न गुम्फितव्यमित्यनुषङ्गः ॥

उवरदेति । तस्य भार्या वासवदत्ता । उपरता प्रमीता । तत् तस्मात् मर्दनीयायाः सपत्न्या अभावादित्यर्थः । निष्प्रयोजनं निष्फलम् अर्थात् सपत्नीमर्दनाभिधमौषधम् ॥

कौतुकमाल्यविनियोगावसरस्य सन्निहिततरत्वं निवेदयितुम् अपरस्याश्चेट्याः प्रवेशमाह — **प्रविश्येति** ।

तुवरदु इत्यादि । अविधवाभिर्भर्तृमतीभिः । अभ्यन्तरचतुश्शालम् अभ्यन्तरे विद्यमानं सञ्जवनम् । एतदेव विवाहमङ्गलगृहं, यद् विवाहामोदसङ्कुलमिति पूर्वमुक्तम् । विवाहोचितवेषमागतं वरं सुवासिन्यो विवाहगृहाभ्यन्तरं प्रवेशयन्तीति समुदाचारः ॥

वासवदत्ता — (क) अइ ! वदामि, गह्ण एदं ।

चेटी — (ख) सोहणं । अय्ये ! गच्छामि दाव अहं ।

(उभे निष्क्रान्ते ।)

वासवदत्ता — (ग) गदा एसा । अहो अच्चाहिदं । अय्यउत्तो वि णाम परकेरओ संवुत्तो । अविदा सय्याए मम दुक्खं विणोदेमि, जदि णिद्दं ळभामि ।

(निष्क्रान्ता ।)

तृतीयोऽङ्कः ।

(क) अयि ! वदामि, गृहाणैतत् ।

(ख) शोभनम् । आर्ये ! गच्छामि तावदहम् ।

(ग) गतैषा । अहो अत्याहितम् । आर्यपुत्रोऽपि नाम परकीयः संवृत्तः । अविदा शय्यायां मम दुःखं विनोदयामि, यदि निद्रां लभे ।

चेटोत्वरणानुगुणमाह — **अइ** इति । अयि ! वदामि । एतत् कौतुकमाल्यं निर्वृत्तगुम्फनं, गृहाण, ग्रहणविलम्ब एव ते न तु मम गुम्फनविलम्ब इति भावः । 'इअं तुवरामि भद्दे ! गह्ण एदम्' इत्यपि पाठः ॥

चेटी तद् गृहीत्वाह — **सोहण**मित्यादि । शोभनं चारु । अर्थान्माल्यम् ॥

उभे इति । उभे चेट्यौ निष्क्रान्ते विवाहचतुश्शालमुद्दिश्य निर्गते । आवन्तिकायास्तु आभ्यां सह गमनं नोक्तं, जनाकीर्णे चतुश्शाले तत्सन्निधानानौचित्यात् । अत एव च चेटी 'आर्ये ! गच्छामि तावदहम्' इति तामामन्त्र्य गच्छन्ती तद्गमनं प्रति न किञ्चिदुक्तवती; उत्तरे वाक्ये वासवदत्तयाप्यात्मनस्तत्र गमनं न सूचितम् ॥

गदेति । एषा कौतुकमालिकाग्राहिणी चेटी । गता, विवाहचतुश्शालम् । अथवा एषा कौतुकमालिका । गता, अर्थात् पद्मावतीहस्तम् । कौतुकमालिकाकार्यं चार्यपुत्रवरणं सद्य एव निर्वर्त्स्यति, किं करोमीति शेषं व्यङ्ग्यम् । अविदेति विषादे । 'अविद विषादे' इति ह्रस्वान्तमेव तु प्राकृतसर्वस्वे पठ्यते । अविदेत्यस्य स्थाने 'अहं पि' इत्येव बहुष्वादर्शेषु दृश्यते । सुषुप्तिरेकैव मम दुःखविनोदनेऽभ्युपायः सम्भावितः । सा च दुर्लभेति मन्यमानाह—**सय्याए** इत्यादि ॥

निष्क्रान्तेति तृतीयाङ्कपरिसमाप्तिः ॥

इति तृतीयोऽङ्कः ॥

अथ चतुर्थोऽङ्कः ।

(ततः प्रविशति विदूषकः ।)

विदूषकः — (सहर्षम्) (क) भो! दिट्ठिआ तत्तहोदो वच्छराअस्स
अभिप्पेदविवाहमङ्गळरमणिज्जो काळो दिट्ठो । भो! को णाम एदं जाणा-
दि — तादिसे वयं अणत्थसळिळावत्ते पक्खित्ता उण उम्मज्जिस्सामो
त्ति । इदाणिं पासादेसु वसीअदि, अन्देउरदिग्घिआसु ह्णाईअदि, पक्कि-

(क) भोः! दिष्टया तत्रभवतो वत्सराजस्याभिप्रेतविवाहमङ्गलरमणीयः कालो दृष्टः । भोः! को नामैतज्जानाति — तादृशे वयमनर्थसलिलावर्ते प्रक्षिप्ताः पुनरुन्मङ्क्ष्याम इति । इदानीं प्रासादेषूष्यते, अन्तःपुरदीर्घिकासु

अथ चतुर्थोऽङ्कः ।

अथ चतुर्थेऽङ्के नायकस्य विवाहानन्तरं पद्मावतीविषयाया रतेः सम्यग्व्यक्तिः, वासवदत्तायाः सपत्नीसम्पत्त्यनन्तरमपि यथापूर्वं सत्त्वावष्टम्भः, वासवदत्तागोचरस्य नायकगतस्य करुणरसस्य परमरमणीयतदनुभावसमर्पकविचित्रसंवादसुधासारसंघटनया परिपोषः, तथाविधतदनुभावसमाकलनेऽप्युत्तमनायिकानुरूपा पद्मावत्या अनीर्ष्या, तेनैव च (समाकलनेन) वासवदत्तायाः परमः समाश्वास इत्येतादृशं वस्तु प्रतिपादयिष्यते । तथाविधसंवादघटनाय च सपरिवारायाः पद्मावत्या उदयनस्य च यथाप्रवेशा वक्तव्यः । तत्सूचनायादौ प्रवेशकं तदीयपरिजनाभ्यां विदूषकचेटीभ्यां योजयिष्यन् प्रथमं विदूषकं नायकवयस्यं प्रवेशयति—**तत** इत्यादि । सहर्षमिति । हर्षे कारणं वत्सराजस्य विशिष्टकालयोगदर्शनं वक्ष्यमाणम् ॥

भो दिट्ठिआ इत्यादि । तत्रभवतः वत्सराजस्य ।, अभिप्रेतविवाहमङ्गलरमणीयः अभिप्रेतेन इष्टेन विवाहमङ्गलेन निर्वृत्तेन रमणीयः सुखकरः । कालः दशा । दिष्ट्या दैवगत्या । दृष्टः अनुभवविषयो जातः, ईदृशसुखदशादर्शनं दैवेनैव घटितं न तु तत्र पुरुषकारसाध्यत्वसम्भावनापि प्रागासीदित्यभिप्रायः । असम्भावनां तां स्फुटयति—**भो को णामेति** । तादृशे अतिमहति । अनर्थसलिलावर्ते अनर्थो दुःखं स्थण्डलवासशरीरासंस्कारानाहारलक्षणं विवरीष्यमाणप्रासादवासादिलक्षणसुखप्रत्यनीकं, तद्रूपे सलिलावर्ते जलभ्रमे । प्रक्षिप्ताः प्रकर्षेण क्षिप्ताः । वत्सराजेन पत्नीशोकवैवशात् तस्मिन् स्वयं मग्नेन तत्समदुःखसुखा वयमपि मज्जिता इति भावः । वयं,

दिमउरसुउमाराणि मोदअखज्जआणि खज्जीअन्ति त्ति अणच्छरसंवासो उत्तरकुरुवासो मए अणुभवीअदि । एक्को खु महन्तो दोसो, मम आहारो सुट्ठु ण परिणमदि । सुप्पच्छदणाए सय्याए णिद्दं ण लभामि, जह वाद-सोणिदं अभिदो विअ वत्तदि त्ति पेक्खामि । भो ! सुहं णामअपरिभूदं अकल्लवत्तं च ।

स्नायते, प्रकृतिमधुरसुकुमाराणि मोदकखाद्यानि खाद्यन्त इत्यनप्सरस्संवास उत्तरकुरुवासो मयानुभूयते । एकः खलु महान् दोषः, ममाहारः सुष्ठु न परिणमति, सुप्रच्छदनायां शय्यायां निद्रां न लभे, यथा वातशोणितमभित इव वर्तत इति पश्यामि । भोः ! सुखं नामयपरिभूतमकल्यवर्तं च ।

पुनः भूयः । उन्मङ्क्ष्यामः तस्मादुन्मग्ना भविष्यामः, उक्तानर्थप्रहाणेन सुखं प्राप्स्याम इति यावत् । इति एतत् । को नाम, जानाति सम्भावयति, न कोऽपीत्यर्थः । 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि' (३-३-१४५) इत्यसम्भावनायां लृट् । नायकेन सहानुभूयमानं सुखं विवृणोति—इदानीमित्यादि । इदानीं नूतनपत्नीपरिग्रहणोत्तरकालेऽस्मिन् । मोदकखाद्यानि मोदका भक्ष्यविशेषाः तद्रूपाणि खाद्यानि । अनप्सरःसंवासः अप्सरस्साहचर्यविहीनः इति प्रसिद्धदेवभूमिवासाद् व्यतिरेककथनम् । उत्तरकुरुवासः स्वर्गवासः अर्थात् स्वर्गवाससौख्यम् । उत्तरकुरवो नाम देवभूमिः । न परिणमति न जीर्यति । सुप्रच्छदनायां शोभनास्तरणायाम् । यथेति, यथा यतः "यथाशब्दस्तु निर्दिष्टस्तुल्ययोगानुमानयोः" इति विश्वः । तथेत्याक्षेपलभ्यम् । यथैवं तथा वातशोणितं वातरक्ताख्यो रोगः । अभित इव देहमभिव्याप्य । वर्तत इति पश्यामि इति योज्यम् । इवशब्दो वाक्यभूषणम् । अत्र वैद्यके—"कृत्स्नं रक्तं विदहत्याशु तच्च दुष्टं स्रस्तं पादयोश्चीयते तु । तत्सम्पृक्तं वायुना दूषितेन तत् प्राबल्यादुच्यते वातरक्तम् ॥" इति, तदुपद्रवोक्तिप्रसङ्गे "अस्वप्नारोचकश्वासमांसकोथशिरोग्रहाः" इति च । आत्मनो रक्तवातामयाभिभवं निरूप्य निर्विद्यमान आह—आमयपरिभूतं रोगोपप्लुतम्, अकल्यवर्तं च कल्यस्य नीरोगस्य वर्तो वर्तनमशनं कल्यवर्तः अपरिणामशङ्कोज्झितं यथेच्छभोजनं, तद्रहितमकल्यवर्तम्, आहारापरिणामभयग्रस्तमित्यर्थः । अथवा कल्यवर्तः प्रातराशः तद्रहितम् । सुखं न, सुखपदव्यपदेश्यं न भवति ॥

(ततः प्रविशति चेटी ।)

चेटी—(क) कहिंणुखु गदो अय्यवसन्तओ । (परिक्रम्यावलोक्य) अह्मो एसो अय्यवसन्तओ । (उपगम्य) अय्य ! वसन्तअ ! को काळो, तुमं अण्णेसामि ।

विदूषकः—(दृष्ट्वा) (ख) किंणिमित्तं भद्दे ! मं अण्णेससि ।

चेटी—(ग) अह्माणं भट्टिणी भणादि—अवि ह्णादो जामादुओ त्ति ।

विदूषकः—(घ) किंणिमित्तं भोदि ! पुच्छादि ।

चेटी—(ङ) किमण्णं । सुमणावण्णअं आणेमि त्ति ।

(क) कुत्रनुखलु गत आर्यवसन्तकः । अहो एष आर्यवसन्तकः । आर्य ! वसन्तक ! कः कालः, त्वामन्विष्यामि ।

(ख) किन्निमित्तं भद्रे ! मामन्विष्यसि ।

(ग) अस्माकं भट्टिनी भणति—अपि स्नातो जामातेति ।

(घ) किन्निमित्तं भवति ! पृच्छति ।

(ङ) किमन्यत् । सुमनोवर्णकमानयामीति ।

अथ नायकवयस्यमन्विष्यन्त्याः पद्मावतीचेट्याः प्रवेशः—**तत** इत्यादि ॥

कहिंणु इत्यादि । अवलोक्य पुरः प्राप्तं विदूषकं दृष्ट्वा । अवलोक्येति क्वचिन्न पठ्यते ॥

किण्णिमित्तं भद्दे ! इत्यादि । किं निमित्तं कस्मै प्रयोजनाय ॥

अह्माणमित्यादि । अपिशब्दः प्रश्ने ॥

किण्णिमित्तं भोदीत्यादि । भवति ! भासमाने ! पृच्छति अर्थाद् भट्टिनी 'भोदी' इत्यपि पाठः, भासमाना भट्टिनीति तदा व्याख्येयम् ॥

किमण्णमित्यादि । सुमनोवर्णकं सुमनसां पुष्पाणां वर्णकस्य अङ्गरागस्य च समाहारः सुमनोवर्णकं, सुमनस्सहितं वर्णकं वा । सुमनावर्णकमिति पाठे सुमना मालतीकुसुमम् । सुमनोवर्णकं नाम दम्पत्युपभोग्यं श्वश्र्वादिभिस्तद्वत्सलाभिः संविधीयत इत्याचारः ॥

विदूषकः—(क) ह्णादो तत्तभवं । सव्वं आणेदु भोदी वज्जिअ भोअणं ।

चेटी—(ख) किंणिमित्तं वारेसि भोअणं ।

विदूषकः—(ग) अधण्णस्स मम कोइळाणं अक्खिपरिवट्टो विअ कुक्खिपरिवट्टो संवुत्तो ।

चेटी—(घ) ईदिसो एव्व होहि ।

विदूषकः—(ङ) गच्छदु भोदी । जाव अहं वि तत्तहोदो सआसं गच्छामि ।

(निष्क्रान्तौ ।)

प्रवेशकः ।

(क) स्नातस्तत्रभवान् । सर्वमानयतु भवती वर्जयित्वा भोजनम् ।

(ख) किंनिमित्तं वारयसि भोजनम् ।

(ग) अधन्यस्य मम कोकिलानामक्षिपरिवर्त इव कुक्षिपरिवर्तः संवृत्तः ।

(घ) ईदृश एव भव ।

(ङ) गच्छतु भवती । यावदहमपि तत्रभवतः सकाशं गच्छामि ।

ह्णादो इत्यादि । भोजनं वर्जयित्वेति भोजनपरायणस्यैव सतो भोजनप्रद्वेषाभिनयेन हास्यविस्रम्भवचनम् ॥

किमित्यादि ॥

अधण्णस्सेति । अक्षिपरिवर्तः दृष्टिपरिभ्रमणम् । कुक्षिपरिवर्त उदरक्षोभः ॥

ईदिसो इति । ईदृश एव कुक्षिपरिवर्तवानेव भव । इदं शापहास्यवचनम् ॥

गच्छदु इत्यादि । तत्रभवतः राज्ञः ॥

प्रवेशक इति । अनेन प्रवेशकेन पूर्वाङ्कान्तोपक्षिप्तस्य विवाहस्य निर्वर्तनं वृत्तमुक्तं, नायकस्योचितदेहयात्रानुवर्तनप्रावण्यं वर्तमानं निवेदितं, नायिकानायकसाचिव्ययोग्ययोश्चेटीविदूषकयोस्तत्पार्श्वगमनोक्तिद्वारा तत्तत्सचिवयोर्नायिकानायकयोः प्रवेशो वर्तिष्यमाणश्च सूचितः ॥

(ततः प्रविशति सपरिवारा पद्मावती आवन्तिकावेषधारिणी वासवदत्ता च ।)

चेटी—(क) किंणिमित्तं भट्टिदारिआ पमदवणं आअदा ।

पद्मावती—(ख) हळा ! ताणि दाव सेहाळिआगुह्मआणि पेक्खामि कुसुमिदाणि वा ण वेत्ति ।

चेटी—(ग) भट्टिदारिए ! ताणि कुसुमिदाणि णाम, पवाळन्तरिदेहिं विअ मोत्तिआलम्बएहिं आइदाणि कुसुमेहिं ।

पद्मावती—(घ) हळा ! जदि एव्वं, किं दाणिं विळम्बेसि ।

(क) किन्निमित्तं भर्तृदारिका प्रमदवनमागता ।

(ख) हळा! ते तावत् शेफालिकागुल्मकाः पश्यामि कुसुमिता वा न वेति ।

(ग) भर्तृदारिके ! ते कुसुमिता नाम, प्रवालान्तरितैरिव मौक्तिकलम्बकैराचिताः कुसुमैः ।

(घ) हळा ! यद्येवं, किमिदानीं विलम्बसे ।

घटयिष्यमाणवस्त्वानुगुण्येन सपरिवारायाः पद्मावत्याः सह वासवदत्तया प्रवेशमाह — तत इत्यादि ॥

किंणिमित्तमित्यादि । भर्तृदारिका भवती । किंनिमित्तं प्रमदवनम् आगता, भर्तरि स्नानानन्तरकरणीयाय भोजनसुमनोवर्णकग्रहणादिकाय चतुश्शालं गते तद्रहितमिदानीमिदं प्रमदवनं किमर्थं प्राप्तासीत्याशयः ॥

हळेति । ते प्रयत्नपरिवर्धिताः । शेफालिकागुल्मकाः निर्गुण्डीप्रतानाः । कुसुमिताः, न वा, इति पश्यामि द्रक्ष्यामि, वर्तमानसामीप्ये लट् । तावदिति वाक्यभूषणम् । ताणीत्यादिर्नपुंसकः संस्कारः प्राकृते पुन्नपुंसकयोरनियमात् ॥

भट्टीति । प्रवालान्तरितैः विद्रुमव्यवहितैः । मौक्तिकलम्बकैरिव मौक्तिकमयीभिर्ललन्तिकाभिरिव स्थितैः 'लम्बकं तु ललन्तिका' इति कोशः । एतेन रक्तिमसम्भिन्नो धवलिमा कुसुमानामुक्तः । आचिताः निबिडिताः ॥

हळेत्यादि । किं विलम्बसे, अर्थात् कुसुमान्यवचेतुं, तानि शीघ्रमवचिन्विति तात्पर्यम् ॥

चेटी—(क) तेण हि इमस्सिं सिळावट्टए मुहुत्तअं उपविसदु भट्टिदारिआ । जाव अहं वि कुसुमावचअं करेमि ।

पद्मावती—(ख) अय्ये ! किं एत्थ उपविसामो ।

वासवदत्ता—(ग) एव्वं होदु ।

(उभे उपविशतः ।)

चेटी—(तथा कृत्वा) (घ) पेक्खदु पेक्खदु भट्टिदारिआ अद्धमणसिळावट्टएहिं विअ सेहालिआकुसुमेहि पूरिअं मे अञ्जलिं ।

पद्मावती—(दृष्ट्वा) (ङ) अहो विइत्तदा कुसुमाणं । पेक्खदु पेक्खदु अय्या ।

(क) तेन ह्यस्मिन् शिलापट्टके मुहूर्तकमुपविशतु भर्तृदारिका । यावदहमपि कुसुमावचयं करोमि ।

(ख) आर्ये ! किमत्रोपविशावः ।

(ग) एवं भवतु ।

(घ) पश्यतु पश्यतु भर्तृदारिका अर्धमनश्शिलापट्टकैरिव शेफालिकाकुसुमैः पूरितं मेऽञ्जलिम् ।

(ङ) अहो विचित्रता कुसुमानाम् । पश्यतु पश्यत्वार्या ।

तेण हीत्यादि । मुहूर्त्तम् अत्यन्तसंयोगे द्वितीया ॥

आर्ये ! इत्यादि । किमिति प्रश्नभङ्ग्या शिलापट्टोपवेशं प्रति आवन्तिकानुमतिप्रार्थनम् ॥

एवमित्यादि । इयमुपवेशानुमतिः ॥

उपविष्टयोर्द्वयोस्त्वरितमवचितैः पुष्पैरञ्जलिमापूर्य दर्शयन्ती ब्रूते — **पेक्खदु** इत्यादि । पश्यतु पश्यत्वित्यादरेण द्विरुक्तिः । अर्धमनश्शिलापट्टकैरिव अर्धारुणत्वान्मनश्शिलापट्टघटितैकदेशैरिवेत्युत्प्रेक्ष्यते । मनश्शिला गिरिप्रभवो रक्तवर्णः कुनटीसंज्ञो धातुः, तस्याः पट्ट आकारविशेषो मनश्शिलापट्टः । अर्धम एकदेशो मनश्शिलापट्टो येषां तैरिति विग्रहः । अद्धापाटः प्रामादिकः ॥

दृष्ट्वा । **अहो** इत्यादि । विचित्रता द्विवर्णता ॥

वासवदत्ता — (क) अहो दस्सणीअदा कुसुमाणं ।

चेटी — (ख) भट्टिदारिए! किं भूयो अवइणुस्सं ।

पद्मावती — (ग) हळा! मा मा भूयो अवइणिअ ।

वासवदत्ता — (घ) हळा! किंणिमित्तं वारेसि ।

पद्मावती — (ङ) अय्यउत्तो इह आअच्छिअ इमं कुसुमसमिद्धिं पेक्खिअ सम्माणिदा भवेअं ।

वासवदत्ता — (च) हळा! पिओ दे भत्ता ।

पद्मावती — (छ) अय्ये! ण आणामि, अय्यउत्तेण विरहिदा उक्कण्ठिदा होमि ।

(क) अहो दर्शनीयता कुसुमानाम् ।

(ख) भर्तृदारिके! किं भूयोऽवचेष्यामि ।

(ग) हळा! मा मा भूयोऽवचित्य ।

(घ) हळा! किन्निमित्तं वारयसि ।

(ङ) आर्यपुत्र इहागत्येमां कुसुमसमृद्धिं दृष्ट्वा सम्मानिता भवेयम् ।

(च) हळा! प्रियस्ते भर्ता ।

(छ) आर्ये! न जानामि, आर्यपुत्रेण विरहितोत्कण्ठिता भवामि ।

अहो इत्यादि । अहो आश्चर्ये ॥

भट्टिदारिए इत्यादि । भूयः पुनरपि ॥

हळेति । मा मा अवचित्य मा तावदवचिनु । इहापि माशब्दयोगे क्त्वाप्रयोगोऽपाणिनीयः ॥

हळा किमित्यादि । वारयसि अर्थात् पुष्पावचयम् ॥

अय्यउत्तो इत्यादि । इहार्यपुत्रेणेति कर्तृतृतीयान्तमपेक्षितम् । तेन, 'अय्यउत्तेण' इति लेख्ये अय्यउत्तो इति मातृकाग्रन्थेषु लेखनं लेखकप्रमादकृतं बोद्धव्यम् । उपलब्धस्यैव वा पाठस्य प्राकृते पुन्नपुंसकानियमवद् विभक्त्यनियमोऽप्यस्तीत्याश्रित्य आर्यपुत्रेणेति संस्कृतं कल्पनीयम् । भवेयमिति प्रार्थनायां लिङ् ॥

हळेति । भर्ता ते प्रियः प्रीतिविषयः । अत एवं ब्रवीषीति वाक्यशेषः ॥

वासवदत्ता—(आत्मगतम्) (क) दुक्खरं खु अहं करेमि, इअं वि णाम एव्वं मन्तेदि ।

चेटी—(ख) अभिजादं खु भट्टिदारिआए मन्तिदं—पिओ मे भत्तत्ति ।

पद्मावती—(ग) एक्को खु मे सन्देहो ।

वासवदत्ता—(घ) किं किं ।

पद्मावती—(ङ) जह मम अय्यउत्तो, तह एव्व अय्याए वासवदत्ताए त्ति ।

वासवदत्ता—(च) अदो वि अहिअं ।

(क) दुष्करं खल्वहं करोमि । इयमपि नामैवं मन्त्रयते ।

(ख) अभिजातं खलु भर्तृदारिकया मन्त्रितं—प्रियो मे भर्तेति ।

(ग) एकः खलु मे सन्देहः ।

(घ) किं किम् ।

(ङ) यथा ममार्यपुत्रस्तथैवार्याया वासवदत्ताया इति ।

(च) अतोऽप्यधिकम् ।

आर्ये! इति । आर्ये ! न जानामि भर्तरि मम प्रीतिरस्ति नास्तीति विशेषतो वक्तुं नाहं जानामि, किन्त्वेतावत् ते सङ्क्षेपाद् वच्मीत्यर्थः । तदेवाह — आर्यपुत्रेण विरहिता अहम्, उत्कण्ठिता पर्युत्सुका भवामि ॥

दुक्खरमित्यादि । इयमपि आर्यपुत्रेण सहाचिरोपजातसंस्तवापीत्यर्थः ॥

अभीत्यादि । अभिजातं न्याय्यम् ॥

भर्तृविषयाया आत्मप्रीतेरियत्तां प्रियसखीमावन्तिकां भङ्ग्यन्तरेण बोधयितुं तन्मुखाद् वासवदत्ताप्रीतिं बोद्धुं च प्रश्नमुपक्षिपति — **एक्को खु** इत्यादि ॥

किमित्यादि । सन्देहविषयश्रवणकौतुकाद् द्विरुक्तिः ॥

जहेत्यादि । यथेत्यनन्तरं प्रिय इति प्रकरणाद् गम्यम् । तथैवेति वाक्ये च प्रश्नकाकुः, किं तथैव उतान्यथेत्यर्थः ॥

अदो वीति । अतोऽपि त्वत्तोऽपीत्यर्थः । अधिकं, प्रिय इत्यनुवर्तते ॥

पद्मावती—(क) कहं तुवं जाणासि ।

वासवदत्ता—(आत्मगतम्) (ख) हं, अय्यउत्तपक्खवादेण अदिक्कन्दो समुदाआरो । एव्वं दाव भणिस्सं । (प्रकाशम्) जइ अप्पो सिणेहो, सा सजणं ण परित्तजदि ।

पद्मावती — (ग) होदव्वं ।

चेटी—(घ) भट्टिदारिए! साहु भट्टारं भणाहि—अहं पि वीणं सिक्खिस्सामि त्ति ।

(क) कथं त्वं जानासि ।

(ख) हम्, आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः । एवं तावद् भणिष्यामि । यद्यल्पः स्नेहः, सा स्वजनं न परित्यजति ।

(ग) भवितव्यम् ।

(घ) भर्तृदारिके ! साधु भर्तारं भण—अहमपि वीणां शिक्षिष्य इति ।

कहमित्यादि । कथं केन प्रकारेण ॥

हमित्यादि । जइ इति । स्नेहः भर्तृविषयः, अल्पो यदि, भवतीति शेषः । सा वासवदत्ता । स्वजनं मातापितरौ न परित्यजति, भर्तृस्नेहानल्पतैकप्रयोज्यस्तत्कर्तृकः स्वजनपरित्यागो भर्तृस्नेहाल्पत्वे न सम्भाव्य इत्यर्थः । सा तु स्वजनं परित्यक्तवतीत्यतस्तत्कृतस्वजनपरित्यागान्यथानुपपत्त्या भर्त्तरि तस्याः स्नेहस्याधिकत्वमनुमीयत इति भावः । यथा च स्वजनपरित्यागेन वासवदत्तायाः स्वभर्त्रनुवृत्तिः, तथा प्रतिज्ञानाटिकायां स्पष्टम् । अत्र परित्यजतीति लट् साधुत्वमात्राय उच्चैरित्यादाविव प्रथमा, वर्तमानत्वं तु न विवक्षितं, यदिशब्दघटितवाक्यप्रतिपाद्ययोर्हेतुहेतुमद्भावयोग्यक्रिययोः कालविशेषौदासीन्येनैव सम्भावनाविषयतया प्रतीतेर्दर्शनात् । यथा—यदि जनः कृष्णं नमति सुखं याति, यदि जनः पापाद् बिभेति सत्यं वदति, नासत्यं वदतीति । कालविशेषावसायस्तु प्रकरणादिति बोद्धव्यम् ॥

होदव्वमिति । युक्तमित्यर्थः । 'जुज्जइ' इत्यपि पाठः ॥

भट्टीत्यादि । अहमपीति पूर्वशिक्षितवासवदत्तासमुच्चयः । भर्तृवल्लभत्वसिद्ध्युपायोपदेशश्चायम् ॥

पद्मावती—(क) उत्तो मए अय्यउत्तो ।

वासवदत्ता—(ख) तदो किं भणिदं ।

पद्मावती—(ग) अभणिअ किञ्चि दिग्घं णिस्सासिअ तुह्णीओ संवुत्तो ।

वासवदत्ता—(घ) तदो तुवं किं विअ तक्केसि ।

पद्मावती—(ङ) तक्केमि अय्याए वासवदत्ताए गुणाणि सुमरिअ दक्खिण्णदाए मम अग्गदो ण रोदिदि त्ति ।

वासवदत्ता—(आत्मगतम्) (च) धञ्ञा खु ह्मि, जदि एव्वं सच्चं भवे ।

(क) उक्तो मयार्यपुत्रः ।

(ख) ततः किं भणितम् ।

(ग) अभणित्वा किञ्चिद् दीर्घं निःश्वस्य तूष्णीकः संवृत्तः ।

(घ) ततस्त्वं किमिव तर्कयसि ।

(ङ) तर्कयाम्यार्याया वासवदत्ताया गुणान् स्मृत्वा दाक्षिण्यतया ममाग्रतो न रोदितीति ।

(च) धन्या भल्वस्मि, यद्येवं सत्यं भवेत् ।

उत्तो इत्यादि । उक्तः प्रार्थितः ॥

तदो इत्यादि । स्वगोचरभर्तृस्नेहपरीक्षावसरस्य यावल्लाभमनुपेक्षणीयत्वात् प्रश्नः ॥

अभणिअ इत्यादि । दीर्घनिःश्वासतूष्णीकत्वाभ्यां वासवदत्तागतशिष्यतोचितगुणसमृद्ध्यादिस्मरणोद्भिन्नशोकानुभावाविष्कारः ॥

तदो इत्यादि । तर्कयसि ऊहसे ॥

तक्केमीत्यादि । दाक्षिण्यतया दक्षिणतया, दाक्षिण्यशब्दः स्वार्थष्यञन्त आलस्यशब्दवत् । 'दक्खिणदाए' इति वा पाठः ॥

धञ्ञा खु इत्यादि । एवम् एतदुक्तप्रकारं वाक्यमित्यर्थः ।

(ततः प्रविशति राजा विदूषकश्च ।)

विदूषकः—(क) ही ही । पचिअपडिअबन्धुजीवकुसुमविरळवादरमणिज्जं पमदवणं । इदो दाव भवं ।

राजा—वयस्य ! वसन्तक ! अयमयमागच्छामि ।

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः ।
तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ॥ १ ॥

(क) ही ही । प्रचितपतितबन्धुजीवकुसुमविरलपातरमणीयं प्रमदवनम् । इतस्तावद् भवान् ।

अथ निर्वृत्तस्नानानन्तरकरणीयस्य नायकस्य वयस्यसहितस्य प्रमदवनमुद्दिश्य प्रवेशः—तत इत्यादि ।

हीहीत्यादि । हीहीति सन्तोषध्वनिः । प्रचितशब्दः समृद्धवचनः । बन्धुजीवशब्दो बन्धूकाख्यरक्तपुष्पतरुवचनः ॥

वयस्येत्यादि । स्वावस्थामाह—कामेनेति । कामेन मन्मथेन कर्त्रा । तदा यदा प्रद्योतमन्त्री हस्तिच्छद्मप्रयोगेण मां स्वहस्तगतमकरोत् तस्मिन् काले । उज्जयिनीं गते । अवन्तिराजतनयां वासवदत्ताम् । स्वैरं विस्रब्धम् । दृष्ट्वा । कामपि अनिर्वचनीयां । दशां गते । मयि । पञ्च, इषवो बाणाः, पातिताः । इष्वपरिशेषणोक्त्या वासवदत्ताविषयस्य तदुत्पादितस्य रागस्य परमकोटिप्राप्तिः प्रतिपादिता । न च तेऽद्य यावन्मद्धृदयादुत्खाय स्वतूणीरं प्रत्यानीता इत्याह—हृदयं मदीयम् । अद्यापि तैः इषुभिः । सशल्यमेव कीलितमेव, वासवदत्तापायेऽपि तद्विषयो मे हृदि रागस्तिष्ठत्येवेति भावः । एवमुपयुक्तसर्ववेधसाधनेन कामेन भूयोऽपि मयि वेध आरब्ध इत्याह—वयम् अहम् । भूयः पुनः । विद्धाश्च अर्थात् पद्मावतीमुद्दिश्य । चशब्दः सशल्यहृदयत्वसमुच्चयार्थः । नवस्यास्य वेधस्य साधनं षष्ठ एव कश्चिद् बाणो भवितुमर्हतीति मत्वाह — मदनः, पञ्चेषुः यदा पञ्चसङ्ख्याकबाणयुक्तो यदि, मदने पञ्चेषौ सतीत्यर्थः । अयं नववेधसाधनीभूतः । षष्ठः शरः । कथं पातितः पञ्चाधिकबाणानिस्स्वेन मदनेन कुत आसाद्य प्रयुक्तः । वासवदत्तानुरागेण तदपायानपायिना सह पद्मावत्यनुरागोऽपि मम हृदये लब्धपद

विदूषकः—(क) कहिंणुखु गदा तत्तहोदी पदुमावदी, ळदामण्डवं गदा भवे, उदाहो असणकुसुमसञ्चिदं वग्घचम्मावगुण्ठिदं विअ पव्वदतिळअं णाम सिळापट्टअं गदा भवे, आदु अधिअकडुअगन्धसत्तच्छदवणं पविट्ठा भवे, अहव आळिहिदमिअपक्खिसङ्कुळं दारुपव्वदअं गदा भवे। (ऊर्ध्वमवलोक्य) ही ही सरअकाळणिम्मळे अन्तरिक्खे पसादिअबळदेवबाहुदंसणीअं सारसपन्तिं जाव समाहिदं गच्छन्तिं पेक्खदु दाव भवं।

राजा—वयस्य! पश्याम्येनाम्,

ऋज्वायतां च विरलां च नतोन्नतां च
सप्तर्षिवंशकुटिलां च निवर्तनेषु।

(क) कुत्रनुखलु गता तत्रभवती पद्मावती, लतामण्डपं गता भवेद्, उताहो असनकुसुमसञ्चितं व्याघ्रचर्मावगुण्ठितमिव पर्वततिलकं नाम शिलापट्टकं गता भवेद्, अथवा अधिककटुकगन्धसप्तच्छदवनं प्रविष्टा भवेद्, अथवालिखितमृगपक्षिसङ्कुलं दारुपर्वतकं गता भवेत्। ही ही शरत्कालनिर्मलेऽन्तरिक्षे प्रसादितबलदेवबाहुदर्शनीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीं पश्यतु तावद् भवान्।

एवेति भावः। यदाशब्दो यद्यर्थे सिद्धाभ्युपगमे, यथा—"पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य कः" (भर्तृ०) इति। करीरविटपे निष्पत्रे सति वसन्तस्य कोऽपराध इति हि तदर्थः। अत्र वयमिति बहुवचनम् 'अस्मदो द्वयोश्च' (१-२-५९) इति ॥ १ ॥

कहिंमित्यादि। असनकुसुमसञ्चितं सर्जकपुष्पव्याप्तम्। व्याघ्रचर्मावगुण्ठितं व्याघ्रचर्मणा छादितम्। पर्वततिलकमिति प्रयत्नारोहणीयत्वाद्यनुरूपं शिलापट्टकस्य नामधेयम्। सप्तच्छदशब्दः सप्तपर्णाख्यवृक्षवाची। दारुपर्वतकं दारुनिर्मितां पर्वतप्रतिकृतिम्। एवं वदन्नेव यदृच्छयोर्ध्वमवलोक्याह—हीहीत्यादि। हीहीशब्दः कौतुकोक्तिः। प्रसादितबलदेवबाहुदर्शनीयामिति दैर्घ्यधावल्ययोगाद् धौतबलभद्रबाहुसाम्यम्। सारसपङ्क्तिं सारसाख्यपक्षिभेदश्रेणीम्। समाहितम् अवहितं यथा भवति तथा गच्छन्तीम्। अवधानं च वक्ष्यमाणऋज्वायतत्वाद्यविघातानुकूला गत्येकाग्रता ॥

वयस्येति। पश्याम्येनामिति श्लोकान्वयि।

निर्मुच्यमानभुजगोदरनिर्मलस्य
सीमामिवाम्बरतलस्य विभज्यमानाम् ॥ २ ॥

चेटी—(क) पेक्खदु पेक्खदु भट्टिदारिआ एदं कोकणदमाळापण्डररमणीअं सारसपन्ति जाव समाहिदं गच्छन्ति । अम्मो भट्टा ।

पद्मावती—(ख) हं अय्यउत्तो । अय्ये ! तव कारणादो अय्यउत्तदंसणं परिहरामि । ता इमं दाव माहवीळदामण्डवं पविसामो ।

वासवदत्ता—(ग) एव्वं होदु ।

(तथा कुर्वन्ति ।)

(क) पश्यतु पश्यतु भर्तृदारिका एतां कोकनदमालापाण्डुररमणीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीम् । अहो भर्ता ।

(ख) हम् आर्यपुत्रः । आर्ये ! तव कारणादार्यपुत्रदर्शनं परिहरामि । तदिमं तावन्माधवीलतामण्डपं प्रविशामः ।

(ग) एवं भवतु ।

ऋज्वायतामिति । ऋज्वायताम् अवक्रदीर्घां च । विरलां परस्परसान्तरावस्थानां च । नतोन्नतां दन्तुरां च । निवर्तनेषु दिगन्तराद् दिगन्तरं प्रति विवलनेषु । सप्तर्षिवंशकुटिलां सप्तर्षिवंशमिव सप्तर्षिसमाख्यतारकामण्डलमिव कुटिलां वक्रसन्निवेशां च । निर्मुच्यमानभुजगोदरनिर्मलस्य मुच्यमानकञ्चुकसर्पोदरस्वच्छस्य । अम्बरतलस्य विभज्यमानां विविच्यमानां विभागाय कल्प्यमानां वा । सीमामिव मर्यादारेखामिव स्थिताम् । एनां सारसपङ्क्तिं । पश्यामि । अत्र स्वभावोक्त्युपमयोः संकीर्णयोरुपमोत्प्रेक्षाभ्यां संसृष्टाभ्यां संसृष्टिः । इयं नायकस्याकाशदर्शनोन्मुखत्वघटना पद्मावत्यादीनां नायकदृष्ट्यविषयीभावपूर्वस्य लतामण्डपनिलयनस्य वक्ष्यमाणस्य सुकरत्वार्थम् ॥ २ ॥

अन्यतस्तामेव सारसपङ्क्तिं पश्यन्त्याश्चेट्या उक्तिः—पेक्खदु इत्यादि । इह कोकनदशब्द उत्पलमात्रोपलक्षकः, न तु रक्तोत्पलपरः । एवं वदन्त्येव चेटी नायकं दृष्ट्वा सम्भ्रान्ताह—अहो भर्त्ता, इहागत इति शेषः ॥

हमित्यादि । आर्यपुत्रदर्शनम् आर्यपुत्रस्यास्मत्कर्मकं दर्शनम् ॥

एव्वमिति । एवं भवत्विति लतामण्डपप्रवेशानुमतिः ॥

विदूषकः—(क) तत्तहोदी पदुमावदी इह आअच्छिअ णिग्गदा भवे ।

राजा—कथं भवान् जानाति ।

विदूषकः—(ख) इमाणि अवइदकुसुमाणि सेफालिआगुच्छआणि पेक्खदु दाव भवं ।

राजा—अहो विचित्रता कुसुमस्य वसन्तक ! ।

वासवदत्ता—(आत्मगतम्) (ग) वसन्तअसङ्कित्तणेण अहं पुण जाणामि उज्जइणीए वत्तामि त्ति ।

राजा—वसन्तक ! अस्मिन्नेवासीनौ शिलातले पद्मावतीं प्रतीक्षिष्यावहे ।

(क) तत्रभवती पद्मावतीहागत्य निर्गता भवेत् ।

(ख) इमानपचितकुसुमान् शेफालिकागुच्छकान् प्रेक्षतां तावद् भवान् ।

(ग) वसन्तकसङ्कीर्तनेनाहं पुनर्जानामि उज्जयिन्यां वर्त इति ।

तथा कुर्वन्तीति लतामण्डपे पद्मावत्यादीनामज्ञातप्रवेश उक्तः । एषा च घटना लतामण्डपाद् बहिर्नायकस्य सवयस्यस्य प्रवेशघटनद्वारेण तद्विस्रम्भभाषितं नायिकां श्रावयितुम् ॥

पद्मावत्यन्वेषणं पूर्वप्रक्रान्तमनुसरन्नूहते — **तत्तहोदी**त्यादि ॥

ऊहस्थानं पृष्ट आह — **इमाणी**त्यादि । प्रेक्षतां प्रकर्षेण पश्यतु । अवचितकुसुमशेफालिकागुच्छकावलोकनेन पद्मावत्यागमनिर्गमौ तवापि सुज्ञानौ । न हि पद्मावतीमन्तरेण प्रमदवनपुष्पाणि कश्चिदन्योऽवचिनुयादिति भावः । 'अवइदाणि सेफालिआकुसुमाणि पेक्खदु दाव भवम्' इति क्वचित् पाठः ॥

अहो इत्यादि । विचित्रता अनेकवर्णयोगित्वम् ॥

नायककृतवसन्तकाभिसम्बोधनश्रवणं नित्याभ्यस्तचरमासाद्य झटित्युद्बुद्धोज्जयिनीस्थितिस्मृतिरात्मनि चिन्तयति — **वसन्तकसङ्कित्तणेण**त्यादि ॥

वसन्तकेत्यादि । प्रतीक्षिष्यावहे प्रतिपालयावः ॥

विदूषकः—(क) भो ! तह । (उपविश्योत्थाय) ही ही सरअकाळतिक्खो दुस्सहो आदवो । ता इमं दाव माहवीमण्डवं पविसामो ।

राजा—बाढम् । गच्छाग्रतः ।

विदूषकः—(ख) एव्वं होदु ।

(उभौ परिक्रामतः ।)

पद्मावती—(ग) सव्वं आउळं कत्तुकामो अय्यवसन्तओ । किं दाणिं करेह्म ।

चेटी—(घ) भट्टिदारिए ! एदं महुअरपरिणिळीणं ओळंबळदं ओधूय भट्टारं वारइस्सं ।

(क) भोस्तथा । ही ही शरत्कालतक्ष्णो दुःसह आतपः । तदिमं तावन्माधवीमण्डपं प्रविशावः ।

(ख) एवं भवतु ।

(ग) सर्वमाकुलं कर्तुकाम आर्यवसन्तकः । किमिदानीं कुर्मः ।

(घ) भर्तृदारिके ! एतां मधुकरपरिनिलीनामवलम्बलतामवधूय भर्तारं वारयिष्यामि ।

भोस्तथेत्युपविश्य तीक्ष्णातपतप्तस्य शिलातलस्य स्पर्शमसहमानस्तत उत्थायाह — **हीहीत्यादि** ॥

बाढमित्यादि । बाढमित्यङ्गीकारे ॥

एव्वमित्यादि ॥

उभावित्यादि । उभौ परिक्रामतः लतामण्डपं प्रति चलतः ॥

सव्वमित्यादि । सर्वम् आवन्तिकारक्षणरूपं कार्यम् । एकस्मिन्नेव तस्मिन् सकलकार्यसमुदायतुल्यगौरवत्वाभिमानात् सर्वत्वारोपः, सर्वप्रयत्नसाध्यत्वाद्वा । कर्तुकाम इत्यत्र कामशब्दो लक्षणयेच्छाजन्यमारम्भमाह, कार्याकुलत्वकरणं प्रति वसन्तकस्य वस्तुत इच्छाया अभावाद् आरम्भस्य च लतामण्डपप्रवेशनरूपस्य सत्त्वात् । आशङ्कायां वा कामशब्दो यथा कूलं पिपतिषतीत्यत्र सन्, कूलपतनस्येव वसन्तककर्तृकस्य कार्याकुलत्वकरणस्याशङ्क्यमानमात्रत्वात् ॥

भट्टीति । मधुकरपरिनिलीनां मधुकराः परिनिलीनाः परितः पुष्पमधुपाने-

पद्मावती—(क) एव्वं करेहि ।

(चेटी तथा करोति ।)

विदूषकः—(ख) अविहा अविहा, चिट्ठदु चिट्ठदु दाव भवं ।

राजा—किमर्थम् ।

विदूषकः—(ग) दासीएपुत्तेहि महुअरेहि पीडिदो ह्मि ।

राजा—मा मा भवानेवम् । मधुकरसन्त्रासः परिहार्यः । पश्य,

मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः ।
पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः ॥ ३ ॥

(क) एवं कुरु ।

(ख) अविह अविह, तिष्ठतु तावद् भवान् ।

(ग) दास्याःपुत्रैर्मधुकरैः पीडितोऽस्मि ।

काग्र्यस्तिमितस्थितयः यस्यां तां तथाभूतां, परनिपात आहिताग्न्यादित्वात्, मधुकरैः परिनिलीनामिति तत्पुरुषो वा लीयतेः सकर्मकत्वाश्रयणात् । अवलम्बलताम् अवलम्बभूतां लतान्तराश्रयभूतां लतां यस्यामवधूतायां लतान्तराण्यवधूतानि भवन्ति, तां प्रधानलतामित्यर्थः । अवधूय कम्पयित्वा, अवधूननेन लतामण्डपस्य द्वारं लताकम्पनवशोच्चलितभ्रमरसम्भ्रमदुष्प्रवेशमापाद्येत्यर्थः । भर्तारं, वारयिष्यामि लतामण्डपान्तःप्रवेशसङ्कल्पान्निवर्तयिष्यामि ॥

एव्वमित्यादि ॥

चेटीत्यादि ॥

अविहेत्यादि । अविहेति खेदे । तिष्ठतु तिष्ठत्विति गतिवारणम् ॥

किमर्थमिति । गतिवारणनिमित्तप्रश्नः ।

दासीत्यादि । दास्याःपुत्रैरित्याक्रोशाद् मधुकरेषु कोपसूचनम् । 'षष्ठ्या आक्रोशे' (६-३-२१) इत्यलुक् ॥

मेति । भवान्, एवं सम्भ्रमेण । मा मा, वदत्विति शेषः । मधुकरसन्त्रासः भ्रमरोद्वेजनं । परिहार्यः न कर्तव्यः । पश्य वक्ष्यमाणं तत्र हेतुं जानीहीत्यर्थः ।

मध्विति । मधुमदकलाः मधुमदेन कला अव्यक्तनादा अथवा मूकाः प्रियो-

तस्मादिहैवासिष्यावहे ।

विदूषकः—(क) एव्वं होदु ।

(उभावुपविशतः ।)

चेटी—(ख) भट्टिदारिए ! रुद्धा खु ह्म वयं ।

पद्मावती—(ग) दिट्ठिआ उवविट्ठो अय्यउत्तो ।

(क) एवं भवतु ।

(ख) भर्तृदारिके ! रुद्धाः खलु स्मो वयम् ।

(ग) दिष्ट्योपविष्ट आर्यपुत्रः ।

पभोगसमाधिवशात्, 'जलो मूकः कलोऽप्यवाक्' इति यादवः । मदनार्त्ताभिः कामपीडिताभिः । प्रियाभिः, उपगूढाः आलिङ्गिताः । आभ्यां विशेषणाभ्यां परमानन्दानुभवसमाधिः सूचितः । मधुकराः, पादन्यासविषण्णाः सन्तः पादन्यासेन लतामण्डपान्तःप्रवेशार्थं चिकीर्षितेन विषण्णाः पीडिताः सन्तः । एतेन लतामण्डपद्वारस्य भ्रमराकीर्णतोक्ता । वयमिव, कान्तावियुक्ताः स्युः प्रियाविरहिता भवेयुः । प्रियाविरहशोकश्च नामेदृग्रूप इति सम्यगहं जाने; तस्य तानपि भाजनं मा तावत् करवामेति भावः । अत्र नायकेनोपमाभङ्ग्यात्मनः कान्तावियोगोत्कीर्तनमनुभूयमानप्रत्यग्रप्रणयिनीसम्प्रयोगहर्षन्यक्कारेण प्रभवतो वासवदत्ताविषयस्य नायकगतस्य शोकस्यानुभावः । ईदृशाश्चमत्कारिणोऽन्येऽप्यनुभावा अस्मिन्नङ्के पञ्चमे षष्ठे च वासवदत्तोदयनसमागमं यावदाविष्करिष्यन्ते; यैर्नायकगतः शोकः स्वादुतां नीयमानः करुणरसः । स एव नायकशोको वासवदत्तायाः प्रियविप्रलम्भदुःखस्य प्रकर्षक इति तद्गतस्य प्रवासविप्रलम्भस्योद्दीपनविभावतां प्रतिपद्यत इत्याद्यूह्यम् ॥ ३ ॥

उक्तेन हेतुना लतामण्डपाद् बहिरेवोपवेक्ष्याव इत्याह — **तस्मादित्यादि** ॥

एव्वमित्यादि ॥

द्वारान्तिकोभयोपवेशेन निर्गमप्रतिबन्धं गणयन्त्याह — **भट्टीत्यादि** । इदं वाक्यमनन्तरचेटीवाक्यपूर्वशेषतया क्वचित् पठ्यते ॥

दिट्ठिआ इति । आर्यपुत्रः, दिष्ट्या दैवात् । उपविष्टः न त्वन्तः प्रविष्टः अस्मद्रोधेऽप्यन्तरप्रवेशात् परमो मे लाभ इति भावः ॥

वासवदत्ता—(आत्मगतम्) (क) दिट्ठिआ पकिदित्थसरीरो अय्यउत्तो ।

चेटी—(ख) भट्टिदारिए ! सस्सुपादा खु अय्याए दिट्ठी ।

वासवदत्ता—(ग) एसा खु महुअराणं अविणआदो कासकुसुमरेणुणा पडिदेण सोदआ मे दिट्ठी ।

पद्मावती—(घ) जुज्जइ ।

विदूषकः—(ङ) भो ! सुण्णं खु इदं पमदवणं । पुच्छिदव्वं किञ्चि अत्थि । पुच्छामि भवन्तं ।

राजा—छन्दतः ।

(क) दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः ।

(ख) भर्तृदारिके ! साश्रुपाता खल्वार्याया दृष्टिः ।

(ग) एषा खलु मधुकराणामविनयात् काशकुसुमरेणुना पतितेन सोदका मे दृष्टिः ।

(घ) युज्यते ।

(ङ) भोः ! शून्यं खल्विदं प्रमदवनम् । प्रष्टव्यं किञ्चिदस्ति । पृच्छामि भवन्तम् ।

भर्तुरिदम्प्रथमदर्शने तद्देहस्वास्थ्यस्य प्रथमगणनीयत्वादाह — **दिट्ठिआ** इत्यादि ॥

एकत इष्टतमेन भर्तृस्वास्थ्येनाश्वसत्या अपि वासवदत्ताया अपरत आत्मविषयकभर्तृस्नेहस्य पत्न्यन्तरपरिग्रहानिमित्तां हानिं तेनैव भर्तृस्वास्थ्येन हेतुनानुमिमानाया दृष्टौ झटिति दुःखाद् बाष्प उद्गतः । तमुपलभ्याह—**भट्टिदारिए** इत्यादि ॥

नायकदर्शनं बाष्पोद्गमे कारणं मा शङ्कीति कारणान्तरं कल्पयित्वाह — **एसा खु** इत्यादि । अविनयाद् बम्भ्रमणात् ॥

जुज्जइ इति ॥

अथ विदूषकनिष्क्रमणं यावदनन्तरोक्तवासवदत्तादुःखप्रशमनक्षमाणां वासवदत्ताविषयनायकगतस्नेहानुभावानां प्रपञ्चनचमत्कारः । तदनुकूलं विदूषकस्य प्रश्नमुपन्यस्यति — **भो सुण्ण**मित्यादि । शून्यमित्यनेन यथेच्छरहस्यसङ्कथनार्हतोक्ता ॥

छन्दत इति । छन्दतः यथाभिप्रायम्, पृच्छेति विपरिणतानुषङ्गः ॥

विदूषकः—(क) का भवदो पिआ, तदाणिं तत्तहोदी वासवदत्ता इदाणिं पदुमावदी वा ।

राजा—किमिदानीं भवान् महति बहुमानसङ्कटे मां न्यस्यति ।

पद्मावती—(ख) हळा ! जादिसे सङ्कडे निक्खित्तो अय्यउत्तो ।

वासवदत्ता—(आत्मगतम्) (ग) अहं अ मन्दभाआ ।

विदूषकः—(घ) सेरं सेरं भणादु भवं । एक्का उवरदा, अवरा असण्णिहिदा ।

(क) का भवतः प्रिया, तदानीं तत्रभवती वासवदत्ता इदानीं पद्मावती वा ।

(ख) हळा ! यादृशे सङ्कटे निक्षिप्त आर्यपुत्रः ।

(ग) अहं च मन्दभागा ।

(घ) स्वैरं स्वैरं भणतु भवान् । एकोपरता, अपरा असन्निहिता ।

केत्यादि । तदानीम् अतीतकाले स्थितेति शेषः । एवम् इदानीमित्यत्र वर्तमानेति शेषः । प्रियाशब्दश्च प्रियतरार्थकः उभयविषयकप्रीतिसामान्यस्यावगतावश्यम्भावस्य जिज्ञास्यत्वायोगात् । तदयं प्रश्नार्थः—किमतीता वासवदत्ता प्रियतरा उत वर्तमाना पद्मावतीति ॥

किमिदानीमित्यादि । बहुमानसङ्कटे बहुमानविषये सङ्कटे तारतम्यकथनक्लेशे । किं न्यस्यतीति निक्षेपणस्य निष्फलत्ववचनम् ॥

हळेत्यादि । यादृशे यत्प्रकारे । तादृशः सङ्कटो न प्रसञ्जनीय इति तद्वृत्तेन गम्येन यद्वृत्तस्योपसंहारः ॥

अहमिति । मन्दभागा अल्पभाग्या । अहं च, यादृशे सङ्कटे निक्षिप्तेत्यनुषञ्जनीयम्, न केवलमार्यपुत्रः प्रीतितारतम्यस्य कथनसङ्कटे निक्षिप्तः, किन्तु अहमपि श्रवणसंकटे निक्षिप्तेत्यर्थः । स्वभाग्याल्पत्वात् स्वविषयप्रीतेरल्पत्वमेवार्यपुत्रः श्रावयिष्यतीति शङ्कया मन्दभागेति विशेषणसूचितया श्रवणसङ्कटः । अन्या व्याख्या—चशब्दस्तुशब्दार्थे । अहं तु मन्दभागा बहुमानसङ्कटविषयभूतयोरावयोर्मध्ये पद्मावत्यपेक्षयाहमल्पभाग्यत्वरूपविशेषवतीत्यर्थः । तेन मद्विषयप्रीतेरल्पत्वमेवार्यपुत्रो वक्ष्यतीत्यभिप्रायः ॥

सेरमिति । स्वैरं विस्रब्धम् । विस्रम्भदार्ढ्याय च द्विरुक्तिः ॥

राजा—वयस्य ! न खलु न खलु ब्रूयाम् । भवांस्तु मुखरः ।

पद्मावती—(क) एत्तएण भणिदं अय्यउत्तेण ।

विदूषकः—(ख) भो ! सच्चेण सवामि, कस्स वि ण आचक्खिस्सं । एसा सन्दट्ठा मे जीहा ।

राजा—नोत्सहे सखे ! वक्तुम् ।

(क) एतावता भणितमार्यपुत्रेण ।

(ख) भोः ! सत्येन शपामि, कस्मा अपि नाख्यास्ये । एषा सन्दष्टा मे जिह्वा ।

वयस्येति । न खलु ब्रूयां नैव कथयेयम् । द्विरुक्तिर्दार्ढ्याय । कुतस्तत्राह—भवांस्तु, मुखरः वाचालः मदभिप्रायरहस्यं मयोच्यमानं स्वहृदये गोपायितुमशक्त इति यावत् ॥

एत्तएणेति । आर्यपुत्रेण, एतावता इदम्परिमाणेनाल्पाक्षरेण 'भवांस्तु मुखर' इत्येवंरूपेण वाक्येनेत्यर्थः । भणितं 'वासवदत्ता मम प्रिये'त्येवमात्मकं हृद्गतं वस्तु-रहस्यं ध्वनितमित्यर्थः । तदेव हि विदूषकमुखरभावाद् रक्षणीयं, विदूषकेण मह्यं निवेद्येतेति शङ्कया; पक्षान्तरं तु विदूषकमुखरभावान्न रक्षणीयम्, उपरतनायिकावि-षयप्रीत्यल्पत्वप्रकाशने दोषाभावादित्याशयः ॥

विदूषकस्तु अवैदग्ध्यान्नायकहृदयमजानन्नाह । अथवा स विदग्ध एव नायकेन स्वाभिप्रायं स्पष्टमाख्यापयितुं तदाशयानभिज्ञ इवाह—**भो सच्चेणेति** । सत्येन शपामि सत्यदेवप्रमाणीकरणेन शपथं करोमि । यदि वक्ष्यमाणामकथनप्रतिज्ञामन्यथ-येयम्, अवश्यं सत्यदेवः कुपितो मामनिष्टेन योजयत्वित्यर्थः । शपथो नाम प्रतिज्ञाय-मानस्य प्रार्थ्यमानस्य वार्थस्यानन्यथाभावाय क्रियमाणस्तदन्यथाकरणपक्षेऽनर्थादेशः । शपथविषयमाह—कस्मा अपि, नाख्यास्ये न कथयिष्यामि, त्वदभिप्रायरहस्यमिति शेषः । एषा मे जिह्वा, सन्दष्टा अकथनाय कालान्तरे सम्प्रत्येव दन्तसन्दंशेन निरुद्धेति हास्योक्तिः ॥

कृतशपथेऽपि विदूषकेऽनाश्वासादाह—**नोत्सहे** इत्यादि ॥

पद्मावती—(क) अहो इमस्स पुरोभा(अ?इ)दा । एत्तिएण हिअअं ण जाणादि ।

विदूषकः—(ख) किं ण भणादि मम । अणाचक्खिअ इमादो सिळावट्टआदो ण सक्कं एक्कपदं वि गमिदुं । एसो रुद्धो अत्तभवं ।

राजा—किं बलात्कारेण ।

विदूषकः—(ग) आम, बळक्कारेण ।

राजा—तेन हि पश्यामस्तावत् ।

विदूषकः—(घ) पसीददु पसीददु भवं । वअस्सभावेण साविदो सि, जइ सच्चं ण भणासि ।

(क) अहो अस्य पुरोभागिता । एतावता हृदयं न जानाति ।

(ख) किं न भणति मम । अनाख्यायास्माच्छिलापट्टकान्न शक्यमेकपदमपि गन्तुम् । एष रुद्धोऽत्रभवान् ।

(ग) आम, बलात्कारेण ।

(घ) प्रसीदतु प्रसीदतु भवान् । वयस्यभावेन शापितोऽसि, यदि सत्यं न भणासि ।

अहो इत्यादि । अस्य वसन्तकस्य । पुरोभागिता निवेदितस्वहृदयेऽप्यार्यपुत्रे स्वहृदयानिवेदनदोषदर्शित्वम् ॥

किं णेत्यादि । एष रुद्धोऽत्रभवानिति प्रणयरोधः ॥

किमिति । बलात्कारेण रोधप्रसभेन, किं, मां स्वाभिप्रायं व्याहारयितुं किं यतस इत्यर्थः ॥

आमेत्यादि । आमेत्यङ्गीकारे ॥

तेन हीति । तेन हि, पश्यामस्तावत् त्वद्बलात्कारो वा सफलो भवति, मदीयाकथनप्रतिज्ञा वेति परीक्षिष्यामह इत्यर्थः ॥

ससान्त्वमाह—**पसीददु** इत्यादि । वयस्यभावेन सख्येन । सत्यभणनप्रार्थनान्यथाकरणपक्षे उभयप्रेमास्पदसख्योपघातादेशलक्षण इह शापः ॥

राजा—का गतिः । श्रूयताम् ।

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः ।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥ ४ ॥

वासवदत्ता—(आत्मगतम्) (क) भोदु भोदु । दिण्णं वेदणं इमस्स परिखेदस्स । अहो अञ्ञादवासं पि एत्थ बहुगुणं सम्पज्जइ ।

चेटी—(ख) भट्टिदारिए ! अदक्खिञ्ञो खु भट्टा ।

पद्मावती—(ग) हळा ! मा मा एव्वं । सदक्खिञ्ञो एव्व अय्यउत्तो, जो इदाणिं वि अय्याए वासवदत्ताए गुणाणि सुमरदि ।

(क) भवतु भवतु । दत्तं वेतनमस्य परिखेदस्य । अहो अज्ञातवासोऽप्यत्र बहुगुणः सम्पद्यते ।

(ख) भर्तृदारिके ! अदाक्षिण्यः खलु भर्ता ।

(ग) हळा ! मा मैवम् । सदाक्षिण्य एवार्यपुत्र,ः य इदानीमप्यार्याया वासवदत्ताया गुणान् स्मरति ।

केत्यादि ॥

पद्मावतीति । पद्मावती, रूपशीलमाधुर्यैः कायिकमानसवाचिकसौभाग्यरूपैः सौन्दर्यसद्वृत्तप्रियभाषित्वैर्निमित्तैः । मम, बहुमता यद्यपि मदीयगुरुप्रतिपत्तिविषयभूतैव कामं वर्तते । तु तथापि । वासवदत्ताबद्धं वासवदत्तयातीतयापि बद्धं स्वायत्तीकृतं । मे मनो न हरति नाकर्षति ॥ ४ ॥

भर्तुरात्मनि प्रीतिप्रकर्षं सपत्न्यगोचरं श्रुत्वा सन्तुष्यन्त्याह — **भोदु** इति । भवतु भवतु यद्यदनुभूतं दुःखं तत् काममस्तु, तन्मया नेदानीं गण्यत इत्यर्थः । अस्य परिखेदस्य दुःखस्य । वेतनं भृतिः फलं । दत्तम् अर्थादार्यपुत्रेण । अत्र पद्मावत्यन्तिके अज्ञातवासोऽपि बहुगुणः सम्पद्यते अनेकफलः पर्यवस्यति । तत्र भाविनष्टराज्यप्रत्यापत्तिफलो भर्तुः पद्मावतीपरिणय एको गुणः, मद्विषयकनिरतिशयभर्तृप्रीत्यवगमो द्वितीय इत्यभिप्रायः ॥

भट्टिदारिए इत्यादि । अदाक्षिण्यः दाक्षिण्यं नायिकयोस्तुल्यवृत्तित्वं, तद्रहितः ॥

हळे त्यादि । एवं मा मा, वदेति शेषः । इदानीमपि अस्मिन् कालेऽपि, अपिशब्दोऽतीतकालसमुच्चयार्थः । आर्यपुत्रो वासवदत्तायामतीतकाले यादृशचित्तवृत्तिः,

वासवदत्ता—(क) भद्दे ! अभिजणस्स सदिसं मन्तिदं ।

राजा—उक्तं मया । भवानिदानीं कथयतु । का भवतः प्रिया तदा वासवदत्ता, इदानीं पद्मावती वा ।

पद्मावती—(ख) अय्यउत्तो पि वसन्तओ संवुत्तो ।

विदूषकः—(ग) किं मे विप्पळविदेण । उभओ वि तत्तहोदीओ मे बहुमदाओ ।

राजा—वैधेय ! मामेवं बलाच्छ्रुत्वा किमिदानीं नाभिभाषसे ।

(क) भद्रे ! अभिजनस्य सदृशं मन्त्रितम् ।

(ख) आर्यपुत्रोऽपि वसन्तकः संवृत्तः ।

(ग) किं मे विप्रलपितेन । उभे अपि तत्रभवत्यौ मे बहुमते ।

तादृशचित्तवृत्तिरेव वर्तमानकालेऽपीति न विषमवृत्तित्वं तत्रारोपणीयमिति भावः ॥

भद्दे!इत्यादि । अभिजनस्य कुलस्य, अर्थात् कुलवधूजनस्य ॥

उक्तमित्यादि । प्रिया भक्तिविषयभूता । हास्यं किमपि विदूषकेण व्याहारयितुमयं नायकप्रश्नः ॥

अय्येति । आर्यपुत्रोऽपि, वसन्तकः संवृत्तः वसन्तकतुल्यो जातः प्रीतितारतम्यप्रश्नकरणात् ॥

किमित्यादि । विप्रलपितेन निरर्थकवचनेन ॥

वैधेयेति । वैधेय ! मूर्ख ! । एवं बलात्, मां श्रुत्वा मत्तो मन्मनोगतमाकर्ण्येत्यर्थः । त्वमिदानीं किं नाभिभाषसे, अर्थात् स्वमनोगतम् । इहास्मदर्थगतमपादानत्वमविवक्षित्वा कर्मत्वविवक्षणेन मामिति द्वितीया । अत एव प्रयोगाद् गृह्णातिपचत्योरिव शृणोतेरपि द्विकर्मकत्वं बोद्धव्यम् । एवं तु नटाद् गाथां शृणोतीतिवद् नटं गाथां शृणोतीत्यपि साधु भवति । 'मामेव'मित्येतत्स्थाने 'मा मैव'मिति क्वचित् पठ्यते, तदेत्थम् व्याख्येयं—एवं मा मा ब्रूहीति शेषः । बलाच्छ्रुत्वेत्यस्य च बलात्कारेण मदभिप्रायमाकर्ण्येत्यर्थः ॥

विदूषकः—(क) किं मं पि बळक्कारेण ।

राजा—अथकिं, बलात्कारेण ।

विदूषकः—(ख) तेण हि ण सक्कं सोदुं ।

राजा—प्रसीदतु प्रसीदतु महाब्राह्मणः । स्वैरं स्वैरमभिधीयताम् ।

विदूषकः—(ग) इदाणिं सुणादु भवं । तत्तहोदी वासवदत्ता मे बहुमदा । तत्तहोदी पदुमावदी तरुणी दस्सणीआ अकोवणा अणहङ्कारा महुरवाआ सदक्खिञ्ञा । अअं च अवरो महन्तो गुणो, सिणिद्धेण भोअणेण मं पच्चुग्गच्छइ वासवदत्ता—कहिंणुखु गदो अय्यवसन्तओ त्ति ।

वासवदत्ता—(घ) भोदु भोदु, वसन्तअ ! सुमरेहि दाणिं एदं ।

(क) किं मामपि बलात्कारेण ।

(ख) तेन हि न शक्यं श्रोतुम् ।

(ग) इदानीं श्रृणोतु भवान् । तत्रभवती वासवदत्ता मे बहुमता । तत्रभवती पद्मावती तरुणी दर्शनीया अकोपना अनहङ्कारा मधुरवाक् सदाक्षिण्या । अयं चापरो महान् गुणः, स्निग्धेन भोजनेन मां प्रत्युद्गच्छति वासवदत्ता—कुत्रनुखलु गत आर्यवसन्तक इति ।

(घ) भवतु भवतु, वसन्तक ! स्मरेदानीमेताम् ।

किमिति । बलात्कारेण मामपि किं, पृच्छसीति शेषः ॥

अथकिमित्यादि ॥

तेण हीत्यादि । श्रोतुं न शक्यम्, अहं नैव कथयिष्यामीत्यर्थः ॥

प्रसीदत्वित्यादि ॥

इदाणिमित्यादि । वासवदत्ता मे बहुमतेत्युक्त्या पद्मावती तु तद्वन्न बहुमतेत्याशयः सूचितः । तावता निर्गुणेति नाहं मन्ये किन्तु गुणवत्येवेत्यभिप्रायेण तद्गुणान् विवृणोति—**तत्तहोदी**त्यादिना। वासवदत्तां प्रत्यात्मनो बहुमाने कारणं पद्मावतीव्यावृत्तं तद्गतं गुणमाह — **अयं** चेत्यादिना । चकारस्तुशब्दस्यार्थे । 'महन्तो गुणो' इत्यस्य स्थाने 'विसेसो' इति क्वचित् पाठः ॥

भोदु इत्यादि । एतां मामित्यर्थः । अथवा एतत् प्रत्युद्गमनम् ॥

राजा—भवतु भवतु वसन्तक ! सर्वमेतत् कथयिष्ये देव्यै वासवदत्तायै ।

विदूषकः—(क) अविहा वासवदत्ता । कहिं वासवदत्ता । चिरा खु उवरदा वासवदत्ता ।

राजा—(सविषादम्) एवम् । उपरता वासवदत्ता ।

अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया ।
ततो वाणी तथैवेयं पूर्वाभ्यासेन निस्सृता ॥ ५ ॥

पद्मावती—(ख) रमणीओ खु कहाजोओ णिसंसेण विसंवादिओ ।

वासवदत्ता—(आत्मगतम्) (ग) भोदु भोदु, विस्सत्थह्मि । अहो पिअं णाम, ईदिसं वअणं अप्पच्चक्खं सुणीअदि ।

(क) अविहा वासवदत्ता । कुत्र वासवदत्ता । चिरात् खलूपरता वासवदत्ता ।

(ख) रमणीयः खलु कथायोगो नृशंसेन विसंवादितः ।

(ग) भवतु भवतु, विश्वस्तास्मि । अहो प्रियं नाम, ईदृशं वचनमप्रत्यक्षं श्रूयते ।

भवत्वित्यादि । एतत् सर्वम् आवयोः प्रश्नोत्तरव्यतिकरम् ॥

अविहेत्यादि ॥

एवमिति । एवम् इत्थं, यथा त्वमात्थ । वासवदत्ता उपरता तदुपरतिमिदानीं स्मरामीत्यर्थः ।

अनेनेति । त्वया अनेन परिहासेन प्रीतिप्रश्नर्मणा मे मनः, व्याक्षिप्तं वासवदत्ताव्यासक्तं कृतम् । ततः मनसस्तदेकपरत्वाद्धेतोः । इयं वाणी 'सर्वमेतत् कथयिष्ये देव्यै वासवदत्तायै' इत्येवंरूपा वाक् । पूर्वाभ्यासेन पूर्वसिद्धेदृशवाणीप्रयोगपौनःपुन्यजनितया वासनया । तथैव तदेकपरत्वानुगुणप्रकारेणैव । निस्सृता स्वयं प्रवृत्ता, न तु बुद्धिपूर्वं मया निस्सारितेत्यर्थः ॥ ५ ॥

रमणीओ इति । रमणीय आर्यपुत्ररतिकरः स्वदारविषयार्यपुत्रकृपावैभवप्रकाशकतया मत्प्रीतिकरश्च । कथायोगः कथानुबन्धः । नृशंसेन निर्दयेन । अर्थाद् वसन्तकेन, विसंवादितः विघटितः खलु ॥

विदूषकः—(क) धारेदु धारेदु भवं। अणदिक्कमणीओ हि विही। ईदिसं दाणि एदं।

राजा—वयस्य! न जानाति भवानवस्थाम्। कुतः,

दुःखं त्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषा यद् विमुच्येह बाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम्॥ ६॥

(क) धारयतु धारयतु भवान्। अनतिक्रमणीयो हि विधिः। ईदृशमिदानीमेतत्।

भोदु इति। भवतु भवतु, विश्वस्तास्मि विस्रब्धास्मि। सपत्नीपरिग्रहेऽप्यार्यपुत्रो मत्पक्षपातीत्यधिगतप्रत्ययास्मीत्यर्थः। अहो प्रशस्तं, प्रियं नाम प्रियमेव, यदिदानीं दैवघटितं तदित्युद्देश्यं गम्यम्। अहोशब्दः प्रशंसार्थः, नामशब्दश्चाभ्युपगमार्थः। किं तद् दैवघटितमित्यपेक्षायामाह—ईदृशम् आर्यपुत्रभणितप्रकारं। वचनं प्रेमवाक्यम्। अप्रत्यक्षं श्रूयते, ईदृशवचनपरोक्षश्रवणादधिकं पारमार्थिकप्रेमनिर्धारकं लोके किमस्ति, "सौहार्दस्वर्णरेखाणामुच्चावचभिदाजुषाम्। परोक्षमिति कोऽप्यस्ति परीक्षानिकषोपलः॥" इति न्यायादिति भावः। 'ईदिसं इति पदात् प्राक् 'जं' इति पदस्य प्रक्षेपे सुगमतरोऽर्थः॥

धारेदु इति। भवान् धारयतु धारयतु, दुःखम् अन्तर्नियच्छत्वित्यर्थः। हि यतः। विधिर्भवितव्यता। अनतिक्रमणीयः। एतद् अनुभूयमानमवस्थान्तरम्। इदानीम् अस्मिन् काले। ईदृशमिदम्प्रकारं, विधिना विहितमिति शेषः। तादृशं तु तदानीं तदभवत्, किं कुर्मो विधिपरतन्त्रा वयमिति भावः॥

वयस्येत्यादि। वयस्य! अवस्थां मदीयां दुःखदशां। न जानाति। अत एव 'धारयतु भवान्' इति भवान् ब्रूते। अहं पुनः सर्वथा दुःखं धारयितुं न शक्नोमीति भावः। कुत इति हेत्वाकाङ्क्षा।

दुःखमिति। अनुरागः पद्मावतीविषयः प्रेमा। दुःखं वासवदत्ताविरहव्यथां। त्यक्तुं शमयितुं। बद्धमूलः बद्धं रचितम् अर्थान्मया, मूलं दृढावस्थानाधारो यस्य स तथाभूतः। जात इति शेषः। दुःखशान्त्यर्थमेव मया पद्मावत्यामनुरागो दूरमुपचित

विदूषकः—(क) अस्सुपादकिळिण्णं खु तत्तहोदो मुहं । जाव मुहोदअं आणेमि । (निष्क्रान्तः ।)

पद्मावती—(ख) अय्ये ! बप्फाउळपडन्तरिदं अय्यउत्तस्स मुहं । जाव णिक्कमह्म ।

(क) अश्रुपातक्लिन्नं खलु तत्रभवतो मुखम् । यावन्मुखोदकमानयामि ।

(ख) आर्ये ! बाष्पाकुलपटान्तरितमार्यपुत्रस्य मुखम् । यावन्निष्क्रामामः ।

इति भावः । अथापि दुःखमशान्तं मे नवीभवतीत्याह — स्मृत्वा स्मृत्वा पुनःपुनः संस्मृत्य, अर्थात् वासवदत्तां । दुःखं मत्सम्बन्धि । नवत्वं नूतनतां । याति । नवत्वोक्त्या नित्यानुभूयमानस्यापि नवदुःखसाधारणं तीव्रत्वमपरिहीणं द्योत्यते । अस्यामवस्थायां न्याय्यां प्रतिपत्तिमाह—इह ईदृशे दुःखे विषये । बुद्धिः मनः । बाष्पं विमुच्य, प्राप्तानृण्या प्राप्तमानृण्यं प्रमीतं प्रियजनं प्रत्यनृणत्वं यया सा तथाभूता सती । प्रसादं शान्तिं । याति प्राप्नोति । इति यत्, एषा तु एषैव । यात्रा लोकाचारमर्यादा । अतस्तामेव यात्रां प्रतिपद्ये इति भावः । अत्र बाष्पविमोचनानृण्यप्राप्तिप्रसादप्राप्तिक्रियासु बुद्धिकर्तृकासु पूर्वपूर्वस्या उत्तरोत्तरां प्रति हेतुत्वं विवक्षितं, तेन मनसो बाष्पविमोचनादेव प्रेमानृण्यलाभः, प्रेमानृण्यलाभादेव च प्रसादसिद्धिः, नान्यथेत्युक्तं वेदितव्यम् । इह स्मृत्वा स्मृत्वा दुःखं नवत्वं यातीति क्त्वाप्रत्ययः स्मरणक्रियादुःखक्रिययोर्वक्तृरूपैककर्तृकत्वादुपपन्नः, यथा "स्मर संस्मृत्य न शान्तिरस्ति मे" इत्यत्र स्मरणशान्तिक्रिययोरस्मदर्थरूपैककर्तृकत्वाल्ल्यप् । दुःखशब्दश्च दुःखयतेश्चुरादेर्दुःख्यतेर्वा कण्ड्वादेर्व्यर्थत्यर्थकादच्प्रत्ययेन निष्पन्नः क्रियावाची । किन्तु सा क्रिया कृद्वाच्यत्वाद् भिन्नकर्तृकत्वभ्रमं जनयति, स्मृत्वा स्मृत्वा नवं दुःख्यामीति तिङ्वाच्यत्वकरणे तु नेति विशेषः ॥ ६ ॥

इति वदत एव नायकस्य मुखेऽश्रुनिर्गमं पश्यन्नाह — अस्सुपादेत्यादि । मुखोदकं मुखक्षालनार्थं जलम् ॥

अय्ये इति । आर्यपुत्रस्य मुखं बाष्पाकुलपटान्तरितं बाष्पव्याप्तम् अत एव पटान्तरितं मार्जनवस्त्राच्छादितं च । यावन्निष्क्रामामः निष्क्रामतोऽस्मान् आर्यपुत्र आच्छादितमुखत्वान्न द्रक्ष्यति, वसन्तकश्च मुखोदकानयनार्थमन्यत्र गत इति निष्क्रमणसौकर्यमुपनतं नोपेक्षणीयमिति भावः ॥

वासवदत्ता—(क) एव्वं होदु । अहव चिट्ठ तुवं । उक्कण्ठि
उज्झिअ अजुत्तं णिग्गमणं । अहं एव्व गमिस्सं ।

चेटी—(ख) सुट्ठु अय्या भणादि । उवसप्पदु दाव भट्टिदारि

पद्मावती—(ग) किंणुखु पविसामि ।

वासवदत्ता—(घ) हळा ! पविस । (इत्युक्त्वा निष्क्रान्ता ।)

(प्रविश्य)

विदूषकः—(नलिनीपत्रेण जलं गृहीत्वा) (ङ) एसा तत्तहोदि मावदी ।

पद्मावती—(च) अय्य ! वसन्तअ ! किं एदं ।

(क) एवं भवतु । अथवा तिष्ठ त्वम् । उत्कण्ठितं भर्तारमुज्झि निर्गमनम् । अहमेव गमिष्यामि ॥

(ख) सुष्ठ्वार्या भणति । उपसर्पतु तावद् भर्तृदारिका ।

(ग) किन्नुखलु प्रविशामि ।

(घ) हळा ! प्रविश ।

(ङ) एषा तत्रभवती पद्मावती ।

(च) आर्य ! वसन्तक ! किमेतत् ।

एव्वमित्यादि । अथवेति सर्वनिष्क्रमणानुमतिप्रतिक्षेपः ॥

आवन्तिकोक्तिमभिनन्दन्त्याह — **सुट्ठु** इत्यादि ॥

आवन्तिकामामन्त्रयते — **किंणुखु** इत्यादि ॥

अभ्यनुजानाति — **हळेत्यादि** ॥

आवन्तिकानिष्क्रमणानन्तरमेव नायकान्तिके पद्मावतीप्रवेश उचित इति त न्निष्क्रमणमाह — **इत्युक्त्वेत्यादि** ॥

प्रविश्य विदूषक इत्यादि । एषेत्यस्य स्थाने क्वचिद् 'अयि' इति पाठः ॥

अय्येत्यादि । एतद्, 'आर्यपुत्रो रोदिति भवान् नलिनीपत्रेण जलमानयति' इत्येवमात्मकं प्रत्यक्षतरं वस्तु । किम् अज्ञातकारणकं, तद् विशिष्टकारणवत्त्वरूपविशेषाकारेण मे ब्रूहीत्यर्थः ॥

विदूषकः—(क) एदं इदं । इदं एदं ।

…वती—(ख) भणादु भणादु अय्यो भणादु ।

विदूषकः—(ग) भोदि ! वादणीदेण कासकुसुमरेणुणा अक्खिणिप- सस्सुपादं खु तत्तहोदो मुहं । ता गह्णदु होदी इदं मुहोदअं ।

…ावती—(आत्मगतम्)(घ) अहो सदक्खिञ्ञस्स जणस्स परिजणो वि खञ्ञो एव्व होदि । (उपेत्य) जेदु अय्यउत्तो । इदं मुहोदअं ।

(क) एतदिदम् । इदमेतत् ।

(ख) भणतु भणत्वार्यो भणतु ।

(ग) भवति ! वातनीतेन काशकुसुमरेणुनाक्षिनिपतितेन साश्रुपातं तत्रभवतो मुखम् । । तद् गृह्णातु भवतीदं मुखोदकम् ।

(घ) अहो सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्य एव भवति । …त्वार्यपुत्रः । इदं मुखोदकम् ।

उक्तं प्रश्नाभिप्रायं जानन्नपि विदूषकः सत्यकारणस्य गोपनीयत्वान्मिथ्याकार- …य चातर्कितप्रश्नसङ्कटे झटित्यस्फुरणात् 'किमेतद्' इति पद्मावतीप्रश्नस्य स्वहस्त- …वस्तुजिज्ञासाभिप्रायकत्वमारोप्य तदुचितमुत्तरं हास्यभङ्ग्याह—**एदमिति** । एत- …ति स्वहस्तगतस्य नलिनीपत्रपुटस्याङ्गुल्या निर्देशः, इदमिति तद्गतस्य जलस्य, …स्तीत्युभयशेषः । एतत् नलिनीपत्रम् अस्ति, इदं जलम् अस्ति इत्यर्थः । उभय- …मेदं स्वयमवलोकनादेवावगन्तुं शक्यमिति न विशिष्य मयोच्यत इत्यभिप्रायः । इद- …व वाक्यद्वयं हास्यार्थं प्रातिलोम्येन पुनर्निर्दिशति 'इदम् एतत्' इति । अथवा किमेतदिति प्रश्नस्य नाभिप्रायान्तरारोपः । एतदिदंपदाभ्यां नायकमुख-सजलन- …लिनीपत्रयोरङ्गुल्या निर्देशः । शेषं समानम् ॥

भणादु इति । भणत्विति त्रिरुक्त्या सम्भ्रमाभिनयः । शीघ्रं ब्रूहि, आत्य- …यिके कार्ये उपस्थिते कृतं हास्येनेति भावः ॥

प्रत्युत्पन्नबुद्धिसदृशमाह — **भोदी**त्यादि ॥

सत्यगोपनेनासत्यं भाषमाणेऽपि विदूषके स्वगुणगरिम्णा पुरोभागितामभज- माना तद्गतं स्वाम्यनुवर्तनदाक्षिण्यलक्षणं गुणमेव मनसाभिनन्दति — **अहो** इ- त्यादि । अहोशब्दः प्रशंसायाम् । उपेत्य नायकसमीपं प्राप्य । प्रकाशमाह — **जेदु** इत्यादि । मुखोदकं विदूषकाद् गृहीतम् ॥

राजा—अये पद्मावती । (अपवार्य) वसन्तक ! किमिदम् ।

विदूषकः—(कर्णे) (क) एव्वं विअ ।

राजा—साधु वसन्तक ! साधु । (आचम्य) पद्मावति ! आस्यताम् ।

पद्मावती—(ख) जं अय्यउत्तो आणवेदि । (उपविशति ।)

राजा—पद्मावति !

शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि ! ।
काशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥ ७ ॥

(आत्मगतम्)

इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत् ।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥ ८ ॥

(क) एवमिव ।

(ख) यदार्यपुत्र आज्ञापयति ।

अये इत्यादि । अये इति सम्भ्रमे । अपवार्य विदूषकाय रहस्यं वक्तुं पद्मावत्याः परावृत्येत्यर्थः । **किमिति** । इदम् पद्मावत्यानुष्ठीयमानं मुखजलोपहरणम् । किम् अज्ञातकारणकम् । तत्र कारणं मे ब्रूहीत्यर्थः ॥

कर्णे इत्यादि । एवमिवेति सत्यगोपनोचितस्य पद्मावत्यै कथनीयस्य वचनप्रकारस्य निवेदनम् । स च वक्ष्यमाणे 'शरदि'त्यादिश्लोके स्पष्टः ॥

साध्वित्यादि । साध्विति सत्यगोपनयुक्त्युल्लेखाभिनन्दनम् । इदमपि सामर्थ्यात् कर्णे वचनम् । प्रकाशमाह—**पद्मावती**त्यादि ॥

जमित्यादि ॥

स्वमुखेऽश्रुपातकारणमपृष्ट एवाह—**पद्मावती**त्यादि ।

शरदित्यादि । वाताविद्धेन वायुक्षिप्तेन । काशपुष्पलवेन काशकुसुमरेणुना ॥ ७ ॥

असत्यभाषणमनुतपन् मनसि चिन्तयति—**इयमिति** । बाला, नवोद्वाहा अचिरनिर्वृत्तपरिणया, विशेषणद्वयेन केवलप्रियाचरणैकपरितोषणीयत्वं सूचितम् । इयं, सत्यं पारमार्थिकमश्रुपातकारणम् । श्रुत्वा, व्यथां व्रजेत् । इयं, धीरस्वभावा

विदूषकः—(क) उइदं तत्तहोदो मअधराअस्स अवरह्णकाळे भवन्तं अग्गदो करिअ सुहिज्जणदंसणं । सक्कारो हि णाम सक्कारेण पडिच्छिदो पीर्दि उप्पादेदि । ता उट्ठेदु दाव भवं ।

राजा—बाढम् । प्रथमः कल्पः । (उत्थाय)

(क) उचितं तत्रभवतो मगधराजस्यापराह्णकाले भवन्तमग्रतः कृत्वा सुहृज्जनदर्शनम् । सत्कारो हि नाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयति । तदुत्तिष्ठतु तावद् भवान् ।

कामं चाञ्चल्यहेतुसमवधानेऽप्यचञ्चलप्रकृतिर्यद्यपि । तु तथापि । स्त्रीस्वभावः, कातरः अधीरः, अतः स्त्रीसामान्यस्वभावासिद्धया कातरतया कदाचिदियमपि प्रकृते विषये स्पृश्येतेति शङ्कमानेन मयानृतमिदमगत्या कथनीयमेव संवृत्तमिति भावः ॥ ८ ॥

वस्तुतत्त्वाभिज्ञया पद्मावत्यैतादृशनायकवाक्योपरि स्वकथनीयवस्त्वभावान्मूकिम्न्यवलम्ब्यमाने, मिथ्योक्तिजनितात्मव्रीडपीड्यमानमनसा च नायकेन सरसे संवादान्तरे प्रवर्तयितुमशक्ये पद्मावतीनायकयोः कतिपयक्षणविश्लेषं पुनस्समागमौत्सुक्यजनकमवसरोचितं मन्यमानो विदूषकः प्रकृतं विच्छिद्य नायकं प्रति कृत्यान्तरवशादन्यत्र गमनस्य प्राप्तकालतां स्मारयन्नाह—उइदमित्यादि । उचितम् एषु मङ्गलदिवसेषु नित्यानुवृत्तम् । "उचितं तु स्वभावे क्ली निश्चिताभ्यस्तयोः पुनः । त्रियुक्तेऽनुमते चाथ प्रोक्तवाञ्छाकटायनः ॥ योग्ये चिरानुयाते" चेति इति केशवः । भवन्तम् अग्रतः कृत्वा त्वां पुरस्कृत्य, एतेन भवत्पूजाविशेष एवायं यन्मगधराजो भवत्पुरस्कारेण नित्यमपराह्णे सुहृज्जनदर्शनमनुतिष्ठतीति भावः । सा चेयं पूजा पूज्येन सबहुमानं काले स्वीकृता पूजयितुः प्रीतये कल्पते नान्यथेत्याह—**सक्कारो** इत्यादि । सत्कारः पूजा । प्रतीष्टः स्वीकृतः । प्रीतिं, सत्कर्तुः । तत् तस्माद् । भवान् उत्तिष्ठतु तावत् समयस्य सन्निहितत्वात् प्रतिष्ठस्वेत्यर्थः ॥

प्रतिपत्तिजडिमावसरे विदूषककृतं प्रतिपत्तिज्ञापनं परमलाभमिव मन्यमानोऽङ्गीकरोति—**बाढमिति** । प्रथमः कल्पः मुख्यो विधिः कार्यम्, अर्थान्मगधराजोपागमनरूपम् । तद्वशादिदानीं क्षणविश्लेष आवयोरवर्जनीय आपततीति पद्मावतीं प्रति निवेदनदाक्षिण्यं जिगमिषूचितमनेन वचनेन प्रदर्शितम् ॥

गुणानां वा विशालानां सत्काराणां च नित्यशः ।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः ॥ ९ ॥

(निष्क्रान्ताः सर्वे ।)

चतुर्थोऽङ्कः ।

तन्मुख्यत्वानुगुणं सामान्यन्यायमाह—**गुणानामिति** । कर्तार इत्येतद् द्वयोः षष्ठ्यन्तयोः प्रत्येकमभिसम्बध्यते, विज्ञातार इति च । वाशब्दचशब्दौ च समुच्चयार्थौ कर्तार इत्यत्र सम्बध्येते विज्ञातार इत्यत्र च । तेनायमर्थः—विशालानां महतां । गुणानां परगुणावहानां सत्कर्मणां परोपकाराणामिति यावत् । नित्यशः प्रतिदिनं । कर्त्तारो वा कर्त्तारश्च । विशालानां सत्काराणां परपूजानां । कर्त्तारश्च, लोके, सुलभाः बहुलाः । सौलभ्यं च वक्ष्यमाणविज्ञात्रपेक्षं, न त्विदमुत्सर्गसिद्धं लोके । तु किन्तु । गुणानां विज्ञातारः 'दिष्ट्या वयममुकेनोपकृता भवामः' इत्यादरपुरस्कारेण परकृतगुणप्रतिग्राहिणः, सत्काराणां विज्ञातारश्च 'दिष्ट्या वयममुकेन सत्कृता भवामः' इत्यादरपुरस्कारेण परकृतसत्कारप्रतिग्राहिणश्च । दुर्लभा विरलाः, परमोदारेष्वपि खलु परकृतेषु गुणेषु सत्कारेषु च "अस्मन्महिमानं प्रति कियन्त एत" इत्यनादरकरणदौर्जन्यस्यैव महत्तरम्मन्यतामूलस्य जनानां प्रायशो दर्शनादिति भावः ।

अन्या व्याख्या — विशालानाम् उदाराणां विशालत्वं च कर्तृशक्त्यपेक्षम् । गुणानां परोपकारजातीयानां सत्कर्मणां, वाशब्दः समुच्चये । सत्काराणां प्रियजनपूजानां च । कर्त्तारः, लोके सुलभाः पुण्ययशःप्रभृतिफलकामनायाः स्नेहानुरोधस्य च सर्वसाधारणत्वात् प्रायः सर्वेषां तन्निमित्तेषु गुणेषु सत्कारेषु च यावच्छक्ति स्वरसत एव नित्यं प्रवृत्तिदर्शनाद् गुणकर्त्तारः सत्कारकर्त्तारश्च जगति बहुला इति भावः । तु किन्तु । विज्ञातारः षष्ठ्यन्तद्वयसम्बन्धाद् गुणानां विज्ञातारः सत्काराणां विज्ञातारश्च, विज्ञानमात्रस्यागुणत्वाद् विज्ञानपूर्वमादरणमिह विज्ञानं विवक्षितं, तेन 'वयमुपकृता भवाम' इति ज्ञानपूर्वं परकृतगुणादर्तारः, 'वयं सत्कृता भवाम' इति ज्ञानपूर्वं परकृतसत्कारादर्त्तारश्चेत्यर्थः । दुर्लभाः । शेषं समानम् ॥

अनेन सामान्यरूपेण वस्तुना मगधराजकर्तृकसत्कारस्यात्मादरणीयत्वं नाम प्रस्तुतं वस्तु द्योतितमित्यप्रस्तुतप्रशंसा । तत्र प्रस्तुतद्योतनार्थमुपादेयेन सत्कारसामान्येन सह गुणसामान्यस्य तुल्ययोगिताभङ्ग्योपादानं द्वयोः सामान्ययोरौपम्यं गमयितुं, यथा गुणसामान्यं सुलभकर्तृकं दुर्लभविज्ञातृकं च तथा सत्कारसामान्यमिति ॥ ९ ॥

निष्क्रान्ता इति चतुर्थाङ्कपरिसमाप्तिः ॥

चतुर्थोऽङ्कः ॥

अथ पञ्चमोऽङ्कः ।

(ततः प्रविशति पद्मिनिका)

पद्मिनिका—(क) महुअरिए ! महुअरिए ! आअच्छ दाव सिग्घं ।

(प्रविश्य)

मधुकरिका—(ख) हळा ! इअह्मि । किं करीअदु ।

पद्मिनिका—(ग) हळा ! किं ण जाणासि तुवं भट्टिदारिआ पदुमावदी सीसवेदणाए दुक्खाविदेत्ति ।

मधुकरिका—(घ) हद्धि ।

(क) मधुकरिके ! मधुकरिके ! आगच्छ तावच्छीघ्रम् ।

(ख) हळा ! इयमस्मि । किं क्रियताम् ।

(ग) हळा ! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति ।

(घ) हा धिक् ।

अथ पञ्चमोऽङ्कः ।

नायकस्य जागरभवाः वासवदत्ताशोकानुभावाः पूर्वाङ्के कथिताः; इह तु पञ्चमेऽङ्के स्वप्नप्रभवास्ते प्राधान्येन प्रतिपाद्यन्ते । क्वचन रात्रौ पद्मावतीतल्पे शयित्वा पद्मावत्यागमनं प्रतिपालयत एव सतो निद्राणस्य नायकस्य करुणपोषकाः स्वाप्निकाः प्रलापास्तत्पार्श्वे पद्मावतीबुद्ध्या शयितया वासवदत्तया यथा श्रूयन्ते, तथात्र कथावस्तु सङ्घटयिष्यते । तदनुगुणमादौ प्रवेशकं प्रस्तौति—**ततः प्रविशती**त्यादि । पद्मिनिका नाम चेटी ॥

महुअरिए ! इत्यादि । मधुकरिकानामान्या चेटी ॥

हळा इअमित्यादि ॥

हळेत्यादि । दुःखिता दुःख्यन्ती प्रयोजिता । दुःखापितेति वा संस्कृतम् । दुःखमाप्नोतीति दुःखापा, दुःखापा कृता दुःखापिता, दुःखापाशब्दात् तत् करोतीति ण्यन्तात् कर्मणि क्तः ॥

हद्धि इति । अतिकष्टमित्यर्थः ॥

पद्मिनिका—(क) हळा ! गच्छ सिग्घं, अय्यं आवन्तिअं सद्दावेहि । केवळं भट्टिदारिआए सीसवेदणं एव्व णिवेदेहि । तदो सअं एव्व आगमिस्सदि ।

मधुकरिका—(ख) हळा ! किं सा करिस्सदि ।

पद्मिनिका—(ग) सा हु दाणिं महुराहि कहाहि भट्टिदारिआए सीसवेदणं विणोदेदि ।

मधुकरिका— (घ) जुज्जइ । कहिं सअणीयं रइदं भट्टिदारिआए ।

पद्मिनिका—(ङ) समुद्दगिहके किळ सेज्जात्थिण्णा । गच्छ दाणि तुवं । अहं वि भट्टिणो णिवेदणत्थं अय्यवसन्तअं अण्णेसामि ।

(क) हळा ! गच्छ शीघ्रम्, आर्यामावन्तिकां शब्दापय । केवलं भर्तृदारिकायाः शीर्षवेदनामेव निवेदय । ततः स्वयमेवागमिष्यति ।

(ख) हळा किं सा करिष्यति ।

(ग) सा खल्विदानीं मधुराभिः कथाभिर्भर्तृदारिकायाः शीर्षवेदनां विनोदयति ।

(घ) युज्यते । कुत्र शयनीयं रचितं भर्तृदारिकायाः ।

(ङ) समुद्रगृहके किल शय्यास्तीर्णा । गच्छेदानीं त्वम् । अहमपि भर्त्रे निवेदनार्थमार्यवसन्तकमन्विष्यामि ।

हळा गच्छेत्यादि । शब्दापय आह्वय । स्पष्टाह्वानस्यावन्तिकागौरवं प्रत्यसहशत्वादाह — भर्तृदारिकायाः शीर्षवेदनामेव केवलं निवेदय आह्वानं तु मा वद, निवेदनेनैव तत् सूचितं भविष्यतीत्यर्थः । सा त्वाह्वानेऽनुक्तेऽपीङ्गितज्ञा भर्तृदारिकास्नेहात् स्वयमेवागमिष्यतीत्याह — **तदो** इत्यादि ॥

आवन्तिकागमनप्रयोजनं पृच्छति — **हळा किमि**त्यादि ॥

सा हु इत्यादि । विनोदयति, विनोदनं च मनसो मधुरकथैकाग्रतापादनेन शीर्षवेदनालघूकरणम् ॥

जुज्जइ इत्यादि । युज्यते उपपद्यते त्वदुक्तम् । क पद्मावती शयिता यत्रानेतव्यार्यायन्तिकेति ज्ञातुं पृच्छति — **कुत्रे**त्यादि ॥

समुद्देत्यादि । समुद्रगृहके समुद्रकृतकस्य समीपनिर्मिते गृहे । स च कृषि-

मधुकरिका—(क) एव्वं होदु । (निष्क्रान्ता ।)

पद्मिनिका—(ख) कहिं दाणिं अय्यवसन्तअं पेक्खामि ।

(ततः प्रविशति विदूषकः ।)

विदूषकः —(ग) अज्ज खु देवीविओअविहुरहिअअस्स तत्तहोदो वच्छराअस्स पदुमावदीपाणिग्गहणसमीरिअस्स अच्चन्तसुहावहे मङ्गळोसवे मदणग्गिदाहो अहिअदरं वड्ढइ । (पद्मिनिकां विलोक्य) अयि पदुमिणिआ । पदुमिणिए ! किं इह वत्तदि ।

(क) एवं भवतु ।

(ख) कुत्रेदानीमार्यवसन्तकं पश्यामि ।

(ग) अद्य खलु देवीवियोगविधुरहृदयस्य तत्रभवतो वत्सराजस्य पद्मावतीपाणिग्रहणसमीरितस्यात्यन्तसुखावहे मङ्गलोत्सवे मदनाग्निदाहोऽधिकतरं वर्धते । अयि पद्मिनिका । पद्मिनिके ! किमिह वर्तते ।

मवनवद् भोगार्थः । 'समुद्रगृहके शय्यास्तीर्णा' इत्यस्य तत्रैव पद्मावतीदर्शनायानेतव्यार्यावन्तिकेत्याशयः । यद्यपि 'शय्या नावनते'त्यादिवक्ष्यमाणपर्यालोचनया समुद्रगृहकं पद्मावती नागतेत्यवगम्यते, तथापि सम्प्रत्यशयितैव पद्मावती समुद्रगृहके तदाज्ञानुरोधसज्जितचरशयनीये तस्मिन् क्षणादागत्य शयिष्यत इति प्रत्ययमास्थायाच्छलमेवं पद्मिनिकयोक्तम् । तेन, आलस्याद् , अधिशय्यमानस्थलतश्चलितुं शक्त्यभावात् , सुखनिद्रायास्तत्रैव लाभाद्वा पद्मावत्याः समुद्रगृहकं प्रत्यगमनेन पद्मिनिकाप्रत्ययस्य विसंवादेऽपि न पद्मिनिकायाः कश्चिदपराधः; न वा पद्मिनिकावाक्यविस्रम्भिणो जनस्य प्रवृत्तिविसंवाद उपहासाय, तथाविधविसंवादबहुलतास्वभावत्वाल्लोकव्यवहारस्येति वेदितव्यम् ॥

एव्वमित्यादि ॥

कहिमित्यादि । पश्यामि प्रेक्षिष्य इत्यर्थः ॥

अज्जेत्यादि । देवीवियोगविधुरहृदयस्य वासवदत्तावियोगेन हेतुना पूर्वं विषयानुन्मुखचित्तस्य । पद्मावतीपाणिग्रहणसमीरितस्य पद्मावतीविवाहेन सम्प्रति विषयोन्मुखीकृतस्य । पद्मिनिकाया हस्ते किमपि दृष्ट्वा पृच्छति — किमिह वर्तत इति ।

पद्मिनिका——(क) अय्य ! वसन्तअ ! किं ण जाणासि तुवं भट्टिदारिआ पदुमावदी सीसवेदणाए दुःखाविदेत्ति ।

विदूषकः——(ख) भोदि ! सच्चं, ण जाणामि ।

पद्मिनिका——(ग) तेण हि भट्टिणो णिवेदेहि णं । जाव अहं वि सीसाणुळेवणं तुवारेमि ।

विदूषकः——(घ) कहिं सअणीअं रइदं पदुमावदीए ।

पद्मिनिका——(ङ) समुद्दगिहके किळ सेज्जात्थिण्णा ।

(क) आर्य ! वसन्तक ! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति ।

(ख) भवति ! सत्यं, न जानामि ।

(ग) तेन हि भर्त्रे निवेदयैनाम् । यावदहमपि शीर्षानुलेपनं त्वरयामि ।

(घ) कुत्र शयनीयं रचितं पद्मावत्याः ।

(ङ) समुद्रगृहके किल शय्यास्तीर्णा ।

'किं एदं' इत्यपि क्वचित् पाठः । अथवा किमिह वर्तत इति प्रश्नस्य पद्मावतीविषया का प्रवृत्तिरित्यर्थः । किं पद्मावती केलिगृहं गता, उत गमिष्यति, किं नायकस्तत्र सन्निधत्तामित्येवंरूपा जिज्ञासा नायकमदनाग्निदाहानुगुणात्र व्यज्यते ॥

अय्य वसन्तअ इत्यादि ॥

भोदीति । सत्यम् । इह काका किं त्वदुक्तं सत्यमित्यर्थः । न जानामि पद्मावतीशीर्षवेदनावार्त्तां न वेद्मि ॥

तेण हीत्यादि । एनां शीर्षवेदनाम् । शीर्षानुलेपनं शीर्षवेदनाप्रतीकारार्थमनुलेपनौषधम् । त्वरयामि यावत् त्वरितं सम्पादयिष्यामीत्यर्थः ॥

कहिमित्यादि । पद्मावतीशयनीयरचनास्थानस्य जिज्ञासा तत्र पद्मावतीदर्शनाय नायकं सन्निधापयितुम् ॥

समुद्देत्यादि । पद्मावतीदर्शनाय समुद्रगृहके सन्निधापयितव्यो भर्तेत्याशयः । तत्र सम्प्रत्यशयितायां पद्मावत्यां कुत एवमभिधीयत इति शङ्का तु परिहृतैवाधस्तान्मधुकरिकां प्रत्येतदुक्तेर्व्याख्यायाम् ॥

विदूषकः—(क) गच्छदु भोदी । जाव अहं वि तत्तहोदो णिवेद-इस्सं ।

(निष्क्रान्तौ ।)

(प्रवेशकः)

(ततः प्रविशति राजा ।)

राजा—

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः ।
लावाणके हुतवहेन हृताङ्गयष्टिं
तां पद्मिनीं हिमहतामिव चिन्तयामि ॥ १ ॥

(क) गच्छतु भवती । यावदहमपि तत्रभवते निवेदयिष्यामि ।

गच्छदु इत्यादि । तत्रभवते उदयनाय ॥

पद्मावतीवृत्तान्तनिवेदनाय नायकस्य दर्शनेऽपेक्ष्यमाणे तं प्रवेशयति—**तत** इत्यादि ॥

श्लाघ्यामिति । श्लाघ्यां विशेषाकथनात् सर्वप्रकारश्लाघार्हाम् । अवन्तिनृपतेः अवन्तीनां मालवाख्यस्य जनपदस्य नृपतेः प्रद्योतस्य । सदृशीं तनूजां धैर्यौदार्यगाम्भीर्यादिगुणैस्तदनुकारिणीं दुहितरम् । लावाणके ग्रामविशेषे । हुतवहेन अग्निना । हृताङ्गयष्टिं परिलुप्तप्रशस्तावयवाम् । तां वासवदत्ताम्, अनुभूतपरामर्शिना तत्पदेन निर्देशान्मत्प्रेमरहस्यसर्वस्वसाक्षिणीं मन्निवेशितसर्वभावां चेति गम्यते । हिमहतां तुहिननाशिताम् । पद्मिनीमिव चिन्तयामि । अतिरमणीयतद्गुणबद्धचित्ततया तां विस्मर्तुमशक्नुवन् भावनया साक्षात्करोमीत्यर्थः । अहं कथम्भूतः, कालक्रमेण पुनरागतदारभारः वासवदत्तापायानन्तरं चिरकालेऽतीते पश्चात्प्राप्तकलत्रान्तरपरिग्रहः । अनेन विशेषणेन अतीतकलत्रविस्मरणजननक्षमतया लोकसिद्धस्य चिरकालातिक्रमकलत्रान्तरस्वीकाररूपस्य वस्तुद्वयस्य समवधानमुक्तम् । तेन तत्सद्भावेऽपि विस्मरणरूपकार्यानुत्पादस्य चिन्तयामीत्यनेन प्रतिपादनाद् विशेषोक्तिरलङ्कारः । चिन्ताविरुद्धयथोक्तवस्तुद्वयसद्भावेऽपि चिन्तोत्पादाद् विभावना वा ॥ १ ॥

(प्रविश्य)

विदूषकः—(क) तुवरदु तुवरदु दाव भवं ।

राजा—किमर्थम् ।

विदूषकः—(ख) तत्तहोदी पदुमावदी सीसवेदणाए दुक्खाविदा ।

राजा—कैवमाह ।

विदूषकः—(ग) पदुमिणिआए कहिदं ।

राजा—भोः ! कष्टं,

रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः ।
पूर्वाभिघातसरुजोऽप्यनुभूतदुःखः
पद्मावतीमपि तथैव समर्थयामि ॥ २ ॥

(क) त्वरतां त्वरतां तावद् भवान् ।

(ख) तत्रभवती पद्मावती शीर्षवेदनया दुःखिता ।

(ग) पद्मिनिकया कथितम् ।

प्रविश्य विदूषक इत्यादि । त्वरतां त्वरताम्, अर्थात् क्वचिदवश्यकार्ये । तच्च पद्मावत्युपसरणमुपरिष्टाद् व्यक्तीभविष्यति ॥

किमर्थमिति । कस्मै कार्याय ॥

तत्तहोदीत्यादि । अतस्तद्दर्शनार्थमित्यर्थः ॥

केत्यादि ॥

पदुमिणिआए इत्यादि । पद्मिनिकया चेट्या ॥

नववध्वस्वास्थ्यश्रवणसमुत्थादातङ्कादाह — **भोः कष्टमित्यादि** ।

रूपश्रियेति । पूर्वाभिघातसरुजोऽपि पूर्वेणाभिघातेन वासवदत्ताविरहानर्थेन सरुजः अनुवर्त्तमानमनःपीडस्यापि । मम, तुशब्दो वक्ष्यमाणमन्दशोकत्वलक्षणविशेषद्योतकः, रूपश्रिया समुदितां जातावेकवचनाद् रूपश्रीभिः करणभूताभिस्तदारब्धसमुदायत्वं प्रतिपन्नाम्, एतेः समुत्पूर्वस्य समुदायत्वापत्त्यर्थकत्वं प्रसिद्धम् । गुणतः गुणैः । युक्तां च, प्रियां पद्मावतीम् । लब्ध्वा, अद्य इदानीम् । शोकः, मन्द इव मन्दप्रायः ।

अथ कस्मिन् प्रदेशे वर्तते पद्मावती ।

विदूषकः—(क) समुद्दगिहके किळ सेज्जात्थिण्णा ।

राजा—तेन हि तस्य मार्गमादेशय ।

विदूषकः—(ख) एदु एदु भवं। (उभौ परिक्रामतः।)

विदूषकः—(ग) इदं समुद्दगिहकं । पविसदु भवं ।

राजा—पूर्वं प्रविश ।

(क) समुद्रगृहके किल शय्यास्तीर्णा ।

(ख) एत्वेतु भवान् ।

(ग) इदं समुद्रगृहकम् । प्रविशतु भवान् ।

भवतीति शेषः । अस्यां दशायां पद्मावत्यस्वास्थ्यवार्त्तया त्वदुक्तयानर्थान्तरापातशङ्काकुलं मे मनो जायत इत्याह—पद्मावतीमपि यस्या अस्वास्थ्यमिदानीं त्वया निवेदितं तामपि। अपिशब्दो वासवदत्तासमुच्चायकः । तथैव समर्थयामि तत्प्रकारवतीमेव सम्भावयामि । अत्र तथेत्यनेन प्रसिद्धप्रकारवाचिना नायकस्य विदूषकस्य च हृदि सन्ततं परिवर्त्तमानोऽत्ययरूपो वासवदत्तायाः प्रकारः परामृश्यते, तेन वासवदत्ताया यथात्ययो जातः, तथा पद्मावत्या अप्यत्ययो भावीति सम्भावयामीत्यर्थः । अस्वास्थ्यश्रवणे स्वास्थ्यप्रत्यापत्तिशङ्कां विहायात्ययशङ्कायां कारणं द्योतयितुं विशेषणमाह—अनुभूतदुःख इति। दुःखाभिहतस्य 'विपद् विपदमनुबध्नाति' इति न्यायमनुसन्दधानस्य सर्वतो दुःखशङ्कैव हि स्वरसत उदेतीति भावः । अत्र मन्दत्वविशिष्टशोकक्रियाया लाभक्रियायाश्चास्मदर्थकर्तृकत्वेन समानकर्तृकत्वाल्लब्ध्वेति क्त्वाप्रत्ययः ॥ २ ॥

अथेत्यादि । अथेति प्रश्ने ॥

समुद्रेत्यादि । पद्मिनिकावाक्यस्यायमनुवादः ॥

तेन हीत्यादि । आदेशय ज्ञापय । 'इत इत' इत्येवञ्जातीयवचनपूर्वं मार्गेऽग्रतो गमनं परिजनसमुदाचरणीयं मार्गादेशनम् ॥

एदु इत्यादि ॥

इदमित्यादि ॥

पूर्वमित्यादि ॥

विदूषकः—(क) भो ! तह । (प्रविश्य) अविहा चिट्ठदु चिट्ठदु दाव भवं ।

राजा—किमर्थम् ।

विदूषकः—(ख) एसो खु दीवप्पभावसूइदरूवो वसुधातळे परिवत्तमाणो, अअं काओदरो ।

राजा—(प्रविश्यावलोक्य सस्मितम्) अहो सर्पव्यक्तिर्वैधेयस्य ।

ऋज्वायतां हि मुखतोरणलोलमालां
भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख ! सर्पम् ।
मन्दानिलेन निशि या परिवर्तमाना
किञ्चित् करोति भुजगस्य विचेष्टितानि ॥ ३ ॥

(क) भोः ! तथा । अविहा तिष्ठतु तिष्ठतु तावद् भवान् ।

(ख) एष खलु दीपप्रभावसूचितरूपो वसुधातले परिवर्तमानः, अयं काकोदरः ।

भो इत्यादि । प्रविश्य प्रवेष्टुमुपक्रम्य ॥

किमर्थमिति । गतिनिवृत्तिं प्रति हेतुप्रश्नः ॥

एसो इत्यादि । दीपप्रभावसूचितरूप इति रूपसूचनोक्तया रूपं प्रत्यापातज्ञानमेव न सम्यग् ज्ञानमिति द्योतितम् । अत एव विशेषाग्रहणात् सर्पभ्रमोपपत्तिः । एतेन वस्तुगतसामान्यरूपमात्रव्यक्तिपर्याप्तस्यैव तनुतरस्य दीपालोकस्य पद्मावतीशय्यागृहे तदानीं सत्त्वमुक्तम् । एष इति जन्तुसामान्यबुद्ध्या वचनोपक्रमः जन्तुत्वसाधनाय च तद्रूपचेष्टयोर्निर्देशः । तावत्येव झटिति जन्तुविशेषभ्रान्त्युदयादाह—अयं काकोदर इति । 'काकोदरः फणी' त्यमरः ॥

अहो इत्यादि । सर्पव्यक्तिः सर्प इति प्रतिभासः ।

विदूषकमभिसम्बुध्य तद्भ्रमं सोपपत्तिकं निरूपयन्नपाकरोति—**ऋज्वायतामिति** । हे मूर्ख ! त्वम्, ऋज्वायताम् अनेन सर्पभ्रमप्रयोजक आकृतिधर्म उक्तः । क्षितौ भूमौ । भ्रष्टां बन्धशैथिल्यादधः पतितां । मुखतोरणलोलमालां मुखतोरणे गृहमुखबहिर्द्वारे या लोला लम्बनावस्थायां माला तां । सर्पम् अवगच्छसि । न केवल-

विदूषकः — (निरूप्य) (क) सुट्ठु भवं भणादि । ण हु अअं काओअरो । (प्रविश्यावलोक्य) तत्तहोदी पदुमावदी इह आअच्छिअ णिग्गदा भवे ।

राजा — वयस्य ! अनागतया भवितव्यम् ।

विदूषकः — (ख) कहं भवं जाणादि ।

राजा — किमत्र ज्ञेयम् । पश्य,

शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा
न क्लिष्टं हि शिरोपधानममलं शीर्षाभिघातौषधैः ।

(क) सुष्ठु भवान् भणति । न खल्वयं काकोदरः । तत्रभवती पद्मावतीहागत्य निर्गता भवेत् ।

(ख) कथं भवान् जानाति ।

मृज्वायतत्वादेव ते सर्पभ्रमः, किन्तु चेष्टयापीत्याह — या, निशि रात्रौ । मन्दानिलेन, परिवर्तमाना लुठन्ती सती । भुजगस्य सर्पस्य । विचेष्टितानि सर्पसाधारणानि चलनानि । किञ्चित् लेशतः । करोति, तां मालामिति पूर्वेण सम्बन्धः । भ्रान्तापह्नुतिरलङ्कारः ॥ ३ ॥

सुट्ठु इत्यादि । आगत्य निर्गतेत्यागमनस्य सम्भावनं चेटीवाक्यप्रत्ययाद्, निर्गमनस्य तु सम्प्रत्यनुपलम्भात् ॥

वयस्येत्यादि । अनागतयेत्यागमनप्रतिषेधेनागमनकार्यस्य शय्याशयनस्य प्रतिषेधः कैमुत्यन्यायात् सिद्धः । स च 'शय्या नावनते'त्यादिना साधयिष्यते ॥

कहमिति । भवान् कथं जानाति, अनागतत्वज्ञाने कः साधनप्रकार इत्यर्थः ॥

किमिति । अत्र शय्यास्थाने पद्मावत्यनागमनविषये वा । किं ज्ञेयम् अनागमनज्ञानसाधनं किं मन्मुखाद् ज्ञातव्यमस्ति, ननु तत् तवापि प्रत्यक्षमेवेत्यभिप्रायः । पश्य अनागमनज्ञापकं तथापि मयोच्यमानं जानीहि ।

यदि पद्मावत्या आगमनमिहाभविष्यद्, अवश्यं शयनमभविष्यदित्यागमनकार्यत्वे शयनस्य स्थितेऽर्थादनागमनकार्यमशयनं भवतीति तदेव स्वहेतुभूतानागमनज्ञापकं विवक्षितम् । तदेतदशयनं शयनकार्यानुपलब्धिद्वारेण प्रतिपादयति — शय्येति । हि यस्मात् कारणात् । शय्या शयनीयं । तथास्तृतसमा तथास्तृता

रोगे दृष्टिविलोभनं जनयितुं शोभा न काचित् कृता

प्राणी प्राप्य रुजा पुनर्न शयनं शीघ्रं स्वयं मुञ्चति ॥ ४ ॥

विदूषकः—(क) तेण हि इमस्सिं सय्याए मुहुत्तअं उवविसिअ तत्तहोदिं पडिवाळेदु भवं ।

(क) तेन ह्यस्यां शय्यायां मुहूर्तकमुपविश्य तत्रभवतीं प्रतिपालयतु भवान् ।

तदवस्थास्तरणा समा अविषमा च । शयितजनदेहसंसर्गसम्भावितविकाराप्राप्तिरनेन विशेषणेन सामान्यत उक्ता, तां विशिष्योपपादयति — नावनता देहार्पणार्हे भागे देहसम्पातसुलभामवनतिं न प्राप्ता । न व्याकुलप्रच्छदा व्याकुलः अङ्गवलनादिना क्लिष्टः संकुचितरूपो वा प्रच्छदः उत्तरपिधानपटो यस्याः सा तथाभूता न भवति । अमलं न तु मलिनं यत्र मलान्तरसम्बन्धो दुर्लक्षः । शिरोपधानं शीर्षोपबर्हम् । शीर्षाभिघातौषधैः शिरोवेदनाप्रतीकारार्थैरनुलेपनैः । न क्लिष्टं न दूषितम् । शय्यागतमुक्त्वा शय्यागृहगतमाह — रोगे निमित्ते । दृष्टिविलोभनं चक्षुरावर्जनम् अर्थाच्चक्षुर्द्वारेण मनसो रोगसंवेदनादन्यत्र व्यासञ्जनम् । जनयितुं, काचित् शोभा आलेख्यादिरम्यवस्तुन्यासाविच्छित्तिः । न कृता शयितपद्मावतीदृष्टिलक्ष्या यथा स्यात् तथा शय्यापरिसरे न संपादितेत्यर्थः । अथ शय्यावनत्यादिकं जातमेव पद्मावत्यां शय्यां मुक्त्वान्यतो गतायां परिजनेन सद्योऽपनीतं स्यादित्याशङ्कायां, शयनोपाश्रयणात् परतः सम्भावनीयेऽस्मिन्नतिस्वल्पे काले शय्यामोचनमेव तावद् रुग्णजनस्वभावविरुद्धत्वान्न सम्भवतीत्याह — पुनः किञ्च । प्राणी सर्वो जन्तुः । रुजा रोगेण हेतुना । शयनं शय्याम् । प्राप्य, शीघ्रं स्वयं न मुञ्चति, किन्तु चिरमधिशेत एवेत्ययं रुग्णस्य स्वभाव इत्यर्थः । अतो रोगिस्वभावविरुद्धमुपाश्रितशय्याशीघ्रत्यागमपेक्ष्य पद्मावत्याः शय्यायामशयनमेव कल्पयितुं युक्तमिति भावः ।

अत्र शय्यानवनतत्वादिभिरशयनस्य साधनादनुमानमलङ्कारः; रुग्णाधिशयितशय्यास्वभावस्य व्यतिरेकमुखेन वर्णनाद् व्यतिरेकस्वभावोक्तिः; चतुर्थपादगतेन सामान्येन 'पद्मावती रुजा शयनं प्राप्य शीघ्रं स्वयं न मुञ्चती'त्येवंरूपस्य प्रस्तुतस्य विशेषस्यावगमनादप्रस्तुतप्रशंसा च । एषां चोत्तराभ्यां पूर्वस्योत्थापनादङ्गाङ्गिभावसङ्करः परिस्फुटः । अत्र शिरोपधानमिति शिरशब्दस्यादन्तस्य उपधानश-

राजा—बाढम् । (उपविश्य) वयस्य ! निद्रा मां बाधते । कथ्यतां काचित् कथा ।

विदूषकः—(क) अहं कहइस्सं । हों ति करेदु अत्तभवं ।

राजा—बाढम् ।

विदूषकः—(ख) अत्थि णअरी उज्जइणी णाम । तहिं अहिअरमणीआणि उदअह्णाणाणि वत्तन्ति किळ ।

राजा—कथमुज्जयिनी नाम ।

(क) अहं कथयिष्यामि । हों इति करोत्वत्रभवान् ।

(ख) अस्ति नगर्युज्जयिनी नाम । तत्राधिकरमणीयान्युदकस्नानानि वर्तन्ते किल ।

ब्देन समासः । "शिरोवाची शिरोऽदन्तो रजोवाची रजस्तथा । विचकर्त शिरान् द्रौणिः, इति कण्ठभूषणालङ्कार उक्तम्" इत्यमरकोशटीकासर्वस्वकारः ॥ ४ ॥

तेण हीत्यादि । प्रतिपालयतु प्रतीक्षताम् ॥

बाढमित्यादि । कथाकथनप्रार्थनं च निद्राबाधां वारयितुम् ॥

अहमित्यादि । 'हों त्ति' इत्योकारेणानुनासिकेन युक्तः पाठः; हों इति च कथावक्तुः प्रतिवाक्यान्तं श्रोत्रा श्रवणावधानसूचनाय क्रियमाणो ध्वनिविशेषः । हों इति करोतु हों इत्येवंरूपं ध्वनिविशेषमुत्पादयत्वित्यर्थः । 'होन्तिं' इति पाठस्तु चिन्त्यार्थः ॥

बाढमिति । छन्दत इति क्वचित् पाठः । छन्दतः अभिप्रायेण, अर्थात् तव । हों इति करोमीति शेषः ॥

अत्थीत्यादि । अधिकरमणीयानि सिप्रानदीगुणादतिसुखावहानि । उदकस्नानानि उदकावगाहाः सिप्रातीर्थानि वा । उज्जयिनीगतं कमपि सरसमितिहासं वक्तुमिव संरम्भं प्रदर्श्योज्जयिन्यामुदकस्नानवर्तनकथनमिदं विदूषकस्य स्वमौर्ख्याभिनयानुगुणं कथाख्यानहास्यं द्रष्टव्यम् ॥

कथमिति । कथमुज्जयिनी नाम, सतीष्वन्यासु नगरीषु किमित्युज्जयिनी त्वया प्रस्तुतेत्यर्थः ॥

विदूषकः—(क) जइ अणभिप्पेदा एसा कहा, अण्णं कहइस्सं ।

राजा—वयस्य ! न खलु नाभिप्रेतैषा कथा । किन्तु,

स्मराम्यवन्त्याधिपतेः सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः ।
बाष्पं प्रवृत्तं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः ॥ ५ ॥

(क) यद्यनभिप्रेतैषा कथा, अन्यां कथयिष्यामि ।

जइ इत्यादि । अनाभिप्रेता अनिष्टा । एषा कथा उज्जयिनीप्रस्तावः ॥

काममिष्टैवेयं कथा, प्रेयसीस्मृतिं तु मे तद्विरहशोकपावकेन्धनीभूतामुन्मीलयतीत्याह — **वयस्येत्यादि** । वयस्येत्यामन्त्रणेन मम सखापि सन् हृदयानभिज्ञ इव कथमुज्जयिनीकथाया अनिष्टत्वं शङ्कस इति द्योत्यते । अथवा सखापि सन् मम हृदयं न जानीष इत्यहो ते मौर्ख्यमिति ध्वन्यते ।

स्मरामीति । प्रस्थानकाले यदाहं यौगन्धरायणप्रणीतनिपुणनीतिव्याकुलिते प्रद्योते स्वजनमननुमान्यैव मामनुगच्छन्तीं वासवदत्तामुपादायोज्जयिन्याः कौशाम्बीं प्रास्थितस्तस्मिन् काले । स्वजनं स्वं स्वभाववत्सलत्वान्निरतिशयस्वत्वाभिमानभूमिं जनम् आत्मना मदर्थे परित्यज्यमानं मातापितृलक्षणम् । स्मरन्त्या आध्यायन्त्याः । अत एव स्नेहात् स्वजनविषयस्नेहप्रभवात् तत्परित्यागदुःखादित्यर्थः, जन्ये जनकोपचारः । प्रवृत्तं स्वयमुद्गतं, प्रवृद्धमिति क्वचित् पाठः । प्रवृत्तिस्वातन्त्र्योक्त्या नियन्तुमशक्यतोक्ता । नयनान्तलग्नम् अपाङ्गसक्तम् । बाष्पं, ममैवोरसि न त्वात्मन उरसि । पातयन्त्याः स्वजनपरित्यागदुःखसंवेदनसङ्कटे तस्मिन् मत्समुपश्लेषभङ्गकातरतामासाद्य मद्भुजान्तरलगनेनैव तद् दुःखं विनोदयन्त्या इति भावः । अवन्त्या उज्जयिन्या हेतुना । अधिपतेः अर्थादवन्तीश्वरस्य प्रद्योतस्य । सुतायाः सुतामित्यर्थः । स्मरामि स्मराम्येव, तथातिभूमिगतानुरागां प्रियामुज्जयिनीसङ्कीर्तनेऽपि कथं न स्मरेयमिति भावः । इह सुताया इति स्मृतिकर्मणः शेषत्वविवक्षणाद् 'अधीगर्थ—' (२-३-५२) इति षष्ठी । अवन्त्याधिपतेरित्यत्र अवन्तीनगर्याः अधिपतिस्वभूतायाः स्वामित्वहेतुतां वस्तुसिद्धां विवक्षित्वा तृतीया निर्दिष्टा गवा स्वामी, भुवा स्वामीत्यादिवत् । ऐकपद्यं वाधिपतिपद आङ्प्रश्लेषात् ॥ ५ ॥

अपिच,

बहुशोऽप्युपदेशेषु यया मामीक्षमाणया ।
हस्तेन स्रस्तकोणेन कृतमाकाशवादितम् ॥ ६ ॥

विदूषकः — (क) भोदु, अण्णं कहइस्सं । अत्थि णअरं बह्मदत्तं णाम । तहिं किळ राआ कंपिळ्ळो णाम ।

राजा — किमिति किमिति ।

विदूषकः — (पुनस्तदेव पठति ।)

(क) भवतु, अन्यां कथयिष्यामि । अस्ति नगरं ब्रह्मदत्तं नाम । तत्र किल राजा काम्पिल्यो नाम ।

तदनुरागस्य सुभगतरमनुभावान्तरं वीणोपशिक्षणगुरुभावानुभूतं स्मृतिपथमुपगतं तद्विशेषणभङ्ग्याचष्टे—अपिच, बहुश इति । उपदेशेषु शिक्षासमयप्रसक्तेषु मध्ये । बहुशोऽपि एकद्वेषु न केवलं किन्तु बहुष्वपि अल्पशोवच्छस्प्रत्ययः । बहुश इति विशेषणं वा बहुषूपदेशेषु कृतेष्वपीति । एकस्यैव चोपदेशस्योपदेश्यावधानायावृत्तिकरणाद् बहुत्वम् । बहुत्वेऽप्यवधानं न प्रत्याकृष्टमित्यहो चित्तव्याक्षेपविषयस्य माहात्म्यमिति अपिशब्देन द्योत्यते । माम् ईक्षमाणया मदीक्षणताच्छील्यशालिन्या चित्तवृत्तेर्मन्निर्वर्णनानन्दास्वादैकरसतापत्त्यान्यत्रावधानमलभमानयेत्यर्थः । अनेनेष्टवस्तुदर्शनजन्यं जाड्यं ध्वनितम् । यया, स्रस्तकोणेन स्रस्ताश्चित्तव्याक्षेपात् ग्रहणशैथिल्यं प्राप्तः कोणो वीणावादनसाधनं सारिकाख्यं यस्मिंस्तेन । हस्तेन, आकाशवादितं शून्येऽवकाशे कोणव्यापारणं, यद्वा शून्यवादनं रागस्वरादिविभागव्यक्तिविकलं वीणातन्त्रीनादनमात्रमिति यावत् । कृतम् । तस्या अवन्त्यधिपतेः सुताया इति पूर्वेण सम्बन्धः ॥ ६ ॥

भोदु इत्यादि । अन्यां कथाम् । 'अस्ति नगरमि'त्यादिकमपरमिदं मूर्खस्य कथाख्यानहास्यम् ॥

नामव्यत्ययवचनं किं यादृच्छिकप्रमादायातम्, उत चिररूढभ्रममूलमिति परीक्षितुं पृच्छति — **किमितीति** । किमिति किमिति कथं कथम्, उक्तवानसीत्यार्थम् ॥

पुनरिति । तदेव 'अत्थि णअरमि'त्यादिकमेव पुनः पठति ॥

राजा—मूर्ख ! राजा ब्रह्मदत्तः, नगरं काम्पिल्यमित्यभिधीयताम् ।

विदूषकः—(क) किं राआ बह्मदत्तो, णअरं कंपिळ्ळं ।

राजा — एवमेतत् ।

विदूषकः — (ख) तेण हि मुहुत्तअं पडिवाळेदु भवं, जाव ओट्ठगअं करिस्सं । राआ बह्मदत्तो, णअरं कंपिळ्ळं । (इति बहुशस्तदेव पठित्वा) इदाणिं सुणादु भवं । अयि सुत्तो अत्तभवं । अदिसीदळा इअं वेळा । अत्तणो पावरअं गह्णिअ आअमिस्सं । (निष्क्रान्तः ।)

(ततः प्रविशति वासवदत्ता आवन्तिकावेषेण, चेटी च ।)

(क) किं राजा ब्रह्मदत्तः, नगरं काम्पिल्यम् ।

(ख) तेन हि मुहूर्तकं प्रतिपालयतु भवान्, यावदोष्ठगतं करिष्यामि । राजा ब्रह्मदत्तः, नगरं काम्पिल्यम् । इदानीं शृणोतु भवान् । अयि सुप्तोऽत्रभवान् । अतिशीतलेयं वेला । आत्मनः प्रावारकं गृहीत्वागमिष्यामि ।

तद्भ्रममपाकर्तुं तत्त्वमुपदिशति — **मूर्खेत्यादि** ॥

उपदेशगृहीतमर्थं ग्रहणदार्ढ्याय प्रश्नगर्भमनुवदति **किमित्यादि** ॥

एवमेतदिति । उपदिष्टस्यैव दार्ढ्याय पुनरनुवादः ॥

तेण हीति । तेन हि तर्हि । अस्य स्थाने 'जइ एव्वं' इति क्वचित् पाठः । भवान्, मुहूर्तं, प्रतिपालयतु प्रतीक्षताम् आरब्धकथाशेषं श्रोतुम् । यावद् यावता कालेन मुहूर्तलक्षणेनेत्यर्थः । ओष्ठगतं वाग्विधेयम् । करिष्यामि, अर्थात् त्वदुपदिष्टं 'राजा ब्रह्मदत्तः' इत्यादिकम् । तद् बहुकृत्वः पठंस्तथाकृत्वाह — इदानीमित्यादि ॥

राज्ञि सुप्ते स्वयं शिशयिषुश्चिन्तयति — इयं वेला अतिशीतला, अस्यां प्रावारानाच्छादितशरीरेण न शक्यं शयितुम् । अत आत्मनः प्रावारकं गृहीत्वागमिष्यामि ॥

अथ पद्मावत्यस्वास्थ्यनिवेदिकया चेट्या सह आवन्तिकायाः प्रवेशः — **ततः प्रविशतीत्यादि** । इयं च चेटी आवन्तिकानयनाय पद्मिनिकाख्यया चेट्या प्राक् चोदिता मधुकरिका नाम ॥

चेटी—(क) एदु एदु अय्या । दिढं खु भट्टिदारिआ सीसवेदणाए दुक्खाविदा ।

वासवदत्ता—(ख) हद्धि, कहिं सअणीअं रइदं पदुमावदीए ।

चेटी—(ग) समुद्दगिहके किळ सेज्जात्थिण्णा ।

वासवदत्ता—(घ) तेण हि अग्गदो याहि ।

(उभे परिक्रामतः ।)

चेटी—(ङ) इदं समुद्दगिहकं । पविसदु अय्या । जाव अहं वि सीसाणुळेवणं तुवारेमि । (निष्क्रान्ता ।)

(क) एत्वेत्वार्या । दृढं खलु भर्तृदारिका शीर्षवेदनया दुःखिता ।

(ख) हा धिक्, कुत्र शयनीयं रचितं पद्मावत्याः ।

(ग) समुद्रगृहके किल शय्यास्तीर्णा ।

(घ) तेन ह्यग्रतो याहि ।

(ङ) इदं समुद्रगृहकम् । प्रविशत्वार्या । यावदहमपि शीर्षानुलेपनं त्वरयामि ।

एदु एदु इत्यादि । दृढम् अत्यर्थम् ॥

हद्धि इति । हा धिगित्यस्वास्थ्यानुशोचनम् । पद्मावतीशयनीयस्थानं स्वगन्तव्यं पृच्छति — **कहिमित्यादि** ॥

पद्मावत्यन्वासनायार्यावन्तिका समुद्रगृहकमानेतव्येत्यभिप्रायकं यत् पद्मिनिकायाः पूर्वं वचनं, तदेव मधुकरिकाह — **समुद्देत्यादि** ॥

तेण हीति । त्वमग्रतो याहि, समुद्रगृहकं प्रति, त्वामहमनुयामीत्यर्थः ॥

इदमित्यादि । शीर्षानुलेपनं त्वरयिष्यामीति यत् प्राक् पद्मिनिकया शिरोनुलेपनं साधयिष्यमाणतयोक्तं, तद् बहुक्षणसाध्यत्वाद् इयतातीतेनातिपरिमितक्षणात्मकेन कालेन तया साधितं न भवितुमर्हति, किन्त्विदानीमपि साध्यमानावस्थमेवेति तस्य साधनत्वरणार्थं साधनस्थानं गन्तुमात्मनः संरम्भमाविष्करोति — **शीर्षानुलेपनं त्वरयामि** यावत् त्वरयिष्यामि साधयितुम्, इहानेतुं च ॥

वासवदत्ता—(क) अहो अकरुणा खु इस्सरा मे । विरहपय्युस्सुअस्स अय्यउत्तस्स विस्समत्थाणभूदा इअं पि णाम पदुमावदी अस्सत्था जादा । जाव पविसामि । (प्रविश्यावलोक्य) अहो परिजणस्स पमादो । अस्सत्थं पदुमावदिं केवळं दीवसहाअं करिअ परित्तजदि । इअं पदुमावदी ओसुत्ता । जाव उववसामि । अहवा अञ्ञासणपरिग्गहेण अप्पो विअ सिणेहो पडिभादि । ता इमस्सिं सय्याए उववसामि । (उपविश्य) किंणुहु एदाए सह उववसिन्तीए अज्ज पहळादिदं विअ मे हिअअं । दिट्ठिआ अविच्छिण्णसुहणिस्सासा । णिव्वुत्तरोआए होदव्वं । अहव एअदेससंविभाअदाए सअणीअस्स सूएदि मं आळिङ्गेहि त्ति । जाव सइस्सं । (शयनं नाटयति ।)

(क) अहो अकरुणाः खल्वीश्वरा मे । विरहपर्युत्सुकस्यार्यपुत्रस्य विश्रमस्थानभूतेयमपि नाम पद्मावत्यस्वस्था जाता । यावत् प्रविशामि । अहो परिजनस्य प्रमादः । अस्वस्थां पद्मावतीं केवलं दीपसहायां कृत्वा परित्यजति । इयं पद्मावत्यवसुप्ता । यावदुपविशामि । अथवान्यासनपरिग्रहेणाल्प इव स्नेहः प्रतिभाति । तदस्यां शय्यायामुपविशामि । किंनुखल्वेतया सहोपविशन्त्या अद्य प्रह्लादितमिव मे हृदयम् । दिष्ट्याविच्छिन्नसुखनिःश्वासा । निवृत्तरोगया भवितव्यम् । अथवैकदेशसंविभागतया शयनीयस्य सूचयति मामालिङ्गेति । यावच्छायिष्ये ।

अहो इत्यादि । विरहेत्यादिना अकारुण्यकार्यमुच्यते । इयमपि नाम पद्मावती अस्वस्था जाता, प्रथमं मामेकां विरहय्यार्यपुत्रस्य दुःखमुत्पादितं, ततो मद्विरहदुःखविनोदस्थानभूता दिष्ट्या पद्मावत्यासादिता । इयमपीदानीमस्वास्थ्यं चेन्नीता, किमतोऽप्यकारुण्यं देवानामस्तीत्यभिप्रायः ।

'अहो परिजणस्स' इत्यारभ्य 'जाव सइस्सं' इत्येवमन्ता वासवदत्ताया व्याहारास्तल्पसुप्ते नायके पद्मावत्यध्यासात् प्रवृत्ताः । नूनं हि रोगिणीशयनीयं शय्यागृहके भूतलादुन्नतायां खट्वायामौचित्यादास्तीर्णं; दीपश्च तनुप्रभो भूतलस्यैव क्वचन कोणे तथा निवेशितो यथा प्रभाप्रसराभिघातस्य शयितो जनो न गोचरः स्यात्; पद्मावत्या एव च तच्छय्यागृहकं; पद्मावत्यन्वासनार्थमेव च परमाप्तया तच्चेट्या वासवदत्ता यत्नादानीय समुद्रगृहकं प्रवेशिता; स्वयं च सा चेटी तत्रैवौषधमानेतु-

राजा—(स्वप्नायते ।) हा वासवदत्ते !

वासवदत्ता—(सहसोत्थाय) (क) हं अय्यउत्तो, ण हु पदुमावदी । किंणुखु दिट्ठह्मि । महन्तो खु अय्यजोअन्धराअणस्स पडिण्णाहारो मम दंसणेण णिप्फळो संवुत्तो ।

(क) हम् आर्यपुत्रः, न खलु पद्मावती । किन्नुखलु दृष्टास्मि । महान् खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलः संवृत्तः ।

मौषधसाधनस्थानमुपधावितवती; सत्येतावति कारणकलापे समुद्रगृहकास्तीर्णतल्पशयिते जने पद्मावतीबुद्धिरेवानाहार्या वासवदत्तायाः स्वरसादुपजायते, तदन्यशङ्काकारणस्य कस्याप्यनुपस्थानात् । न ह्यतिशीतलायां तस्यां वेलायां प्रावारावृतशरीरे दीपप्रभाप्रसरविषयपरिहारेण शयिते जने नायकशङ्काजननक्षमं शरीरगतं किञ्चिद् दृश्यं भवति, न वा नायकपरिजनः कश्चित् तत्रोपलब्धः । तस्मात् समुद्रगृहकास्तीर्णपद्मावतीशयनीयसुप्ते नायके वासवदत्तायाः पद्मावत्यध्यासः सुष्ठु श्लिष्टः ।

अहो इत्यादि । प्रमादोऽनवधानम् । दीपसहायां केवलं दीपसहायामेव । यावदुपविशामीत्यासनान्तरपरिग्रहाभिप्रायम् । एकासनोपवेशयोग्यस्यासनान्तरपरिग्रहे महानपि स्नेहोऽल्प इव प्रतिभास्यतीत्यतस्तं प्रतिक्षिपति — **अथवे**त्यादि । शय्यायामुपविशामि शयितया पद्मावत्या सहैव । प्रह्लादितं प्रह्लादः सन्तोषः, सोऽस्य सञ्जातः प्रह्लादितम् , अकस्माच्च मनसः सन्तोषः कल्याणमासन्नं शंसतीति भावः । अविच्छिन्नसुखनिःश्वासा अविच्छिन्नो बद्धसन्तानः सुखो निर्यत्ननिर्गमश्च निःश्वासो यस्याः सा तथाभूता । अत एवाह—निवृत्तरोगया प्रकृतिस्थया । तत्स्पर्शविकलं तूष्णीमुपवेशं वात्सल्यासदृशं मन्यमाना प्रतिक्षिपति — **अथवे**ति । शयिष्य इति वक्ष्यति । शयनं चालिङ्गनार्थम् , आलिङ्गनं च पद्मावत्याप्याकाङ्क्षितमित्याह — शयनीयस्य, एकदेशसंविभागतया एकदेशः संविभागः प्रियजनोपयोगयोग्यतया विसृष्टो भागः यस्य तद् एकदेशसंविभागं तत्तया, शय्याया एकदेशं प्रियजनशयनपर्याप्तमुपकल्प्यैकदेशान्तरे स्वयं शयनादिति तात्पर्यम् । मामालिङ्गेति, सूचयति स्वाभिप्रायमाविष्करोति ॥

स्वप्नायते इत्यादि । स्वप्नशब्दो वृत्तौ तद्वति वर्तते, स्वप्नवान् भवतीत्यर्थः, भृशादित्वात् क्यङ् , लोहितादित्वात् क्यष् वा कल्प्यताम् । राज्ञो हि वासवदत्तास्मृतिपूर्वं निद्रां प्राप्तस्य तद्विषयः स्वप्नोऽयमत्यन्तमुचितः ॥

राजा—हा अवन्तिराजपुत्रि !

वासवदत्ता—(क) दिट्ठिआ सिविणाअदि खु अय्यउत्तो । ण एत्थ कोच्चि जणो । जाव मुहुत्तअं चिट्ठिअ दिट्ठिं हिअअं च तोसेमि ।

राजा—हा प्रिये ! हा प्रियशिष्ये ! देहि मे प्रतिवचनम् ।

वासवदत्ता—(ख) आळवामि भट्टा ! आळवामि ।

राजा—किं कुपितासि ।

वासवदत्ता—(ग) ण हि ण हि, दुक्खिदह्मि ।

राजा—यद्यकुपिता, किमर्थं नालङ्कृतासि ।

(क) दिष्ट्या स्वप्नायते खल्वार्यपुत्रः । नात्र कश्चिज्जनः । यावन्मुहूर्तकं स्थित्वा दृष्टिं हृदयं च तोषयामि ।

(ख) आलपामि भर्तः ! आलपामि ।

(ग) नहि नहि, दुःखितास्मि ।

हृमित्यादि । किन्नुखलु दृष्टास्मि, आर्यपुत्रेण जाग्रता । प्रतिज्ञाभारः मत्स्वरूपावच्छादैकसापेक्षफलोदय इत्यर्थः ॥

पुनः सम्बोधनान्तरप्रयोगेण लक्षणान्तरेण च नायकस्य स्वप्नावस्थामवधार्य साश्वासमाह — **दिट्ठिआ** इत्यादि ॥

पुनः स्वप्नप्रलापसन्तानः— **हा प्रिये** इत्यादि ।

चिराद् यदृच्छाघटितेऽस्मिन् प्रियस्य समागमे 'देहि मे प्रतिवचनम्' इति तत्प्रार्थनायां श्रुतायां तूष्णीं स्थातुमसमर्था स्वप्नविस्रम्भात् प्रतिवचनमाह—**आळवामीत्यादि** ॥

स्वप्नवृत्त्यनुवृत्तावपि आलपामीत्यादिर्वासवदत्तालापस्तद्ध्वनिबलेषदुन्मिषितश्रोत्रवृत्तिसम्भेदवशान्नायकस्य हृदयं प्रविष्टः । अतः स्वप्नदृष्टामेव प्रतिवचनदायिनीं मन्यमानः पृच्छति — **किं कुपितासीति** ॥

तत्रोत्तरमाह — **ण हीति** । न हि नैव कुपितास्मि । निषेधस्य पुनर्वचनं दार्ढ्याय । दुःखितास्मि न मे कोपः, किन्तु दुःखमिति स्वावस्थाख्यानम् ॥

वासवदत्तावचनस्यास्य द्वावंशौ 'नहि नही'त्येको, 'दुःखितास्मी'त्यपरः । तत्राद्योऽशः परं स्वप्नवृत्तौ क्षणिकश्रोत्रवृत्तिसंभेदान्नायकस्य हृदयं गतः । अत-

वासवदत्ता—(क) इदो वरं किं ।

राजा—किं विरचिकां स्मरसि ।

वासवदत्ता—(सरोषम्) (ख) आ अवेहि, इहावि विरचिआ ।

राजा—तेन हि विरचिकार्थं भवतीं प्रसादयामि । (हस्तौ प्रसारयति ।)

(क) इतः परं किम् ।

(ख) आ अपेहि, इहापि विरचिका ।

स्तच्छ्रोतृसदृशमाह — **यद्यकुपितेत्यादि** । किमर्थं नालङ्कृतासि, अनलङ्कारकारणत्वेन मया शङ्कितः कोपः, स त्वया प्रतिषिद्धः, किमन्यत् तर्हि तवानलङ्कारकारणमित्यर्थः । दुःखितास्मीति वचनस्य हृदयप्रविष्टत्वे दुःखस्यैवानलङ्कारकारणस्यावगतत्वाद् अनलङ्कारकारणमन्यन्न पृच्छयेत, किन्तु दुःखकारणमेव पृच्छयेत 'किमर्थं दुःखितासी'ति ॥

वासवदत्ता तु स्वोक्तितो नायकेनागृहीतं दुःखरूपं कारणं प्रयत्नेन ग्राहयितुं तत्प्रतिबोधभयादनिच्छन्ती तटस्थमालपति — **इदो वरमिति** । इतः स्वबुद्धिस्थाद् दुःखात् । परम् अन्यत् । किं कारणमपेक्षितमिति शेषः । इह 'इत' इति सर्वनाम्ना दुःखस्योपादानं स्वबुद्ध्यनुसारात् । नायकं प्रति बुबोधयिषायां तु दुःखपदेनैव तत् कर्त्तव्यमिति ध्येयम् ॥

अनलङ्कारकारणस्य वासवदत्तोक्तस्याग्रहणेन 'किमर्थं नालङ्कृतासी'ति स्वप्रश्नस्योत्तरालाभात् कोपमेव पूर्वशङ्कितमनलङ्कारकारणं स्वयं निश्चित्य कोपस्येदानीं कारणं तर्कयति — **किं विरचिकां स्मरसीति** । विरचिका नाम वासवदत्तायाः सपत्नीकल्पा काचिद् उदयनस्य भोगिनी । विरचितामिति क्वचित् पाठः । सपत्नीस्मरणं च स्त्रीणां कोपकारणेषु मूर्धाभिषिक्तम् । विरचिकाकथा कथासरित्सागरे कथामुखलम्बकेऽनुसन्धेया ॥

सरोषमिति । सपत्नीनामग्रहणाद् रोषः ॥

आ अवेहीति । आशब्दः कोपद्योतकः । अस्तु लावाणके कौशाम्ब्यां वा विरचिकाकथा; अत्र पद्मावतीगृहे कुतस्तत्प्रसक्तिरित्याभिप्रायकं काकुगर्भमाह— इहापि राजगृहेऽपि विरचिका । विरहिआ इति क्वचित् पाठः ॥

इदं रोषवाक्यं तदध्वनिशक्तीषदुन्मिषितश्रोत्रवृत्तिसम्भिन्नायां स्वप्नवृत्तौ हृद-

वासवदत्ता—(क) चिरं ठिदह्मि । को वि मं पेक्खे । ता गमिस्सं । अहव, सय्यापळम्बिअं अय्यउत्तस्स हत्थं सअणीए आरोविअ गमिस्सं । (तथा कृत्वा निष्क्रान्ता ।)

राजा—(सहसोत्थाय) वासवदत्ते ! तिष्ठ तिष्ठ । हा धिक् ।

निष्क्रामन् सम्भ्रमेणाहं द्वारपक्षेण ताडितः ।
ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः ॥ ७ ॥

(क) चिरं स्थितास्मि । कोऽपि मां पश्येत् । तद् गमिष्यामि । अथवा, शय्याप्रलम्बितमार्यपुत्रस्य हस्तं शयनीय आरोप्य गमिष्यामि ।

यप्रविष्टं स्वप्नदृष्टवासवदत्तोदीरितं मन्यमानस्तां प्रसादयति — **तेन हीत्यादि** । विरचिकार्थं विरचिकानामग्रहणापराधमार्जनार्थम् ।

हस्ताविति । हस्तयोः प्रसारणं सामुदाचारिकं प्रसादने ॥

स्वप्नप्रलापानुरोधप्रवृत्तेषु जाग्रज्जनालापेषु कतिपयानां ग्रहणं ग्रहणसदृशमुत्तरदानं च स्वप्नायमानेन कदाचित् क्रियमाणं बहुशो लोके दृष्टम् । तदनुसारेणायं स्वप्नजागरसंवादो घटितः ॥

चिरमिति । चिरं स्थितास्मि, आर्यपुत्रदर्शन-तत्स्वप्नालापश्रवणरसादात्मनोऽवस्थान्तरमचिन्तयित्वेत्यात्र्थम् । कोऽपि मां पश्येद्, दिष्टयैव न कश्चिदियच्चिरं मां दृष्टवान् । अतो न युक्तमितः परमिह स्थातुं, तद् गमिष्यामि । भर्तृदर्शनतदालापश्रवणसुखाभ्यामनुभूताभ्यामभ्यर्हितं तत्स्पर्शसुखं परिशिष्टं कामयमाना तल्लाभानुकूलं गमनप्राक्कालावश्यकार्यं कमपि व्यापारमध्यवस्यति — **अथवेत्यादि** । अथवेति पूर्वाध्यवसितगमनप्रतिक्षेपः । शय्याप्रलम्बितं शय्यायाः प्रलम्बितं प्रसारणवशात् खट्वास्तृतशय्याप्रान्तमतीत्य बहिर्लम्बनं प्राप्तम् । हस्तं प्रसारितयोरन्यतरं । शयनीये आरोप्य शयनीयान्तर्गतं कृत्वा । एतच्च लम्बनसम्भाव्यव्यथापरिहाराय । गमिष्यामि ॥

सहसेति । सहसोत्थाय वासवदत्ताकरसंस्पर्शेन झटिति प्रतिबुध्य शयनीयादुत्थाय ।

निष्क्रामन्तीमेव दृष्टया गोचरयन्नाह—**वासवदत्ते** ! इत्यादि । तदनुधावनप्रतिबन्धमासाद्याह—**हा धिगिति** ।

कष्टमेव निरूपयति—**निष्क्रामन्निति** । अहं सम्भ्रमेण निष्क्रामद्वासवदत्तापरीक्षणत्वरया । निष्क्रामन् तामनुनिर्गच्छन् सन् । द्वारपक्षेण समुद्रगृहकद्वारपार्श्वेन ।

(प्रविश्य)

विदूषकः—(क) अइ पडिबुद्धो अत्तभवं ।

राजा—वयस्य ! प्रियमावेदये, धरते खलु वासवदत्ता ।

विदूषकः—(ख) अविहा वासवदत्ता । कहिं वासवदत्ता । चिरा खु उवरदा वासवदत्ता ।

राजा—वयस्य ! मा मैवं ,

शय्यायामवसुप्तं मां बोधयित्वा सखे ! गता ।
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता ॥ ८ ॥

(क) अयि प्रतिबुद्धोऽत्रभवान् ।

(ख) अविहा वासवदत्ता । कुत्र वासवदत्ता । चिरात् खलूपरता वासवदत्ता ।

ताडितः घट्टयित्वा प्रतिरुद्धः । तेन तदनुनिष्क्रमणस्य यथावदसिद्धया तत्परीक्षणं मे न सिद्धमिति भावः । ततः तस्मात् कारणात् । अयम् अनुभूतं वासवदत्तादर्शनरूपं वस्तु । विधेयगतपुंस्त्वविवक्षया पुँल्लिङ्गनिर्देशः । भूतार्थः यथार्थः किम् । मनोरथः इष्टार्थविषया मानसी कल्पना किम् । उभयत्र प्रश्नकाकुः । व्यक्तं स्फुटम् । न जानामि, वाक्यार्थः कर्म, तदिदमनुभूतं सत्यमिति वासत्यमिति वा नावधारयामीत्यर्थः ॥ ७ ॥

प्रविश्येति गृहीतप्रावारकस्य विदूषकस्य प्रवेशः ॥

अइ इत्यादि ॥

'भूतार्थोऽयं मनोरथः' इत्युल्लिखितयोः कोट्योर्भूतार्थत्वकोटिं प्रियत्वादुत्कटत्वाच्चाश्रित्याह — **वयस्येत्यादि** । धरते खलु ध्रियत एव ॥

अविहेत्यादि । अविहेत्यस्य स्थाने आ इति क्वचित् पाठः । आशब्दश्चानुकम्पायाम् ॥

वयस्येति । एवम् उपरतेत्यनेन प्रकारेण, मा मा, वादीरिति शेषः ।

शय्यायामित्यादि । बोधयित्वा गतेति बोधनगमनयोः पौर्वापर्योक्त्या बोधनानन्तरं जाग्रति मयि सा गतेत्यर्थलाभात् तद्बोधनाविर्भावितायामस्यां जागरावस्थायामेव तद्गमनं मया प्रत्यक्षितमिति प्रकाशितम् ॥ ८ ॥

विदूषकः—(क) अविहा असम्भावणीअं एदं ण । आ उदअह्णाणसङ्कित्तणेण तत्तहोदिं चिन्तअन्तेण सा सिविणे दिट्ठा भवे ।

राजा—एवं, मया स्वप्नो दृष्टः ।

यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम् ।
अथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे चिरम् ॥ ९ ॥

(क) अविहा असम्भावनीयमेतद् न । आ उदकस्नानसङ्कीर्तनेन तत्रभवतीं चिन्तयता सा स्वप्ने दृष्टा भवेत् ।

अविहेत्यादि । एतद् रुमण्वद्वञ्चनम् असम्भाव्यं न, नेति काकुः, असम्भावनीयं न किमित्यर्थः । अथवा एतद् वासवदत्ताकर्तृकं बोधयित्वागमनम् । बोधयित्वागमनस्य स्वप्नसम्भाव्यतां वक्तुं स्वप्नकारणस्मरणपूर्वकं स्वप्ने वासवदत्तादर्शनं तर्कयति — आ उदकेत्यादि । उज्जयिनीगतोदकस्नानसङ्कीर्त्तनस्य कृतपूर्वस्य स्मरणम् 'आ' इत्यनेन द्योत्यते ॥

एवमिति । एवम् इत्थं, मन्यस इति शेषः । कथमिति चेदाह—मया स्वप्नो दृष्टः । स्वाप्निकमेव वासवदत्ताकर्तृकं बोधयित्वागमनं मयानुभूतं, न तु जागरवृत्तं जागरेऽनुभूतम् । इत्येवमित्यार्थः पूर्वेण सम्बन्धः । अविहेत्यादेः 'आ' इत्येतदन्तस्यस्थाने 'मा दाणिं भवं अदिमत्तं सन्तप्पिदुं' इति क्वचित् पाठः ।

वासवदत्ताकर्तृकबोधनजनिते जागरे मया प्रत्यक्षितस्य वासवदत्तागमनस्य स्वप्नवृत्तत्वसमर्थनायां तस्मिन्नेव जागरे त्वत्संवादसुभगामिदानीमनुभूयमानेऽपि मम स्वप्न उन्मादो वा कल्पनीय आपद्यत इति तर्कयन्नाह — **यदीति** । अयम् इदानीमनुभूयमानो गमनसाक्षाद्दर्शनाधिकरणभूतोऽवस्थाविशेषो जागरात्मेत्यर्थः । स्वप्नो यदि स्वप्नावस्था चेत् । अप्रतिबोधनं तस्मात् स्वप्नादनुत्थानम् । धन्यं प्रियं, वासवदत्ताकथानुबन्धितया स एव स्वप्नो मम भूयोऽनुवर्त्ततामिति भावः । पक्षान्तरमाह — अथवा, अयं, विभ्रमः उन्मादः, न तु स्वप्नः । स्याद्यदि, तर्हि विभ्रमो मे चिरम् अस्तु अनुवर्त्ततां, वासवदत्ताकथानुबन्धित्वाद् विभ्रमदोषोऽपि ममाशंसनीय एवेत्यभिप्रायः । हिशब्दोऽवधारणे पादपूरणे वा । विभ्रमोऽपीति वा पाठः । अनुज्ञालङ्कारः ॥ ९ ॥

विदूषकः —(क) भो! वअस्स! एदस्सिं णअरे अवन्तिसुन्दरी णाम जक्खिणी पडिवसदि । सा तुए दिट्ठा भवे ।

राजा—न न,

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम् ।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥ १० ॥

अपिच वयस्य! पश्य पश्य,

(क) भो वयस्य! एतस्मिन् नगरेऽवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति । सा त्वया दृष्टा भवेत् ।

नायकोपन्यस्तं स्वप्नोन्मादयोरापादनं परिहर्त्तुं नायकस्य जागरेऽपि वासवदत्ताभ्रमसम्भवनिमित्तं सम्भाव्याह — **भो वअस्से**त्यादि । अवन्तिसुन्दरीति नामान्वर्थत्वाद् अवन्तिदेशभवयोषित्साधारणरूपवेषयुक्तत्वं यक्ष्याः सूचितम् । सा त्वया दृष्टा भवेत्, अस्यां जागरावस्थायामेव; अतश्च यक्ष्यामेव ते वासवदत्ताभ्रमो जातो भवेदित्यभिप्रायः । 'मा दाणिं भवं अत्ताणं ओहसिअं कादुं । किन्तु इमस्सिं राअउळे' इति पाठो 'णअरे' इत्यन्तस्य स्थाने क्वचिद् दृश्यते ॥

स्वप्नोन्मादावनारोप्य मम जागरावस्थां चेदङ्गीकरोषि तर्हि नैव मया यक्षिणी दृष्टा, यस्यां मे वासवदत्ताभ्रमस्त्वया सम्भावित इत्याह — **नेति** । द्विरुक्तिर्निषेधदार्ढ्याय । किन्तु वासवदत्तैव साक्षाद् दृष्टेत्यर्थः ।

या दृष्टा सा न यक्षिणी अपि तु वासवदत्तेति निश्चयाधिगमे कारणमाह— **स्वप्नस्येति** । स्वप्नस्य, अन्ते अवसाने । विबुद्धेन प्रतिबोधं प्राप्तेन । अर्थान्मया, चारित्रं रक्षन्त्या अपि, न केवलं जीवन्त्या एव किन्तु प्रियवियुक्तकुलपालिकोचितं शीलं परिपालयन्त्या अपीत्यर्थः । तस्या इति शेषः । नेत्रविप्रोषिताञ्जनं नेत्राभ्यां विप्रोषितं चिरकालापगतम् अञ्जनं यस्मिंस्तत् तथाभूतम् । अनेनालङ्कारवर्जनरूपं प्रियवियुक्तपतिव्रताचारित्रमुक्तम् । दीर्घालकं असंयतलम्बचूर्णकुन्तलम् । अनेन शरीरसंस्कारवर्जनमुक्तम् । मुखं, दृष्टम् । साक्षात् तन्मुखदर्शनेन निश्चितेऽर्थे कोऽन्यथाशङ्काया अवकाश इति भावः ॥ १० ॥

न केवलं मुखदर्शनं वासवदत्तायाः, स्पर्शनमपि सत्यं मयानुभूतं, यज्जनितो रोमाञ्चो मद्बाहाविदानीमपि ते लक्ष्य इत्याह — **अपिचे**त्यादि । पश्य पश्य सम्यग् लक्षय । श्लोकवक्ष्यमाणयच्छब्देन तच्छब्दाक्षेपात् तमिति कर्मलाभः ।

योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः ।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ॥ ११ ॥

विदूषकः — (क) मा दाणि भवं अणत्थं चिन्तिअ । एदु एदु भवं । चउस्सालं पविसामो ।

(प्रविश्य)

काञ्चुकीयः — जयत्वार्यपुत्रः । अस्माकं महाराजो दर्शको भवन्तमाह — एष खलु भवतोऽमात्यो रुमण्वान् महता बलसमुदयेनोपयातः खल्वारुणिमभिघातयितुम् । तथा हस्त्यश्वरथपदातीनि मामकानि विजयाङ्गानि सन्नद्धानि । तदुत्तिष्ठतु भवान् । अपिच,

---

(क) मेदानीं भवाननर्थं चिन्तयित्वा । एत्वेतु भवान् । चतुःशालं प्रविशावः ।

य इति । तया देव्या । सन्त्रस्तया सत्या निपीडितः मत्प्रतिबोधशङ्कितया सत्या हस्तगृहीतः, अगाढगृहीत इत्यर्थः, शङ्कितो ह्यगाढं गृह्णाति, अगाढग्रहणाच्च शङ्कितत्वमूहितमिति भावः । अयं तव पुरो मया प्रदर्श्यमानः । यो बाहुः, स्वप्ने उत्पन्नसंस्पर्शोऽपि, किं पुनर्जागरे समुपजाततत्परिष्वङ्ग इति अपिशब्देन द्योत्यते । रोमहर्षं न मुञ्चति आनन्दरोमाञ्चमिदानीमप्यनुभवति । तं पश्येति पूर्वेणान्वयः ॥११॥

विदूषकस्तु नायकस्योक्तिमुन्मत्तालापं मन्यमानस्तमन्यतो व्याक्षेप्तुमाह — मा दाणि इत्यादि । माङि ल्यबपाणिनीयः । क्वचिदिदं विदूषकवाक्यं न पठ्यते ॥

तदित्थमतिरमणीयकारणकार्यसंयुक्तो नायकस्य वासवदत्ताविषयः स्वप्नो लोकोत्तरचमत्कारकारी स्वप्नवासवदत्तव्यपदेशहेतुः संघटितः ॥

अथ पद्मावतीपरिणयपरमफलस्य शत्रुहृतराज्यप्रत्यापत्तिरूपस्यार्थस्य सिद्ध्यर्थं शत्रुं प्रत्यभियोगे कर्त्तव्ये तदनुकूला साधनसम्पद् इयता कालेन रुमण्वता मन्त्रिणा, दर्शकेन च नायकस्यालेन सुसंविहिता । तेन शत्रुं प्रत्यभियानं नायकस्य प्राप्तावसरम् । अतो नायकमभिषेणने त्वरयितुं दत्तसन्देशेन दर्शकेन प्रेषितस्य काञ्चुकीयस्य प्रवेशः — **प्रविश्य काञ्चुकीय** इति ॥

जयत्वित्यादि । आर्यपुत्र इति राजानं प्रति दर्शककञ्चुकिनः समुदाचारः स्वराजदारिकायाः स आर्यपुत्र इति कृत्वा । स च तस्यां कञ्चुकिनः स्वराजदारि-

भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः
पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम् ।
यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव ॥ १२ ॥

राजा — (उत्थाय) बाढम् । अयमिदानीम्,

काविषयवात्सल्याद्यतिशयद्योतकः । आरुणिम् आरुण्यभिधानं शत्रुम् । हस्त्यश्वरथपदातीनि हस्त्यश्वरथानुगताः पदातयो येषु तानि । अनुगतपदान्तर्भावेण बहुब्रीहिः । उत्तिष्ठतु अभिषेणनायोद्यच्छतु ।

अन्यच्चोत्थानोचितं संविहितमित्याह — **अपिचेति** ।

भिन्ना इति । ते रिपवः, भिन्नाः, भेदोपायेन परस्परासंहताः कृताः । भवद्गुणरताः शत्रुहस्तगमनेऽपि त्वद्गुणेष्वेवानुरागबन्धात् त्वामेव राजानमाशंसमाना इति भावः । पौराः समाश्वासिताः शीघ्रं वो राजा शत्रुं जेष्यतीत्युक्त्याश्वासं नीताः । 'पार्ष्णी यापी'ति पाठः । भवत्प्रयाणसमये, यापि पार्ष्णी सैन्यपृष्ठं शत्रुभ्यो रक्षणीयं । तस्याः, विधानं कृतं रक्षोपायः कृतः । पार्ष्णीशब्द एव वा लक्षणया पार्ष्णिरक्षायां वर्त्तते; तदा 'विधानं कृतमि'त्यस्य उपायः कृत इत्यर्थः । पार्ष्णिशब्दः 'पार्ष्णिः स्यादुन्मदस्त्रियाम् । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च' इति मेदिनीदर्शनात् स्त्रीलिङ्गः । ततः 'कृदिकारादक्तिनः' (ग० ४-१-४५) इति ङीषि पार्ष्णीशब्दोऽपि भवति । 'पार्ष्णी चापि भवत्प्रयाणे'ति बहुत्र पठ्यते, क्वचिच्च 'पार्ष्णीचापि भवान् प्रयाणे'ति । इमौ तु पाठौ चिन्त्यार्थौ । अरिप्रमाथजननं शत्रुप्रध्वंसानुकूलं । यद्यत् । साध्यं करणीयं । तत्तत् तदखिलं, वीप्सायां द्वित्वम् । मया, अनुष्ठितं साधितम् । अतस्तद्विषया चिन्ता भवता न कार्येति भावः । बलानि चास्मदीयानि इतः परं प्रस्थास्यन्ते, किन्तु प्रागेव प्रस्थाय गङ्गापरतीरमासाद्य त्वदागमनं प्रतिपालयन्तीत्याह — बलैः सैन्यैः । त्रिपथगा त्रिभिः पथिभिः आकाशभूमिपातालमार्गैर्मन्दाकिनीगङ्गाभोगवत्याख्याभिर्गच्छन्ती । नदी गङ्गा । तीर्णा चापि लङ्घिता च । सर्वसाधनसंविधानयोगात् शत्रुजयस्तव करगत इत्याह — वत्साश्च, तव हस्ते, आयत्ता मन्तव्या इति शेषः ॥ १२ ॥

बाढमिति । बाढं यन्मम स्यालेनोच्यते तदङ्गीकरोमि ॥

विजिगीषुसमुचितमात्मनः शौर्यारम्भं सोत्साहं प्रतिजानीते — **अयमिदा-**

उपेत्य नागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्मदक्षम् ।
विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि नाशयामि ॥ १३ ॥

(निष्क्रान्ताः सर्वे ।)

पञ्चमोऽङ्कः ।

नीमुपेत्येति । इदानीम् , अयमहम् , उपेत्य सेनया सह शत्र्वधिष्ठानं प्राप्य । नागेन्द्रतुरङ्गतीर्णे नागेन्द्रास्तुरङ्गाश्च तीर्णाः सप्लवनाः ससञ्चारा यस्मिंस्तथाभूते । तीर्णपदस्य कर्तृक्तान्तस्याहिताग्न्यादित्वात् परनिपातः । तीर्णशब्दस्थाने कीर्णशब्दः क्वचित् पठ्यते । विकीर्णबाणोग्रतरङ्गभङ्गे बाणा उग्रतरङ्गाणां भङ्गाः खण्डा इव बाणोग्रतरङ्गभङ्गाः, उपमितसमासः, ते विकीर्णा यस्मिंस्तस्मिंस्तथाभूते । महार्णवाभे महोदधिद्युतौ । युधि युद्धे । दारुणकर्मदक्षम् अनेन शूरत्वं वध्यत्वं चोक्तम् । तम् आरुणिं, नाशयामि । अत्र युच्छब्दोऽस्मादेव प्रयोगात् पुंस्यपि द्रष्टव्यः संयच्छब्दवत् । संयच्छब्दव्याख्यायां हि अमरकोशटीकासर्वस्वकार आह — "रवेजि संयत्यतुलास्त्रगौरवे इति दण्डिना पुमान् संयत् प्रयुक्तः" इति ॥ १३ ॥

निष्क्रान्ताः सर्व इति पञ्चमाङ्कपूर्तिः ॥

पञ्चमोऽङ्कः ।

अथ षष्ठोऽङ्कः ।

(ततः प्रविशति काञ्चुकीयः ।)

काञ्चुकीयः — क इह भोः ! काञ्चनतोरणद्वारमशून्यं कुरुते ।

(प्रविश्य)

प्रतीहारी — (क) अय्य ! अहं विजआ । किं करीअदु ।

काञ्चुकीयः — भवति ! निवेद्यतां निवेद्यतां वत्सराज्यलाभप्रवृद्धोदयायोदयनाय — एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः

(क) आर्ये ! अहं विजया । किं क्रियताम् ।

अथ षष्ठोऽङ्कः ।

पञ्चमाङ्क उज्जयिनीसङ्कीर्त्तनप्रयुक्ता वासवदत्ताविषया स्मृतिर्नायकस्य विप्रलम्भकरुणपरिपोषिका प्रपञ्चिता । इह पुनश्चरमेऽङ्के वासवदत्तोत्सङ्गनित्योपलालितघोषवत्याख्यवीणाधिगमजनिता करुणपोषिका वासवदत्तास्मृतिः, तत्स्मृत्यनुभावानुभववेलायां वासवदत्ताबन्धूपहृतचित्रफलकदर्शनम्, आवन्तिकायां चित्रदृष्टवासवदत्तासादृश्यपरीक्षणं, सिद्धादेशप्रत्ययकृतस्वप्रवृत्त्यविसंवादकृतिनो यौगन्धरायणस्य तत्समयसन्निधानं, न्यासस्य सम्यक्पालनधन्यया पद्मावत्या वासवदत्ताबन्धुसमक्षे यौगन्धरायणाय प्रत्यर्पणप्रसक्तिः, वासवदत्तायौगन्धरायणयोस्तत्त्वतोऽवगमनं, यौगन्धरायणेन नायकाय स्वप्रवृत्तिप्रयोजनादिविज्ञापनं, तेन पद्मावतीलाभ-राज्यप्रत्यानयन-वासवदत्ताप्रतिलम्भरूपाभ्युदयत्रितयसंयुक्तस्य नायकस्य प्रीत्युत्कर्षश्च प्रतिपाद्यन्ते ।

गताङ्कान्ते नायकस्य युद्धोद्यम उक्तः । युद्धस्य च परोक्षमपि वर्णनमिह करुणपरिकरितप्रवासविप्रलम्भरसस्रोतोवाहिनि नोचितमिति तत् परिहृत्य नायकस्य तत्फलभूतराज्यलाभसिद्धिं घोषवत्युपलम्भनिमित्तमवस्थान्तरं च कथावस्त्वनुगुणं प्रतिपादयितुं मिश्रविष्कम्भारम्भः । तत्रादौ वत्सराज्यलाभतुष्टस्य महासेनस्य सन्देशहरं काञ्चुकीयं प्रवेशयति — तत इत्यादि ॥

क इहेत्यादि । काञ्चनतोरणद्वारं स्वर्णलेपादिचित्रितं बहिर्द्वारम्, अर्थाद्राजनिकेतनस्य । रत्नतोरणेति क्वचित् पाठः । अशून्यं सनाथम् ॥

अय्येत्यादि ॥

भवतीत्यादि । 'एष खल्वि'त्यादिर्निवेदनीयवस्तुप्रकारः । रैभ्यसगोत्रः

प्राप्तः, तत्रभवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च, प्रतीहारमुपस्थिताविति ।

प्रतीहारी — (क) अय्य ! अदेसकाळो पडिहारस्स ।

काञ्चुकीयः — कथमदेशकालो नाम ।

प्रतीहारी — (ख) सुणादु अय्यो । अज्ज भट्टिणो सुय्यामुहप्पासादगदेण केण वि वीणा वादिदा । तं च सुणिअ भट्टिणा भणिअं — घोसवदीए सद्दो विअ सुणीअदि त्ति ।

(क) आर्य ! अदेशकालः प्रतीहारस्य ।

(ख) श्रृणोत्वार्यः । अद्य भर्तुः सूर्यामुखप्रासादगतेन केनापि वीणा वादिता । तां च श्रुत्वा भर्त्रा भणितं—घोषवत्याः शब्द इव श्रूयत इति ।

रैभ्यशब्देन सनामकः रैभ्यनामेत्यर्थः । अङ्गारवत्या प्रद्योतपत्न्या । वासवदत्ताधात्री वासवदत्ताया उपमाता च, प्राप्तेति विपरिणामेनान्वयः । प्रतीहारमुपस्थितौ, एताविति शेषः ॥

अय्येति । आर्य ! प्रतीहारस्य द्वाराधिकृतस्य जनस्येत्यर्थः । अदेशकालः योग्यदेशयुक्तो योग्यकालो देशकालः, तदभावोऽदेशकालः, न प्रतिहार्युपगम्यो राज्ञो देशो न च प्रतिहारीविज्ञापनानुकूलो राज्ञोऽवसर इत्यर्थः । अथवा देशकालशब्दो योग्यकाले रूढः ॥

कथमित्यादि । अदेशकालस्य कारणप्रश्नः ॥

सुणादु इत्यादि । भर्तुः वत्सराजस्य । सूर्यामुखप्रासादगतेन सूर्याया नवोढाया अर्थात् पद्मावत्याः मुखप्रासादं प्रासादपुरोभागं गतेन, 'देवक्या सूर्यया सार्धं' (भागव० स्क० १०. अ० १) इति श्लोकव्याख्यायां सूर्यया नवोढया इति श्रीधरः । अथवा सूर्या विवाहदेवता सा मङ्गलार्थं गजलक्ष्म्यादिदेवतावद् दारुशिलाद्युत्कीर्णा मुखे यस्य प्रासादस्य स सूर्यामुखप्रासादः तं गतेन, एकाग्निकाण्डभाष्ये हि 'सूर्यो यः प्रत्यक्षं विद्यात् स एतत् प्रतिगृह्णीयात् ' (का० १८-९) इति मन्त्रं व्याकुर्वन् हरदत्तमिश्रः 'सूर्या नाम विवाहदेवता' इत्याह । घोषवत्यास्तदाख्याया वीणायाः । तया हि वासुकिभ्रात्रा वसुनेमिना दत्तया गजहृदयवशीकरणनिपुण उदयनः प्रसिद्धः । तत्कथाविस्तरः कथासरित्सागरे कथामुखलम्बके द्रष्टव्यः । इयमेव वीणा वासवदत्तयोपयुक्तेति प्रतिज्ञायौगन्धरायणे स्पष्टम् ॥

काञ्चुकीयः — ततस्ततः ।

प्रतीहारी—(क) तदो तहिं गच्छिअ पुच्छिदो—कुदो इमाए वीणाए आगमो त्ति । तेण भणिअं — अह्मेहिं णम्मदातीरे कुच्चगुम्मळग्गा दिट्ठा । जइ प्पओअणं इमाए, उवणीअदु भट्टिणोत्ति । तं च उवणीदं अङ्के करिअ मोहं गदो भट्टा । तदो मोहप्पच्चागदेण बप्फपय्याउळेण मुहेण भट्टिणा भणिअं — दिट्ठासि घोसवदि ! सा हु ण दिस्सदि त्ति । अय्य ! ईदिसो अणवसरो । कहं णिवेदेमि ।

काञ्चुकीयः — भवति ! निवेद्यताम् । इदमपि तदाश्रयमेव ।

(क) ततस्तत्र गत्वा पृष्टः — कुतोऽस्या वीणाया आगम इति । तेन भणितम् — अस्माभिर्नर्मदातीरे कूर्चगुल्मलग्ना दृष्टा । यदि प्रयोजनमनया, उपनीयतां भर्त्रे इति । तां चोपनीतामङ्के कृत्वा मोहं गतो भर्ता । ततो मोह-प्रत्यागतेन बाष्पपर्याकुलेन मुखेन भर्त्रा भणितं—दृष्टासि घोषवति ! सा खलु न दृश्यत इति । आर्य ! ईदृशोऽनवसरः । कथं निवेदयामि ।

ततस्तत इति । कौतुकातिशयाद् द्विरुक्तिः ॥

तदो इत्यादि । पृष्टः वीणावादकः । कूर्चगुल्मलग्ना कूर्चानां दर्भाणां गुल्मे प्रताने लग्ना सक्ता, 'कूर्चोऽस्त्री श्मश्रुपीठयोः । भ्रूमध्ये कत्थने दर्भे तन्तुवायपरिच्छदे' इति केशवः । 'कुचगुम्मळग्गा' इत्येव वा पाठः । भ्रमात्तु नूनं लेखकः चकारं य्यकारं लिखितवान् , अस्ति हि सादृश्यं तयोः कैरल्याम् । 'कोय्यगुम्मे'ति पाठस्तु चिन्त्यार्थः । मोहप्रत्यागतेन मोहात् प्रतिबुद्धेन, इदं भर्तृविशेषणम् । बाष्पपर्याकुलेनेति मुखविशेषणम् । मुखेनेति चोपलक्षणतृतीया । बप्फेत्यादिस्थाने 'बप्फपय्याउळोच्छूणमुहेण' इति पाठानुमानसदृशं* क्वचिन्मातृकायां लिखितं दृश्यते । बाष्पपर्याकुलम् अत एव उच्छूनं पीनं च मुखं यस्य तेन बाष्पपर्याकुलोच्छूनमुखेनेति तदर्थः । सा खलु यया त्वं नित्योपलालिता सा वासवदत्ता खलु । ईदृशः स्वप्रेयसीस्मरणदुःखानुबन्धी ॥

भवतीति । भवति! निवेद्यताम् , अस्मदुपस्थानमिति शेषः । इदमपि अस्मदुपस्थानमपि । तदाश्रयमेव वासवदत्तासम्बद्धमेव । प्रस्तुतानुकूलत्वादस्मदुपस्थाननिवेदनं राज्ञः प्रीतिकरमेव भविष्यतीत्याभिप्रायः ॥

---

*'बप्फपय्याउळणमुच्छूहणं' इति ।

प्रतीहारी—(क) अय्य ! इअं णिवेदेमि । एसो भट्टा सुय्यामुहप्पासादादो ओदरइ । ता इह एव्व णिवेदइस्सं ।

काञ्चुकीयः—भवति ! तथा ।

(उभौ निष्क्रान्तौ ।)

मिश्रविष्कम्भकः ।

(ततः प्रविशति राजा विदूषकश्च ।)

राजा—

श्रुतिसुखनिनदे ! कथं नु देव्याः
स्तनयुगले जघनस्थले च सुप्ता ।
विहगगणरजोविकीर्णदण्डा
प्रतिभयमध्युषितास्यरण्यवासम् ॥ १ ॥

(क) आर्य ! इयं निवेदयामि । एष भर्ता सूर्यामुखप्रासादादवतरति । तदिहैव निवेदयिष्यामि ।

अय्येत्यादि । 'एसो इत्यादिकं तथे'त्यन्तं क्वचिन्न पठ्यते ॥

मिश्रविष्कम्भ इति मध्यमाधमपात्रप्रयोजितत्वाद् मिश्रोऽयं विष्कम्भः ॥

ततः प्रविशतीत्यादि ॥

स्वप्रेयसीविरहदुर्भगां वीणामनुशोचति — **श्रुतीत्यादि** । हे श्रुतिसुखनिनदे! श्रुतिसुखः श्रोत्रानन्दकरः निनदो यस्यास्तस्याः सम्बुद्धिः । देव्याः स्तनयुगले जघनस्थले च, सुप्ता वादनश्रमनिद्रावसरेषु सुखस्थिता । त्वं, विहगगणरजोविकीर्णदण्डा विहगगणस्य पक्षिबृन्दस्य रजसा मलेन विकीर्णो व्याप्तो दण्डः प्रवालाख्योऽवयवो यस्याः सा तथाभूता सती । प्रतिभयं भयङ्करम् । अरण्यवासम् अरण्यरूपमालयं 'निकाय्यवासावसथनिकाय्यनिलयालयाः' इति यादवः । 'उपान्वध्याङ्वसः' (१. ४. ४८) इति कर्मत्वम् । कथन्नु अध्युषिता, कर्त्तरि क्तः । असि, तथानुभूतसुखा कथमिदानीमनर्हमरण्यवासक्लेशमनुभूतवतीत्यर्थः ॥ १ ॥

अपिच, अस्निग्धासि घोषवति! या तपस्विन्या न स्मरसि,

श्रोणीसमुद्वहनपार्श्वनिपीडितानि
खेदस्तनान्तरसुखान्युपगूहितानि ।
उद्दिश्य मां च विरहे परिदेवितानि
वाद्यान्तरेषु कथितानि च सास्मितानि ॥ २ ॥

विदूषकः — (क) अळं दाणि भवं अदिमत्तं सन्तप्पिअ ।

राजा — वयस्य ! मा मैवं,

(क) अलमिदानीं भवानतिमात्रं सन्तप्य ।

अथ तां स्वप्रेयस्यां निस्स्नेहां समर्थयन्नुपालभते — **अपिचेत्यादि** । हे घोषवति! अस्निग्धा स्नेहशून्या । असि, सति स्नेहे देवीकृतानि परमकमनीयानि त्वदुपलालनानि वक्ष्यमाणानि कथं त्वं व्यस्मरिष्य इति भावः । तद्विस्मरणमेवाह— येत्यादि, श्लोकान्वयि ।

श्रोणीति । या त्वं, तपस्विन्याः दीनायाः, दैन्यं चापदि रक्षकाप्राप्त्या । देव्या इति शेषः । श्रोणीसमुद्वहनपार्श्वनिपीडितानि श्रोणीसमुद्वहनानि पार्श्वनिपीडनानि च, श्रोणीव श्रोणी पृथुभाण्डाकारं दारुमयं वीणाङ्गं ककुभाख्यं, तस्याः समुद्वहनानि वादनकाले स्वोत्सङ्गेन धारणानि पार्श्वे पार्श्वेन वा निपीडितानि वीणादण्डसंस्पर्शनानि च । खेदस्तनान्तरसुखानि खेदे श्रमे स्तनान्तरे कुचावकाशे सुखानि विश्रमावहानि । उपगूहितानि आलिङ्गनानि । वादनश्रमावसरेषु विश्रमार्थं स्तनान्तरेण वीणादण्डमालिङ्ग्य क्षणावस्थानसम्भवाद् इत्थमुक्तिः । विरहे, मामुद्दिश्य, परिदेवितानि च विलापवादितानि च । वाद्यान्तरेषु वाद्यविशेषेषु येष्वपूर्वश्चमत्कारो दृष्टस्तेषु वाद्यवादनभङ्गिभेदेष्वित्यर्थः, वादनविच्छेदावसरेष्विति वार्थः । सस्मितानि, कथितानि च कथनानि च । न स्मरसि, स्मरसि चेत् कथं देवीमत्यक्ष्य इति भावः । अचेतनामन्त्रणान्नायकस्योन्मादावस्था कथिता । अत्र खेदेत्यादिपदे सप्तमीतत्पुरुषोत्तरपदकः सप्तमीतत्पुरुषः । खेदे इति पृथक्पदपाठो वा कल्प्यताम् ॥२॥

नायकमतिसन्तप्तमाश्वासयति — **अलमित्यादि** । 'सन्तप्पिदुं' इति क्वचित् पाठः ॥

वयस्येत्यादि । एवं, मा मा वारयेति शेषः । निवारयितुमशक्यो मे सन्ताप इति भावः ।

चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः ।
तां तु देवीं न पश्यामि यस्या घोषवती प्रिया ॥ ३ ॥

वसन्तक ! शिल्पिजनसकाशान्नवयोगां घोषवतीं कृत्वा शीघ्रमानय ।

विदूषकः — (क) जं भवं आणवेदि । (वीणां गृहीत्वा निष्क्रान्तः ।)

(प्रविश्य)

प्रतीहारी — (ख) जेदु भट्टा । एसो खु महासेणस्स सआसादो रब्भसगोत्तो कञ्चुईओ देवीए अङ्गारवदीए पेसिदा अय्या वसुन्धरा णाम वासवदत्ताधत्ती अ पडिहारं उवट्ठिदा ।

राजा — तेन हि पद्मावती तावदाहूयताम् ।

प्रतीहारी — (ग) जं भट्टा आणवेदि । (निष्क्रान्ता ।)

(क) यद् भवानाज्ञापयति ।

(ख) जयतु भर्ता । एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयो देव्याङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतिहारमुपस्थितौ ।

(ग) यद् भर्ताज्ञापयति ।

चिरेत्यादि । चिरप्रसुप्त उद्बोधकासमवधानादियच्चिरं मे हृदि निलीय स्थितः ॥ ३ ॥

वसन्तकेत्यादि । नवयोगां नवो योग आकृतिस्थैर्यं यस्यास्तां तथाभूतां, पूर्वस्यावयवसंस्थानदार्ढ्यस्य वनवासदूषितत्वादुत्पादितनूतनावयवसंस्थानदार्ढ्यामित्यर्थः । 'योगोऽपूर्वार्थसम्प्राप्तौ सङ्गतिध्यानयुक्तिषु । वपुस्स्थैर्ये प्रयोगेऽपि' इति मेदिनी ॥

जमित्यादि ॥

जेदु इत्यादि । 'रब्भगोत्तो' इति क्वचित् पाठः ॥

तेनेत्यादि । पद्मावतीसहितस्यात्मनो वासवदत्ताबन्धुदर्शनमुचितमिति पद्मावत्याह्वानादेशः ॥

जमित्यादि ॥

राजा — किन्नुखलु शीघ्रमिदानीमयं वृत्तान्तो महासेनेन विदितः ।

(ततः प्रविशति पद्मावती प्रतीहारी च ।)

प्रतीहारी — (क) एदु एदु भट्टिदारिआ ।

पद्मावती — (ख) जेदु अय्यउत्तो ।

राजा — पद्मावति ! किं श्रुतं महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तः, तत्रभवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च, प्रतिहारमुपस्थिताविति ।

पद्मावती — (ग) अय्यउत्त ! पिअं मे ञादिकुळस्स कुसळवुत्तन्तं सोदुं ।

राजा — अनुरूपमेतद् भवत्याभिहितं — वासवदत्तास्वजनो मे स्वजन इति । पद्मावति ! आस्यताम् । किमिदानीं नास्यते ।

(क) एत्वेतु भर्तृदारिका ।

(ख) जयत्वार्यपुत्रः ।

(ग) आर्यपुत्र ! प्रियं मे ज्ञातिकुलस्य कुशलवृत्तान्तं श्रोतुम् ।

किन्नुखल्वित्यादि । अयं वृत्तान्तः नूतनदारपरिग्रहवार्त्ता ॥

तत इत्यादि ॥

एदु इत्यादि ॥

जेदु इत्यादि ॥

पद्मावतीत्यादि । किं श्रुतं प्रतीहारीमुखात् किं विदितम् । वेदनानन्तरं का ते प्रतिपत्तिरित्यभिप्रायः ॥

अय्यउत्त! पिअमित्यादि । मे ज्ञातिकुलस्य बन्धुवर्गस्य । कुशलवृत्तान्तं, श्रोतुं, प्रियम् इष्टं भावप्रधाननिर्देशाश्रयणादिच्छेत्यर्थः । अत एवेच्छार्थोपपदकत्वात् 'समानकर्तृकेषु—' (३-३-१५८) इति तुमुन् ॥

अनुरूपमित्यादि । अनुरूपं कुलशीलगुणमतिसदृशम् । शङ्कयासितुमनिच्छन्तीमिव पद्मावतीमभिलक्ष्याह—किमिदानीं नास्यते ॥

पद्मावती — (क) अय्यउत्त ! किं मए सह उवविट्ठो एदं जणं पेक्खिस्सदि ।

राजा —कोऽत्र दोषः ।

पद्मावती — (ख) अय्यउत्तस्स अवरो परिग्गहो त्ति उदासीणं विअ होदि ।

राजा — कलत्रदर्शनार्हं जनं कलत्रदर्शनात् परिहरतीति बहुदोषमुत्पादयति । तस्मादास्यताम् ।

पद्मावती — (ग) जं अय्यउत्तो आणवेदि । (उपविश्य) अय्यउत्त ! तादो वा अम्बा वा किंणुखु भणिस्सदि त्ति आविग्गा विअ संवुत्ता ।

(क) आर्यपुत्र ! किं मया सहोपविष्ट एतं जनं द्रक्ष्यति ।

(ख) आर्यपुत्रस्यापरः परिग्रह इत्युदासीनमिव भवति ।

(ग) यदार्यपुत्र आज्ञापयति । आर्यपुत्र ! तातो वाम्बा वा किन्नुखलु भणिष्यतीत्याविग्नेव संवृत्ता ।

अय्यउत्तेत्यादि । एतं जनं य आर्यया वासवदत्तया सहोपविष्टेन त्वया द्रष्टुमुचितस्तं जनमित्यर्थः ॥

क इति । अत्र त्वया सहोपविश्यदर्शने ॥

अय्यउत्तस्सेति । आर्यपुत्रस्य, अपरः परिग्रह इति अन्या पत्नी सिद्धेत्येतद्वस्तु । उदासीनमिव अनिष्टमिव अर्थाद् द्रष्टव्यस्य जनस्य । भवति । अतः सहोपविश्यदर्शनं न रोचय इत्यभिप्रायः । 'उदासीणं विअ' इत्यस्य स्थाने 'ण सिळाहणीअं' इति क्वचित् पाठः ॥

कलत्रेत्यादि । परिहरतीति । परिहरणरूपं वस्त्वित्यर्थः । बहुदोषं बहुं त्वच्छङ्कितदोषापेक्षया महान्तं दोषं बन्धुवामवृत्तिरयमिति मद्विषयां निन्दामित्यर्थः ॥

जमित्यादि । तातः प्रद्योतः । अम्बा अङ्गारवती । वासवदत्ताभक्त्या तद्बन्धुं स्वबन्धुं मत्वा तथा समुदाचारः । किन्नुखलु भणिष्यतीति किं प्रियमुताप्रियं कञ्चुकिधात्रीद्वारेण कथयिष्यतीति । आविग्ना शङ्किता । अहमिति शेषः ।

राजा — पद्मावति ! एवमेतत् ।

किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा ।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः ॥ ४ ॥

पद्मावती — (क) ण किं सक्कं रक्खिदुं पत्तकाळे ।

प्रतीहारी — (ख) एसो कञ्चुईओ धत्ती अ पडिहारं उवट्ठिदा ।

राजा — शीघ्रं प्रवेश्यताम् ।

(क) न किं शक्यं रक्षितुं प्राप्तकाले ।

(ख) एष काञ्चुकीयो धात्री च प्रतिहारमुपस्थितौ ।

पद्मावतीत्यादि ॥

किमिति । मे हृदयं । किं वक्ष्यति तातोऽम्बा वा किं कथयिष्यति, इति । परिशङ्कितं सञ्जातशङ्कं भवति, 'सापराधो हि शङ्कते' इति न्यायादिति भावः । अपराधमेवाह—मया, सा वासवदत्ता । कन्या सती अकृतपरिणयैव सती । अपहृतापि अपहरणस्यायुक्तत्वं पाक्षिकं चाभ्युपगमनम् अपिशब्देन द्योत्यते । न च रक्षिता नैव पालिता । अयुक्तमपि तस्या अपहरणं रक्षणपक्षे कथञ्चित् क्षम्येत, रक्षणस्य त्वकरणाद् अपहरणारक्षणरूपौ द्वावपराधौ मयि स्थिताविति भावः । चलैः अस्थिरैः विपर्ययावस्थैरित्यर्थः । भाग्यैः न तु बुद्धिदोषैः प्रवृत्तिदोषैर्वा । महदवाप्तगुणोपघातः महति प्रकृते गुरुजने विषये अवाप्तो गुणोपघातः साध्वाचारभङ्गो येन स तथाभूतः । अहं, पितुः, जनितरोषः उत्पादितकोपः । पुत्र इव, भीतोऽस्मि शङ्कितोऽस्मि । पुत्रोपमयात्मनो गुरुजनभक्तत्वं तस्य पितृस्थानीयस्यावश्यप्रसादनीयत्वं तद्रोषस्य स्नेहार्द्रनानोपालम्भप्रयोजकत्वेऽपि मर्षणावसानत्वं च ध्वनितम् । अत्र महदिति भयक्रियाविशेषणतया वा योज्यम् ॥ ४ ॥

ण किमित्यादि । रक्षितुं वासवदत्तामित्यात्थर्म् । प्राप्तकाले उचिते काले ॥

एसो इत्यादि ॥

शीघ्रमित्यादि । प्रवेश्यतां काञ्चुकीयः धात्री च । प्रवेश्यतामिति प्रत्येकमत्र कर्मसम्बन्धः ॥

प्रतीहारी — (क) जं भट्टा आणवेदि । (निष्क्रान्ता ।)

(ततः प्रविशति काञ्चुकीयो धात्री प्रतीहारी च ।)

काञ्चुकीयः — भोः !

सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः ।
किं नाम दैव ! भवता न कृतं यदि स्याद्
राज्यं परैरपहृतं कुशलं च देव्याः ॥ ५ ॥

प्रतीहारी — (ख) एसो भट्टा, उवसप्पदु अय्यो ।

काञ्चुकीयः — (उपेत्य) जयत्वार्यपुत्रः ।

(क) यद् भर्ताज्ञापयति ।

(ख) एष भर्ता, उपसर्पत्वार्यः ।

जमित्यादि ॥

तत इत्यादि ॥

भो इति । इदं श्लोकान्वयि ।

सम्बन्धीति । इदं, सम्बन्धिराज्यं सम्बन्धिनो बन्धोरुदयनस्य राज्यम् । एत्य, महान् प्रहर्षः भवति अर्थान्मम । नृपसुतानिधनं वासवदत्तामरणं । स्मृत्वा पुनः चिन्तयित्वा तु । महान् विषादो, भवति । भो दैव ! भागधेय ! । परैः शत्रुभिः । अपहृतं राज्यं, देव्याः वासवदत्तायाः । कुशलं क्षेमं च । स्याद्यदि सिध्येचेत्, सम्प्रति घटितया परापहृतराज्यसिद्ध्या सह देवीकुशलस्थितिरपि त्वत्प्रसादात् संयुक्ता चेदिति भावः । तर्हि भवता, किं नाम न कृतम् । सर्वमपि प्रद्योतोदयनयोरीहितं हितमाचरितं स्यादित्यर्थः । देवीकुशलविघटनाद् राज्यप्रत्यानयनेऽप्युभयोर्न सन्तोष इति भावः । इह अयनहर्षयोः स्मृतिविषादयोश्च समानकर्तृकत्वादुभयत्र क्त्वाप्रत्ययोपपत्तिः ॥ ५ ॥

एसो इत्यादि ॥

जयत्वित्यादि । आर्यपुत्र इति वासवदत्तासमुदाचारोपचारः ॥

धात्री —(क) जेदु भट्टा ।

राजा —(सबहुमानम्) आर्य !

पृथिव्यां राजवंश्यानामुदयास्तमयप्रभुः ।
अपि राजा स कुशली मया काङ्क्षितबान्धवः ॥ ६ ॥

काञ्चुकीयः — अथकिम् । कुशली महासेनः । इहापि सर्वगतं कुशलं पृच्छति ।

राजा —(आसनादुत्थाय) किमाज्ञापयति महासेनः ।

काञ्चुकीयः —सदृशमेतद् वैदेहीपुत्रस्य । नन्वासनस्थेनैव भवता श्रोतव्यो महासेनस्य सन्देशः ।

राजा —यदाज्ञापयति महासेनः । (उपविशति ।)

काञ्चुकीयः —दिष्ट्या परैरपहृतं राज्यं पुनः प्रत्यानीतमिति । कुतः,

---

(क) जयतु भर्ता ।

जेदु इत्यादि ॥

आर्येति ।

पृथिव्यामिति । उदयास्तमयप्रभुः उदयमस्तमयं च कर्त्तुं शक्तः । अनेन सम्राट्त्वमुक्तम् । मया कर्त्रा मया सह वा । काङ्क्षितबान्धवः काङ्क्षितं बान्धवं बन्धुत्वं यस्य येन वा स तथाभूतः ॥ ६ ॥

अथकिमित्यादि ॥

किमित्यादि ॥

सदृशमित्यादि । एतद् गुरुजनाज्ञाश्रवणे परमादरप्रदर्शनम् । वैदेही विदेहराजसुता उदयनस्य माता । नन्विति अनुनये सम्भ्रमे वा । ननुशब्दस्थाने 'न न न' इति क्वचित् पाठः ॥

यदित्यादि । कञ्चुकिवाक्ये महासेनाज्ञोपचारः पूजार्थः ॥

सन्देशप्रकारमाह — **दिष्ट्येति** । परैरपहृतं राज्यं पुनः प्रत्यानीतमित्येतद्, दिष्ट्या मङ्गलं सन्तोषनिमित्तं च । 'दिष्ट्या मङ्गलहर्षयोरि'ति मेदिनी । **कुत** इति वाभ्युदयाभिनन्दनकारणस्याकाङ्क्षा ।

कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते ।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते ॥ ७ ॥

राजा — आर्य ! सर्वमेतन्महासेनस्य प्रभावः । कुतः,

अहमवजितः पूर्वं तावत् सुतैः सह लालितो
दृढमपहृता कन्या भूयो मया न च रक्षिता ।
निधनमपि च श्रुत्वा तस्यास्तथैव मयि स्वता
ननु यदुचितान् वत्सान् प्राप्तुं नृपोऽत्र हि कारणम् ॥ ८ ॥

सामान्यन्यायमुखेन तद् वक्ति—**कातरा** इति । ये कातरा अधीराः सत्यामपि शक्तौ । अपिवा अथवा । ये अशक्ताः सत्यपि धैर्ये । तेषु उभयेष्वपि, आधारे सप्तमी । उत्साह उद्यमः । न जायते किन्तु धैर्यशक्त्युभययुक्तेष्वेव स जायत इत्यर्थः । सोत्साहैरेव पुरुषैः, नरेन्द्रश्रीः राजलक्ष्मीः । प्रायेण बाहुल्येन । भुज्यते अनुभूयते । हिः प्रसिद्धौ । तथाच प्रतिनवोऽयं राजलक्ष्मीलाभो लोकोत्तरं तवोत्साहगुणं शंसन् कथमिव मया नाभिनन्द्यतामिति भावः । अत्र धैर्यशक्त्युत्साहसुभगो भवान् राजलक्ष्मीभोगभाजनं भवतीति प्रकृते विशेषे वक्तव्ये तथाविधस्य सामान्यस्य कथनादप्रस्तुतप्रशंसालङ्कारः । अत्र अपिवेति निपातयोः सम्भूयार्थबोधकयोर्व्यवधानप्रयोगश्छन्दोनुरोधात् । यथा — 'किं क्रमिष्यति किलैष वामनो यावदित्थमहसन्न दानवाः' (स० १४. श्लो० ७५)इति माघकाव्ये किंकिलेति निपातयोः । तत्र हि किंकिलेतिसमुदायोऽनवक्लृप्त्यर्थो विवक्षितः ॥ ७ ॥

आर्येति । एतद् उक्तं सर्वं मम धीरत्वं शक्तत्वं सोत्साहत्वं राजलक्ष्मीभोक्तृत्वं चेत्यर्थः । महासेनस्य, प्रभावः प्रभावजन्यमित्यर्थः ॥

सर्वस्य महासेनप्रभावजन्यत्वं साधयति — **अहमिति** । पूर्वं तावद् गजमृगयावसरे । अवजितः अभिभूय गृहीतः अर्थान्महासेनेन शालङ्कायनमुखेन । अहं, सुतैः सह, दृढं नितान्तं । लालितः न हस्तप्राप्तः शत्रुरिति बुद्ध्या हतः प्रत्युत लालनैः स्वपुत्रनिर्विशेषवात्सल्यमसृणैरुपचारैः सम्भावितः । मया तथा लालितेनापीत्यर्थः । कन्या कन्यावस्था तस्य पुत्री । अपहृता, भूयः पश्चात् । न रक्षिता च । एवञ्च कन्यापहरणतदरक्षणरूपमपराधद्वयं तद्वात्सल्यविसदृशं मयाचरितमित्यर्थः । तस्याश्च स्वकन्यायाः । निधनं श्रुत्वापि मत्प्रमादप्रयुक्तं मरणमाकर्ण्यापि । मयि स्वता लक्षणया मद्विषयः स्वीयत्वस्नेहः, अर्थान्महासेनस्य । तथैव नि-

काञ्चुकीयः — एष महासेनस्य सन्देशः । देव्याः सन्देशमिहात्रभवती कथयिष्यति ।

राजा — हा अम्ब !

षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता ।
मम प्रवासदुःखार्ता माता कुशलिनी ननु ॥ ९ ॥

धात्री — (क) अरोआ भट्टिणी भट्टारं सव्वगदं कुसळं पुच्छदि ।

(क) अरोगा भट्टिनी भर्तारं सर्वगतं कुशलं पृच्छति ।

भनश्रवणात् प्राग् यादृशं तादृशमेव, मत्प्रद्वेषकारणे स्थितेऽपि मद्विषयं स्वीयत्ववात्सल्यमधुनाप्यपरिहीणमित्यर्थः । एतेन तदकोपादेव ममानुच्छिन्नत्वेनात्मसत्तेति ध्वनितम् । अत एवाह — उचितान् स्वत्वेन परिचितान् । वत्सान् तदाख्यं जनपदम् । प्राप्तुं प्रत्यानेतुम् । यत् त्वत्प्रतिपादितं धैर्यं शक्तिरुत्साह इत्येवंरूपं परमान्तरङ्गम् उपकरणजातमित्यर्थः । अस्तीति गम्यम्, अस्तिर्भवन्तीति न्यायात् । अत्र हि अस्मिन्नेव उपकरणजाते । नृपो महासेनः । कारणं ननु, कारणं न किमित्यर्थः । ममात्मसत्तायां नृपप्रसादनिमित्तायामात्मसत्तानिमित्तकस्य मामकधैर्यशक्त्यादेर्नृपप्रसादनिमित्तकत्वं किमु वक्तव्यमिति भावः । अत्र श्रवणस्य स्वतापदलक्ष्यस्य च स्नेहस्य समानकर्तृकतया क्त्वाप्रत्ययः । प्राप्तुमित्यस्त्यर्थयोगे तुमुन् 'शकधृषे' (३-४-६५) त्यादिना । 'यदुचितं वत्सान् प्राप्तुम्' इति वा पाठो लेखकप्रमादादन्यथाभूतः संभाव्यते; तदा हि उचितमिति पर्याप्त्यर्थकं यत्पदार्थविशेषणम् ॥ ८ ॥

एष इत्यादि । अत्रभवती वासवदत्ताधात्री ॥

हेति । अम्ब, हा कष्टम् । वासवदत्ताशोकाविष्करणं चेदम् ।

षोडशेति । षोडशान्तःपुरज्येष्ठा षोडशानामन्तःपुराणां महासेनस्य भोग्यस्त्रीणां ज्येष्ठा प्रधानमहिषी । पुण्या पावनचारित्रा । नगरदेवता नगरस्य देवता लोकपूज्यत्वाद् देवतेव । मम, प्रवासदुःखार्ता प्रवासदुःखेन दयिताविरहशोकेन आर्ता पीडिता, न केवलं स्वदुहितृप्रणाशेन दुःखिनी, किन्तु मद् दुःखेनापि दुःखिनीत्यर्थः, एतेन स्वविषयं वात्सल्यं ध्वनितम् । माता मन्निरतिशयभक्तिभूमिर्देवी अङ्गारवती । कुशलिनी ननु ॥ ९ ॥

अरोआ इत्यादि । सर्वगतं सर्वसम्बद्धं तव देहसम्बद्धं बन्धुसम्बद्धं प्रकृतिसम्बद्धं चेत्यर्थः ॥

राजा — सर्वगतं कुशलमिति । अम्ब ! ईदृशं कुशलम् ।

धात्री — (क) मा दाणिं भट्टा अदिमत्तं सन्तप्पिदुं ।

काञ्चुकीयः — धारयत्वार्यपुत्रः । उपरताप्यनुपरता महासेनपुत्री एवमनुकम्प्यमानार्यपुत्रेण । अथवा,

कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मो वनानां काले काले छिद्यते रुह्यते च॥ १०॥

(क) मेदानीं भर्तातिमात्रं सन्तप्तुम् ।

वासवदत्तायामकुशलिन्यां सर्वगतमित्युक्त्या दूयमान आह — **सर्वेति** । सर्वगतं कुशलमिति, त्वयोच्यत इति शेषः । तत्र किमुत्तरमहं प्रतिपद्ये इत्यर्थः । अम्ब ! कुशलम् ईदृशं वासवदत्ताकुशलवर्जितं मयानुभूयमानं तवापि प्रत्यक्षमित्यर्थः ॥

सर्वगतं कुशलमिति प्रश्नेनोद्दीपितसन्तापं नायकमाश्वासयति — **मा दाणि मित्यादि** । इह माङि तुमुन् न पाणिनीयः ॥

धारयत्वित्यादि । धारयतु शोकं नियच्छतु । एवमनुकम्प्यमाना अतिस्निग्धं स्मर्यमाणा । अथवेति नायकं प्रति स्वहृदयस्थाया वासवदत्तारक्षणप्रमादशङ्कायाः प्रतिक्षेपः ।

अप्रमादेऽपि रक्षा कर्तुं न शक्यत इति न त्वं वासवदत्तानिधनेनापराध्यसीत्याह — **क इति** । मृत्युकाले मृत्योर्जीवितादृष्टक्षयस्य काले । कः अवहितोऽपि । कम् अतिप्रियमपि । रक्षितुं शक्तः न कोऽपीत्यर्थः । तत्र दृष्टान्तमाह — रज्जुच्छेदे सति । घटं कूपप्रविष्टं । के धारयन्ति न केऽपीत्यर्थः । रज्जुबद्धं तु सर्वे धारयन्ति, अतोऽन्वयव्यतिरेकाभ्यां रज्जुबन्ध एव घटधारणे यथा कारणं, तथा जीवितादृष्टमेव प्राणिनां रक्षायां कारणमिति भावः । न चानेन दैवोपनतेन दयितानिधनेन तव शोको युक्त इत्यभिप्रायमाविष्कर्तुं नाशस्योत्पत्तिवत् प्राणिसामान्यसहजतामुपपादयति — एवम् उपदर्शितप्रकारः अदृष्टैकवश इत्यर्थः । वनानां तुल्यधर्मः समानधर्मा स च धर्मो वक्ष्यमाणः । लोकः जनः । काले काले समये समये । छिद्यते नश्यति । रुह्यते च रोहति च । उभयत्र कर्मवद्भावाद् यगात्मनेपदे । रोहतेश्च ण्यर्थान्तर्भावेण सकर्मकत्वं कर्मवद्भावप्रयोजकं बोद्धव्यम् । तुल्यधर्म इत्यत्रानिचोऽकरणं समासान्तानित्यत्वात् । तुल्यधर्मेत्येव वा पाठः ॥ १० ॥

राजा — आर्य ! मा मैवं,

महासेनस्य दुहिता शिष्या देवी च मे प्रिया ।
कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि ॥ ११ ॥

धात्री — (क) आह भट्टिणी — उवरदा वासवदत्ता । मम वा महासेणस्स वा जादिसा गोवाळअपाळआ, तादिसो एव्व तुमं पुढमं एव्व अभिप्पेदो जामादुअत्ति । एदण्णिमित्तं उज्जइणिं आणीदो । अणग्गिसक्खिअं वीणाववदेसेण दिण्णा । अत्तणो चवळदाए अणिव्वुत्तविवाहमङ्गळो एव्व गदो । अहअ अह्मेहिं तव अ वासवदत्ताए अ पडिकिदिं चित्तफळआए आळिहिअ विवाहो णिव्वुत्तो । एसा चित्तफळआ तव सआसं पेसिदा । एदं पेक्खिअ णिव्वुदो होहि ।

(क) आह भट्टिनी — उपरता वासवदत्ता । मम वा महासेनस्य वा यादृशौ गोपालकपालकौ, तादृश एव त्वं प्रथममेवाभिप्रेतो जामातेति । एतन्निमित्तमुज्जयिनीमानीतः । अनग्निसाक्षिकं वीणाव्यपदेशेन दत्ता । आत्मनश्चपलतयानिर्वृत्तविवाहमङ्गल एव गतः । अथचावाभ्यां तव च वासवदत्तायाश्च प्रतिकृतिं चित्रफलकायामालिख्य विवाहो निर्वृत्तः । एषा चित्रफलका तव सकाशं प्रेषिता । एतां दृष्ट्वा निर्वृतो भव ।

शोकाकर्तव्यत्वसूचनमसहमान आह — **आर्येत्यादि** ।

महासेनस्येति । महासेनस्य पूर्वोपपादितमद्वात्सल्यस्य तत्रभवत इत्यर्थः । दुहिता, मे शिष्या गान्धर्वविद्यान्तेवासिनी । देवी महिषी । प्रिया दयिता च । सा वासवदत्ता । मया, देहान्तरेष्वपि, अन्येषु जन्मस्वपि किमुतास्मिन् जन्मनि । स्मर्तुं, कथं न शक्या शक्यैव सर्वथेत्यर्थः । महासेनदुहितृत्वादिकम् एकैकमपि तस्यां ममौत्सुक्यमनश्वरं स्थापयितुं क्षमते, किमुत समुदितमिति भावः ॥ ११ ॥

आह भट्टिणीत्यादि । गोपालकपालकौ गोपालकश्च पालकश्चेति द्वौ महासेनस्य कुमारौ । प्रथममेव उज्जयिन्यां त्वदानयनात् प्रागेव । जामातेति, अभिप्रेतः मनसा संकल्पितः । एतन्निमित्तमेव जामातृत्वार्थमेव, विवाहार्थमेवेत्यर्थः । वीणाव्यपदेशेन वीणाशिक्षणमिति नाममात्रेण, वस्तुतस्त्वत्पत्नीत्वेनेत्यर्थः । चपलतया, वयमग्निसाक्षिकविवाहनिर्वर्तनार्थं सज्जा एव स्थिताः, त्वं तु ततः पूर्वमेव तदपहर-

राजा — अहो अतिस्निग्धमनुरूपं चाभिहितं तत्रभवत्या ।

वाक्यमेतत् प्रियतरं राज्यलाभशतादपि ।
अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः ॥ १२ ॥

पद्मावती — (क) अय्यउत्त ! चित्तगदं गुरुअणं पेक्खिअ अभिवादेदुं इच्छामि ।

धात्री — (ख) पेक्खदु पेक्खदु भट्टिदारिआ । (चित्रफलकां दर्शयति ।)

पद्मावती — (दृष्ट्वा आत्मगतम्) (ग) हं अदिसदिसी खु इअं अय्याए आवन्तिआए । (प्रकाशम्) अय्यउत्त ! सदिसी खु इअं अय्याए ।

(क) आर्यपुत्र ! चित्रगतं गुरुजनं दृष्ट्वाभिवादयितुमिच्छामि ।

(ख) पश्यतु पश्यतु भर्तृदारिका ।

(ग) हम् अतिसदृशी खल्वियमार्याया आवन्तिकायाः । आर्यपुत्र ! सदृशी खल्वियमार्यायाः ।

णचापलं कृतवानसीत्यभिप्रायः । एषा चित्रफलका यस्यामालिखितयोर्युष्मत्प्रतिकृत्योर्विवाहमङ्गलमस्माभिर्निर्वर्तितं सा आलेख्यफलका । अस्मात् प्रयोगात् फलकाशब्दः स्त्रियामपि । निर्वृतः शान्तवासवदत्तौत्सुक्यः ॥

अहो इत्यादि । अनुरूपं स्वमहिमसदृशम् ।

वाक्यमित्यादि । अस्मासु स्नेहः अस्मद्विषयं वात्सल्यम् । न विस्मृतः अर्थात् तातेनाम्बया च ॥ १२ ॥

अय्यउत्तेत्यादि । गुरुजनं ज्यैष्ठ्यात् पूज्यं जनं वासवदत्तामित्यर्थः । अभिवादयितुं वन्दितुम् ॥

पद्मावत्या वासवदत्ताप्रतिकृतिदर्शनोत्कण्ठां श्रुत्वाह — **पेक्खदु** इत्यादि ॥

हमित्यादि । इयं वासवदत्ताप्रतिकृतिः । हमिति शङ्काध्वनिः, तत् किमावन्तिका वासवदत्तैव स्यादिति च शङ्का । तस्यां च निर्णयः प्रतिकृतौ वासवदत्तासादृश्यस्य पूर्णत्वापूर्णत्वान्यतरनिश्चयात् प्रतिपत्तव्यः । अतस्तदर्थं वासवदत्तारूपसर्वस्ववेदितारं राजानं पृच्छति — आर्यपुत्र! इयं प्रतिकृतिः । आर्यायाः वासवदत्तायाः । सदृशी खलु न तु शिल्पिकामचाराकौशलप्रमादैरन्यथाभूतरूपेति प्रश्नकाकुः ॥

राजा — न सदृशी । सैवेति मन्ये । भोः ! कष्टम्,

अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम् ।
इदं च मुखमाधुर्यं कथं दूषितमग्निना ॥ १३ ॥

पद्मावती — (क) अय्यउत्तस्स पडिकिदिं पेक्खिअ जाणामि इअं अय्याए सदिसी ण वेत्ति ।

धात्री — (ख) पेक्खदु पेक्खदु भट्टिदारिआ ।

पद्मावती — (दृष्ट्वा) (ग) अय्यउत्तस्स पडिकिदीए सदिसदाए जाणामि इअं अय्याए सदिसि त्ति ।

राजा — देवि ! चित्रदर्शनात् प्रभृति प्रहृष्टोद्विग्नामिव त्वां पश्यामि । किमिदम् ।

(क) आर्यपुत्रस्य प्रतिकृतिं दृष्ट्वा जानामीयमार्यया सदृशी न वेति ।
(ख) पश्यतु पश्यतु भर्तृदारिका ।
(ग) आर्यपुत्रस्य प्रतिकृत्याः सदृशतया जानामीयमार्यया सदृशीति ।

प्रतिकृतौ तद्रूपसुष्ठुनिष्पत्त्या तद्भेदगन्धमप्यसहमान आह — **नेति** । न सदृशी सादृश्यस्य भेदाभेदरूपत्वात् सदृशीत्युक्तौ अभेदेन सह भेदोऽपि प्रतीयेत, अतः न सदृशी वासवदत्तायाः । किं तर्हि, सैव तदभिन्नैव । इति मन्ये । चित्रगततद्रूपदर्शनोद्बुद्धाच्छोकादाह — **भोः कष्टमिति** ।

अस्येत्यादि । दारुणा ज्वलनज्वालापरिलेहननिमित्तत्वात् क्रूरा । दूषितमित्यस्य स्थाने जूषितमिति क्वचित् पाठः । जूषधातुश्च हिंसार्थो भौवादिकः ॥ १३ ॥

वासवदत्ताप्रतिच्छन्दे शिल्पिप्रमादाद्यभावं नायकेनोक्तमपि स्वप्रत्ययदार्ढ्याय तद्भ्रातरि नायकप्रतिच्छन्दे परीक्षितुमिच्छन्त्याह — **अय्यउत्तस्से**त्यादि । जानामि अनुमिनोमि ॥

पेक्खदु इत्यादि । इत्युक्त्वा नायकप्रतिकृतिं दर्शयतीति गम्यं, दृष्ट्वेत्यग्रे वचनात् ॥

अय्यउत्तस्सेत्यादि । प्रतिकृत्याम् आर्यपुत्रस्य सदृशतया मया प्रत्यक्षितयेत्यर्थः । जानामि निश्चिनोमि ॥

देवीति । प्रहृष्टोद्विग्नामिव प्रहृष्टां चोद्विग्नां चेव । देवी वासवदत्ता स्वपरम-

पद्मावती — (क) अय्यउत्त ! इमाए पडिकिदीए सदिसी इह एव्व पडिवसदि ।

राजा — किं वासवदत्तायाः ।

पद्मावती — आम ।

राजा — तेन हि शीघ्रमानीयताम् ।

पद्मावती — (ख) अय्यउत्त ! मम कण्णाभावे केणवि बह्मणेण मम भइणिअत्ति ण्णासो णिक्खित्तो । पोसिदभत्तुआ परपुरुसदंसणं परिहरदि । ता अय्यं मए सह आअदं पेक्खिअ जाणादु अय्यउत्तो ।

राजा —

यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति ।
परस्परगता लोके दृश्यते रूपतुल्यता ॥ १४ ॥

(क) आर्यपुत्र ! अस्याः प्रतिकृत्याः सदृशीहैव प्रतिवसति ।

(ख) आर्यपुत्र ! मम कन्याभावे केनापि ब्राह्मणेन मम भगिनिकेति न्यासो निक्षिप्तः । प्रोषितभर्तृका परपुरुषदर्शनं परिहरति । तदार्यां मया सहागतां दृष्ट्वा जानात्वार्यपुत्रः ।

स्नेहास्पदावन्तिकारूपेण स्वान्तिक एव जीवतीति प्रहर्षः, तामस्मिन् बन्धुसमवाये शीघ्रतरमुपहृत्य तच्छोकोऽपनोदनीय इत्याशयोद्वेगः । पश्यामि आकारेङ्गिताभ्यामनुमिनोमि । किमिदं हर्षोद्वेगयोः किं कारणमित्यर्थः ॥

अय्यउत्तेत्यादि । इहैव मदन्तिक एव ॥

किमिति । वासवदत्तायाः, किं, सदृशी प्रतिवसतीत्यनुवर्तते ॥

आमेति, अभ्युपगमे ॥

तेन हीत्यादि । आनीयताम्, अर्थाद् वासवदत्तासदृशी ॥

अय्यउत्तेत्यादि । भगिनिकेति, उक्त्वेति शेषः । न्यासो निक्षिप्तः, सा न्यासत्वेन मयि न्यस्तेत्यर्थः ॥

यदीत्यादि । अन्या भविष्यति, न तु वासवदत्ता । व्यक्तं निश्चितम् । तत् कुतो मे वासवदत्ताप्रत्याशेत्यर्थः । रूपतुल्यता रूपसादृश्यम् ॥ १४ ॥

(प्रविश्य)

प्रतीहारी — (क) जेदु भट्टा । एसो उज्जइणीओ बह्मणो, भट्टिणीए हत्थे मम भइणिअ त्ति ण्णासो णिक्खित्तो, तं पडिग्गहिदुं पडिहारं उवट्ठिदो ।

राजा — पद्मावति ! किन्नु स ब्राह्मणः ।

पद्मावती — (ख) होदव्वं ।

राजा — शीघ्रं प्रवेश्यतामभ्यन्तरसमुदाचारेण स ब्राह्मणः ।

प्रतीहारी — (ग) जं भट्टा आणवेदि । (निष्क्रान्ता ।)

राजा — पद्मावति ! त्वमपि तामानय ।

पद्मावती — (घ) जं अय्यउत्तो आणवेदि । (निष्क्रान्ता ।)

(ततः प्रविशति यौगन्धरायणः प्रतीहारी च ।)

यौगन्धरायणः — भोः ! (आत्मगतम्)

(क) जयतु भर्ता । एष उज्जयिनीयो ब्राह्मणः, भट्टिन्या हस्ते मम भगिनिकेति न्यासो निक्षिप्तः, तं प्रतिग्रहीतुं प्रतिहारमुपस्थितः ।

(ख) भवितव्यम् ।

(ग) यद् भर्ताज्ञापयति ।

(घ) यद् आर्यपुत्र आज्ञापयति ।

वासवदत्तासमागमे प्राप्तावसरे यौगन्धरायणागमनमौचित्यात् संघटयितुमाह — **प्रविश्य प्रतीहारी**त्यादि । तं न्यासम् । एतद्बलात् पूर्ववाक्ये य इत्याक्षिप्यते ॥

पद्मावतीत्यादि । सः न्यासनिक्षेप्ता ॥

होदव्वमिति । सम्भाव्यत इत्यर्थः ॥

शीघ्रमित्यादि । अभ्यन्तरसमुदाचारेण अभ्यन्तरे अन्तर्गृहे कर्तव्येन समुदाचारेण पाद्यादिदानोपचारेण ॥

जमित्यादि ॥

पद्मावतीत्यादि । तां न्यासभूतां स्त्रियम् ॥

जमित्यादि ॥

तत इत्यादि ॥

भो इति, विषादद्योतनम् । तत्र च वक्ष्यमाणा शङ्का हेतुः ।

प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं
कामं मया कृतमिदं हितमित्यवेक्ष्य ।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं वक्ष्यतीति हृदयं परिशङ्कितं मे ॥ १५ ॥

प्रतीहारी — (क) एसो भट्टा । उपसप्पदु अय्यो ।

यौगन्धरायणः — (उपसृत्य) जयतु भवान् जयतु ।

राजा — श्रुतपूर्व इव स्वरः । भो ब्राह्मण ! किं भवतः स्वसा पद्मावत्या हस्ते न्यास इति निक्षिप्ता ।

यौगन्धरायणः — अथकिम् ।

(क) एष भर्ता । उपसर्पत्वार्यः ।

प्रच्छाद्येति । मया, नृपतेः राज्ञः । हितार्थं हितं पद्मावतीपरिणयाभिमुख्यं तदर्थं । राजमहिषीं राज्ञो महिषीं कृताभिषेकां देवीं वासवदत्तां । प्रच्छाद्य लावाणकदाहमिथ्याप्रवादप्रवर्तनया तस्याः सत्तामपलप्येत्यर्थः । प्रच्छादनस्य हितार्थत्वं च तदभावे वासवदत्तायाः सत्तायां राज्ञः पद्मावतीपरिणयाभिमुख्यस्य कथमप्यसाध्यत्वाद् बोद्धव्यम् । इदं स्वामिपद्मावतीपरिणयघटनात्मकं कर्म । हितमिति नष्टराज्यप्रत्यानयनसाधकमिति । अवेक्ष्य सिद्धादेशप्रत्ययेन पद्मावतीभ्रातृमाहाय्यावश्यम्भावसम्भावनया च निश्चित्येत्यर्थः । कामं कृतं स्वामिभक्त्येकवशंवदतया स्वच्छन्दमनुष्ठितमित्यर्थः । मम कर्मणि पूर्वोक्ते । सिद्धेऽपि हस्तप्राप्तफले सत्यपि । नाम प्राकाश्ये, सिद्धत्वं सर्वलोकविदितमित्यर्थः । मे हृदयम् । असौ पार्थिवः पृथिवीश्वरः । किं वक्ष्यतीति मत्कर्म श्लाघिष्यते वा निन्दिष्यति वेति । परिशङ्कितं सन्त्रस्तं भवति । अयमेव श्लोकार्थः श्रीहर्षेण यौगन्धरायणवाक्ये रत्नावल्यां किञ्चिद् भेदेन भणितः । यथा — "प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ दैवे चेत्थं दत्तहस्तावलम्बे । सिद्धे भ्रान्तिर्नास्ति सत्यं तथापि स्वेच्छाकारी भीत एवास्मि भर्तुः ॥" इति ॥ १५ ॥

एसो इत्यादि । 'एदु एदु अय्यो' इति क्वचित् पाठः ॥

जयत्वित्यादि । आदरेण द्विरुक्तिः ॥

श्रुतेत्यादि । अतिपरिचितत्वात् स्वरस्य श्रुतपूर्वत्वप्रत्यभिज्ञानेऽपि वेषभेददर्शनजनिताद् व्यामोहात् तत्सम्बन्धिविशेषास्फुरणम् ॥

अथकिमिति ॥

राजा —तेन हि त्वर्यतां त्वर्यतामस्य भगिनिका ।

प्रतीहारी — (क) जं भट्टा आणवेदि । (निष्क्रान्ता ।)

(ततः प्रविशति पद्मावती आवन्तिका प्रतीहारी च ।)

पद्मावती — (ख) एदु एदु अय्या । पिअं दे णिवेदेमि ।

आवन्तिका — किं किं ।

पद्मावती — (ग) भादा दे आअदो ।

आवन्तिका — (घ) दिट्ठिआ इदाणिं पि सुमरदि ।

पद्मावती — (उपसृत्य) (ङ) जेदु अय्यउत्तो । एसो णासो ।

राजा — निर्यातय पद्मावति ! । साक्षिमन्न्यासो निर्यातयितव्यः । इहात्रभवान् रैभ्यः अत्रभवती चाधिकरणं भविष्यतः ।

(क) यद् भर्ताज्ञापयति ।

(ख) एत्वेत्वार्या । प्रियं ते निवेदयामि ।

(ग) भ्राता ते आगतः ।

(घ) दिष्ट्येदानीमपि स्मरति ।

(ङ) जयत्वार्यपुत्रः । एष न्यासः ।

तेन हीत्यादि । त्वर्यतां त्वरितमानीयतामित्यर्थः । न्यासनिर्यातनसम्भ्रमाद द्विरुक्तिः ॥

जमित्यादि ॥

तत इत्यादि ॥

एदु इत्यादि । प्रियं वक्ष्यमाणम् ॥

किं किमिति । प्रियश्रवणौत्सुक्याद् द्विरुक्तिः ॥

भादेत्यादि । भ्राता यस्यागमनमनुदिनं त्वमाशंससे, स इत्यर्थः ॥

दिट्ठिआ इत्यादि । दिष्ट्येति हर्षे । इदानीमपि स्मरति पूर्वमिव न विस्मरतीत्यर्थः ॥

जेदु इत्यादि । एषः सन्निहितः ॥

निर्यातयेत्यादि । निर्यातय प्रत्यर्पय, अर्थान्न्यासम् । साक्षिमत् साक्षियुक्तं यथा भवति तथा । निर्यातयितव्य इत्यनेनेदमन्वयि । अधिकरणं निर्णायकपरिषत् ॥

पद्मावती — (क) अय्य ! णीअदां दाणिं अय्या ।

धात्री — (आवन्तिकां निर्वर्ण्य) (ख) अम्मो भट्टिदारिआ वासवदत्ता।

राजा — कथं महासेनपुत्री । देवि ! प्रविश त्वमभ्यन्तरं पद्मावत्या सह ।

यौगन्धरायणः — नखलु नखलु प्रवेष्टव्यम् । मम भगिनी खल्वेषा ।

राजा — किं भवानाह । महासेनपुत्री खल्वेषा ।

यौगन्धरायणः — भो राजन् !

भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः ।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः ॥ १६ ॥

राजा — भवतु, पश्यामस्तावद् रूपसादृश्यम् । संक्षिप्यतां यवनिका।

(क) आर्य ! नीयतामिदानीमार्या ।

(ख) अम्मो भर्तृदारिका वासवदत्ता ।

अय्येत्यादि । आर्या न्यासभूता आवन्तिका ॥

आवन्तिकामित्यादि । निर्वर्ण्य सूक्ष्मेक्षिकया विलोक्य । **अम्मो** इत्यादि । अम्मो इत्याश्चर्ये । दग्धाभिमतायाः पुनर्दर्शनादाश्चर्यम् ॥

कथमित्यादि । अभ्यन्तरम् अन्तर्गृहम् ॥

नखल्वित्यादि । स्वेन वासवदत्तया च तत्त्वत आत्मनि निवेदिते तद्वशाच्च सम्यङ्निर्णये जाते पश्चाद् वासवदत्ता स्वीकर्तव्येत्यभिप्रायेणेदानीं प्रवेशप्रतिषेधः ॥

किमित्यादि । किम् अयुक्तमित्यर्थः ॥

भो राजन्निति, श्लोकान्वयि ।

भारतानामित्यादि । त्वं, भारतानां भरतवंश्यानां पाण्डवानां । कुले जातः, अर्जुनसूनोरभिमन्योः पञ्चविंशः पुरुष उदयन इति विष्णुपुराणम् । विनीतः शिक्षितः शास्त्रेषु । ज्ञानवान् मतिमान् । शुचिः शुद्धशीलः । भवसीति शेषः । तत् तस्मात् । राजधर्मस्य देशिकः प्रवर्त्तनाचार्यः सन् । बलात् प्रसभं । हर्तुम्, अर्थात् तां । नार्हसि । तां नार्हसीत्येव वा पाठः ॥ १६ ॥

भवत्वित्यादि । पश्यामः परीक्षामहे इत्यर्थः । यवनिका संक्षिप्यतां तां

यौगन्धरायणः — जयतु स्वामी ।

वासवदत्ता — (क) जेदु अय्यउत्तो ।

राजा — अये असौ यौगन्धरायणः, इयं महासेनपुत्री ।

किन्नु सत्यमिदं स्वप्नः सा भूयो दृश्यते मया ।
अनयाप्येवमेवाहं दृष्टया वञ्चितस्तदा ॥ १७ ॥

यौगन्धरायणः — स्वामिन् ! देव्यपनयेन कृतापराधः खल्वहम् । तत् क्षन्तुमर्हति स्वामी । (इति पादयोः पतति ।)

(क) जयत्वार्यपुत्रः ।

स्त्रियमन्तरयितुं या विस्तारिता, सा तिरस्करणी तत्तिरोधानपरिहारायेदानीं सङ्कोच्यतामित्यर्थः ॥

स्ववासवदत्तयोरात्मप्रकाशने भूयोविलम्बमसहमानोऽमात्यभावोचितेन समुदाचारेणात्मानं प्रकाशयति — **जयतु स्वामीति** ॥

स्वरूपं प्रकाशितवता यौगन्धरायणेनाभ्यनुज्ञातं स्वात्मप्रकाशनं देवीभावोचितेन समुदाचारेण वासवदत्ता वितनोति — **जेदु अय्यउत्तो** इति ॥

विवृतस्वरूपावुभौ प्रत्यभिजानन्नाह — **अये** इत्यादि । अये इति **स्मरणे** सम्भ्रमे वा । स चातर्कितप्रियजनदर्शनप्रभवः ॥

किन्न्विति । इदम् अनुभूयमानम्, अर्थादुत्तरवाक्यप्रतिपाद्यं दर्शनम् । सत्यं किन्नु किं यथार्थम्, अर्थक्रियाकारीति यावत् । स्वप्नः किन्नु उत स्वाप्निकवद् अयथार्थम् अर्थक्रियाकरणासमर्थम् । किं तदनुभूयमानमित्यत्राह — मया, सा या पूर्वं सकृद् दृष्टा वासवदत्ता । भूयः पुनरपि । दृश्यते इदानीं साक्षात्क्रियते । एवं साक्षाद्दर्शनविषयीभूय पुरस्तिष्ठन्त्यामस्यामपि कुतो दर्शनासत्यत्वशङ्केत्यत्राह — अहं तदा अतीते कस्मिंश्चित् काले । एवमेव अनेन साम्प्रतिकेन प्रकारेणैव — जागरावस्थायामीदृशवपुर्वेषविशिष्टत्वेनैव, न तु साम्प्रतिकप्रकारादतिरिक्तेन प्रकारेण । दृष्टया, अनयापि पुरःस्थितयापि अपिशब्देन वक्ष्यमाणवञ्चनानर्हत्वं द्योत्यते । दृष्टयापीति वान्वयः । वञ्चितः विप्रलब्धः मद्धस्तमप्राप्यैव झटिति तिरोभावेन भग्नाशः कृत इत्यर्थः । ततश्च यथा लब्धमपि पूर्वं तद्दर्शनं फलाभावात् स्वाप्निकप्रायं संवृत्तं, तथेदानीन्तनमपि किं न भवेदित्यभिप्रायः ॥ १७ ॥

यदेतद् देवीकृतं वञ्चनमुक्तं, तद् आत्मकारिततदीयाज्ञातवाससंविस्तालना-

राजा — (उत्थाप्य) यौगन्धरायणो भवान् ननु।

मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः।
भवद्यत्नैः खलु वयं मज्जमानाः समुद्धृताः ॥ १८ ॥

यौगन्धरायणः — स्वामिभाग्यानामनुगन्तारो वयम्।

नुरोधकृतमिति ध्वनयन् देव्यपनयं स्वेन स्वाम्यभ्युदयार्थे कृतमपि देव्यज्ञातवासक्लेश-स्वामिशोकोभयप्रयोजकत्वादपराधपक्षे निक्षिप्य स्वामिप्रसादं प्रार्थयते—**स्वामिन्नि**-त्यादि। देव्यपनयेन देव्या अपनयेन प्रच्छाद्यनयनेन। अहम् अहमेव न तु देवी ॥

यौगन्धरायणं प्रत्यतिप्ररूढात् स्वामिहितैकतानत्वविस्रम्भात् तत्कृते देव्यपन-येऽप्यात्महितैकफलत्वमवधारितवतो नायकस्य यौगन्धरायणे भक्ते चिरदृष्टे सिद्धार्थे पादपतिते परमस्नेहादरसुभगं व्यवहारमाह — **उत्थाप्येति**। यौगन्धरायणविषयान् विस्रम्भस्नेहबहुमानान् प्रकाशयन्नाह — **यौगन्धरायण** इत्यादि। यौगन्धरायण इत्य-नेन वाच्यार्थगतो गुणविशेषो लक्ष्यते, केवलस्य वाच्यस्य निर्ज्ञातत्वेन स्वतोऽनुप-योगात्। तेनायमर्थः — भवान् यौगन्धरायणो ननु स्वामिहितैकप्रयोजनमनोवाक्का-यवृत्तिर्न किं, तदेतद् भवत्स्वभावतत्त्वं सम्यग् विदितवतो मे देव्यपनयेऽप्यस्मिन् भवत्कृते मद्धितार्थत्वबुद्धिरेव, न त्वपराधत्वबुद्धिरिति भावः। अत्र लक्षणामूलोऽर्था-न्तरसंक्रमितवाच्यध्वनिः स्वामिभक्त्यतिशयश्च व्यङ्ग्यः। क्वचिद् यौगन्धरायण इ-त्यतः प्राग् वयस्येति पठ्यते ॥

यौगन्धरायणस्य स्वामिहितैकव्यसनितां निदर्शयति —**मिथ्योन्मादै**रित्यादि। **शास्त्रदृष्टैः** बार्हस्पत्याद्यर्थशास्त्रावगतैः। मज्जमाना अवरोधनविपदि मज्जनशीलाः न्य-ग्भवनशीलाः, ताच्छील्ये चानश्। समुद्धृताः उत्तारिताः सम्यगूर्ध्वं नीताः। यौग-न्धरायणो ह्युज्जयिन्यामुन्मत्त इव चरन् कपटश्रमणेन रुमण्वता विदूषकवेषेण च वस-न्तकेन सहकृतः परपक्ष्यवशीकरणेन युद्धप्रवर्त्तनेन च परान् व्याकुलीकृत्य राजानम-वरोधनान्मोचितवानितीयं कथा प्रतिज्ञानाटिकायां स्पष्टा ॥ १८ ॥

स्वपुरुषकारसिद्धिश्लाघाश्रवणेन लज्जित इवाह — **स्वामीति**। वयं मद्विधाः स्वामिकर्मकराः। स्वामिभाग्यानाम् अनुगन्तारः पृष्ठचारिणः, अनुगन्तृत्वोक्त्या स्वामिभाग्यानामग्रगामित्वमाक्षिप्तं, तच्च प्राधान्यरूपं, कार्यसिद्धिषु स्वामिभाग्यान्येव प्रधानानि कारणानि, वयं तु तेषु प्रभाविष्णुषु तदुत्पादितबुद्धिदृष्टयैव दिशा यतमा-नास्तदुपकरणान्येव केवलमिति नास्माकं श्लाघार्हतेति भावः। भाग्यानामित्यस्य स्थाने भाग्यानीति क्वचित् पाठः। तत्र कर्मत्वरूपसम्बन्धविशेषविवक्षया द्वितीया ॥

पद्मावती — (क) अम्महे अय्या खु इअं । अय्ये ! सहीजणसमुदाआरेण अजाणन्तीए अदिक्कन्दो समुदाआरो । ता सीसेण पसादेमि ।

वासवदत्ता — (पद्मावतीमुत्थाप्य) (ख) उट्ठेहि उट्ठेहि अविहवे ! उट्ठेहि । अत्थिसअं णाम सरीरं अवरज्झइ ।

पद्मावती — (ग) अणुग्गहिदह्मि ।

राजा — वयस्य ! यौगन्धरायण ! देव्यपनये का कृता ते बुद्धिः ।

(क) अहो आर्या खल्वियम् । आर्ये ! सखीजनसमुदाचारेणाजानन्त्यातिक्रान्तः समुदाचारः, तच्छीर्षेण प्रसादयामि ।

(ख) उत्तिष्ठोत्तिष्ठाविधवे ! उत्तिष्ठ । अर्थिस्वं नाम शरीरमपराध्यति ।

(ग) अनुगृहीतास्मि ।

अम्महे इत्यादि । आर्या ज्येष्ठा भर्तुः पत्नीत्यतो वन्दनीया । अजानन्त्या अर्थान्मया । अजाणन्तीए इति बहुत्र न पठ्यते । अतिक्रान्तः लङ्घितः । समुदाचारः यो गुरुजनं प्रति कर्त्तव्यः, सः । तत् समुदाचारातिक्रमापराधाद्धेतोः । प्रसादयामीत्येतदुत्तरं पादयोः पततीति गम्यम् । 'पद्मावतीमुत्थाप्ये'त्यग्रे वचनात् ॥

पद्मावतीमित्यादि । उत्थाप्य तदुत्थापनानुकूलं यत्नं कृत्वा । पद्मावतीमुत्थाप्येति क्वचिन्न पठ्यते ॥

उट्ठेहीत्यादि । अविधवे! भर्तृमति! अभिसम्बोधने भर्तृयोगपुरस्करणं, मदुपकारिण्यास्ते मत्सपत्नीभावप्रयोजकोऽप्ययं भर्तृयोगो मम परमेष्ट इति ध्वननार्थम् । उत्तिष्ठेति सकृदुक्त्या प्रसादनसंरम्भस्य त्यागादर्शनात् त्रिरुक्तिः । अर्थिस्वम् अर्थिन आत्मरक्षार्थिजनस्य मम स्वम् आत्मीयम्, आत्मीयवद् यथेच्छामिदमात्मशुश्रूषादौ विनियुज्यतामिति त्वया मह्यमर्पितं मया च तथा विनियुक्तमित्यर्थः । शरीरं देहः अर्थाद् भवत्याः, शरीरिलक्षणया वा भवती । अपराध्यति मयि सापराधं भवति । नामेत्यभ्युपगमे, त्वदुपन्यस्तं सापराधत्वमभ्युपगम्यत इति सोल्लुण्ठोक्तिः । वस्तुतः परमोपकारिणि अपराधस्य बाधाद् विरोधिलक्षणया नापराध्यतीत्यभिप्रायः । 'अवरज्झइ' इति क्वचित् पाठः ॥

वासवदत्ताप्रतिपत्तिसन्तोषादाह — अण्वित्यादि ॥

यौगन्धरायणस्वामिभक्तिविस्रम्भाद् देवीगुणाविश्वासात् फलोपलम्भाच्च देव्यपनये संप्रतिपत्तिः प्रागेव राज्ञा प्रकाशिता यौगन्धरायणमभिनन्दता । तदेव फलमिदानीं

यौगन्धरायणः — कौशाम्बीमात्रं परिपालयामीति ।

राजा — अथ पद्मावत्या हस्ते किं न्यासकारणम् ।

विशेषाकारेण ज्ञातुं पृच्छयते — **वयस्येत्यादि** । वयस्य ! सखे ! परमविश्वस्त ! एतेन यन्मया वक्ष्यते स वस्तुतत्त्वज्ञानार्थः कश्चिदनुयोगः, न त्वविश्वस्तयोग्यस्त्वां प्रति पर्यनुयोग इति सूचितम् । ते इति त्वयेत्यर्थकमव्ययम् । बुद्धिः अभिसन्धिः, अर्थात् फलविषयः । वयस्येति क्वचिन्न पठ्यते ॥

कौशाम्बीति । कौशाम्बी वत्सराजधानी, तया तदधिष्ठानं वत्सराज्यं लक्ष्यते, मात्रशब्दः कार्त्स्न्यार्थः । कौशाम्बीमात्रं कृत्स्नं वत्सराज्यं । परिपालयामि प्रशासिष्यामि, वर्तमानसामीप्यविवक्षणात् पालकत्वस्येव तदविलम्बसिद्धेरपि फलत्वं द्योतितम् । इति एवं, बुद्धिः कृतेति पूर्वतोऽनुकृष्यते । अयमाशयः — देव्यपनये हि कृते स्वामी दुःखितोऽपि सन् विधुरत्वपरिहाराय रुमण्वदादिप्रार्थननिर्बन्धेन च कथञ्चिदन्यां राजकन्यां दारान् कुर्वीत; ततः सुलभं स्वदारबन्धुनृपतिसाहाय्यं कालापेक्षितमुपकरणीकृत्य शत्रुहस्ताद् वत्सराज्ये शीघ्रं स्वामिना प्रत्यानीते भृत्यस्य मम कृत्स्नवत्सपरिपालकत्वं यथापुरं सेत्स्यतीत्येष ममाभिसन्धिरिति । अन्या व्याख्या — मात्रशब्दोऽवधारणे । कौशाम्बीमात्रं परिपालयामि वत्सराज्यैकदेशभूतां कौशाम्बीं केवलं परिपालयामि न तु वत्सराज्यमखिलम् । इति अतः कारणाद् । देव्यपनये बुद्धिः कृता अध्यवसायः कृतः । कृत्स्नवत्सराज्यपालकत्वसाधको हि देव्यपनयः प्रागुक्तरीत्येत्यभिप्रायः । ननु च स्वामिराज्यप्रत्यानयनं साध्यम्; तच्च देवीबन्धोर्महासेनस्यैव साहाय्येन साधयितुं शक्यम् । किमिति सुलभं तत् साधनमुपेक्ष्य पद्मावतीपरिणयद्वारलभ्यं तद्भ्रातृसाहाय्यमपेक्षितं, देव्यपनयश्च देवीस्वाम्युभयदुःखहेतुस्तदर्थमारब्धः । उच्यते — महासेने कन्यापहरणव्यलीकजनितवैमनस्येऽद्याप्यपरिसान्त्विते विपदि साहाय्यस्य प्रार्थना व्रीडावहेति नूनं तदुपेक्षितम् ॥

यौगन्धरायणाभिसंहितस्य फलस्य सम्प्रत्यनुभवसंवादाद् देव्यपनयं प्रति परितोषे हृदि स्थिते ततोऽपि परितोषकरं विश्वसनीयतमे रक्षास्थाने पद्मावतीरूपे देवीन्यासमनुसन्धाय तत्रापि यौगन्धरायणस्य बुद्धिं ज्ञातुं पृच्छति — **अथेत्यादि** । अथशब्दः प्रश्नान्तरारम्भे । पद्मावत्या हस्ते, न्यासकारणं न्यासस्य देवीनिक्षेपस्य कारणं किम् । नखलु पद्मावती कन्यावस्थायां देव्या बन्धुः, न वा मम बन्धुः यस्मिन् सा निश्शङ्कं न्यस्येत; न वा सा तापसजनः; न च बहुवरप्रार्थितायां कन्यायां भाविमद्बन्धुत्वनिश्चयस्त्वयाधिगन्तुं शक्यः, तस्मादबन्धौ देवीन्यासस्य सम्प्रति यदृच्छादृष्ट-

यौगन्धरायणः — पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति ।

राजा — इदमपि रुमण्वता ज्ञातम् ।

यौगन्धरायणः — स्वामिन् ! सर्वैरेव ज्ञातम् ।

राजा — अहो शठः खलु रुमण्वान् ।

शुभावसानस्याप्युपपन्नं कारणं त्वया वक्तव्यमिति प्रश्नार्थः । अथेत्यस्य स्थाने तेन हीति क्वचित् पाठः ॥

पुष्पकेत्यादि । पुष्पकभद्रादिभिः, आदेशिकैः दैवज्ञानसिद्धैः । आदिष्टा भविष्यदर्थज्ञापनमादेशः, तद्विषयीकृता । अर्थात् पद्मावती पूर्ववाक्योपात्ता । केन प्रकारेण ज्ञापितेत्यपेक्षायामाह — स्वामिनो, देवी महिषी । भविष्यति । इति अनेन प्रकारेण । एवञ्च भविष्यत्स्वामिबन्धुत्वनिश्चय एव पद्मावतीहस्ते देवीन्यासस्य कारणमित्युक्तं भवति ॥

तदेवं यौगन्धरायणारम्भेष्वमन्त्रितकृतं नैव किञ्चिदित्यवगतम् । तच्च मन्त्रितं 'गुह्यमेको मन्त्रयेत' (कौटि० अर्थ० १. १५. ११) इति नीत्या किमेकाकिना यौगन्धरायणेन निर्वर्त्तितम्, उत 'नैकस्य मन्त्रसिद्धिरस्ति' इति नीत्या परसहायेन निर्वर्तितमिति ज्ञानाय पृच्छति— **इदमि**त्यादि । इदं देव्यपनयनं पद्मावतीहस्ते देवीन्यसनं च । अपिशब्दः प्रश्ने ॥

स्वामिन्निति । वक्ष्यमाणेऽवधानविशेषार्थं सम्बोधनम् । सर्वैरेव ज्ञातं, न केवलं रुमण्वतैकेन, किन्तु ये स्वामिश्रेयसि नित्यमवहिताः मया सह मन्त्रयितुं व्यापरितुं च समर्थाः स्वामिकर्मकराः, ये च स्वामिनः परमाप्ता बन्धवः, तैरखिलैरपि विदितम् । 'नैकस्य मन्त्रसिद्धिरस्ति' इत्येतादृशनीतिविषयतां प्रकृतस्य जानता सर्वसम्मतं सर्वसाक्षिकं च मयेदमाचरितमिति भावः ॥

अहो इति । रुमण्वान्, शठः खलु वञ्चक एव, मद् दुःखनित्यसाक्षिणापि तेन देवीक्षेमज्ञानस्य मां प्रत्यप्रकाशनादिति भावः । इहानन्यथासिद्धस्वामिवृद्ध्यायतिफले देवीक्षेमगोपने वस्तुतो गुणेऽपि तदात्वस्वदुःखशान्तिप्रातिकूल्यमात्रेण वञ्चनात्वारोपः । तेन रुमण्वतः प्रच्छन्नोपकारित्वं व्यङ्ग्यम् । अहो इत्याश्चर्ये, मद्विषयेऽपि शठवृत्तिः मद्विषयकशठवृत्त्यापि मच्छ्रेयसि यतमानता चाश्चर्यकारिणीत्यर्थः । एतावता देव्यपनयविचारो विश्रान्तिं नीतः । देवी तु नायकेन न किञ्चिदत्र पृष्टा, यतः सा पतिव्रतारत्नं सर्वभावविस्रब्धा धर्मपत्नी नीतिनिपुणा भर्तृहितार्थसर्वप्रवृत्तिरिति नायकस्य निश्चयात् तत्प्रवृत्तौ प्रष्टव्याभावः । अत एव नायको भर्तृवियोगम्

यौगन्धरायणः — स्वामिन् ! देव्याः कुशलनिवेदनार्थमद्यैव प्रतिनिवर्ततामत्रभवान् रैभ्योऽत्रभवती च ।

राजा — न, न । सर्व एव वयं यास्यामो देव्या पद्मावत्या सह ।

यौगन्धरायणः — यदाज्ञापयति स्वामी ।

अज्ञातवासक्लेशं स्त्रीस्वभावपरमद्वेष्यां सपत्नीनिर्वृत्तिं च सा भर्तृहितार्थे सोढवतीति तदुपकारजनितमात्मनः सन्तोषममान्तं तन्मातापित्रोरपि संविभज्यानुभवितुमिच्छां मनसि निधाय सपरिवारस्यात्मन उज्जयिनीयानं कर्त्तव्यं वक्ष्यति ॥

'पार्थिवोऽसौ किं वक्ष्यतीति हृदयं परिशङ्कितं मे' (पृ० १३६) इति प्रागुक्तायां स्वशङ्कायाम् अतिस्निग्धप्रवृत्तनायकसंवादस्वरसादपनीतायां यौगन्धरायणः प्राप्तावसरं कर्तव्यमाह — **स्वामिन्नित्यादि** । कुशलनिवेदनार्थं कुशलस्य निवेदनं देवीपित्रोः सकाशे विज्ञापनं, तदर्थं । प्रतिनिवर्तताम्, अर्थादुज्जयिनीं प्रति । अत्रभवती वासवदत्ताधात्री । 'इहात्रभवान्' 'इहात्रभवती'ति च क्वचित् पाठः ॥

नेति । न, न प्रतिनिवर्तताम्, इह प्रतिनिवर्ततामित्यस्य सम्बन्धाद् धात्रीकाञ्चुकीययोरेकाकिनोः प्रतिनिवर्तनं न कालोचितमित्यर्थः । अयमेव प्रतिषेधो दार्ढ्यार्थं पुनरुच्यते नेति । कालोचितं कर्तव्यमाह — सर्व एवेत्यादि । सर्व एवेति धात्रीकाञ्चुकीयसमेतत्वाभिप्रायम् । यास्यामः देव्याः कुशलनिवेदनार्थं गमिष्यामः । उज्जयिनीगमने ह्यस्माकमभ्युदयावसरकरणीयं गुरुजनोपस्थानं सिद्धं भवति, देव्याश्च कुशलिन्याः स्वनीतिनैपुणसंसाधितभर्तृश्रेयसः साक्षात्सन्दर्शनेन गुरुजनः परितोषितो भवतीति परमो लाभ इत्यभिसन्धिः । पद्मावत्या सह पद्मावत्या सहैव न तु तया विनेति तत्साहित्यायोगस्य देवीसपत्नीभावशङ्कितस्य व्यवच्छेदः । सा हि देव्या वासवदत्ताया मदर्थसंक्लेशदशाबन्धुरतिविस्रम्भस्नेहबहुमानभूमिर्धर्मभगिनीति तद्दर्शनाद् गुरुजनः सविशेषां प्रीतिं वक्ष्यतीति तत्साहित्यविधिना ध्वन्यते ॥

यदित्यादि । तदेव युक्तमनुष्ठातुमित्यर्थसिद्धम् ॥ इदं वाक्यं बहुष्वादर्शेषु न पठ्यते ॥

इत्थं कथावस्तु परिसमापितम् । तस्य चायं विभागः — नायकस्तावद् धीरललितः सचिवायत्तसिद्धिः । तस्य शत्रुजयेन राज्यप्रत्यानयनं परमं फलम् । शत्रुजयापेक्षितदर्शकसाहाय्यद्वारभूतो दर्शकस्वसुः पद्मावत्याः परिणयस्तस्योपायः । स्वतः पुरुषार्थतया फलमप्यसौ, संयोगपृथक्त्वन्यायात् । तस्य फलोपायोभयरूपस्य सिद्धये यौगन्धरायणेन लावाणकदाहापदेशेनापनीय पद्मावतीहस्ते न्यासीकृताया वासवद-

त्ताया अज्ञातवासोऽभ्युपाय उपात्तः । स च न्यासप्रत्यर्पणपर्यन्तानुवर्ती वासवदत्तायां नायकवियोगार्तिहेतुत्वात् प्रवासविप्रलम्भं, नायके देवीप्रणाशशोकहेतुत्वात् करुणं च प्रयोजयति । तत्र करुणस्य नायिकागुणस्मरणतद्भोग्यदर्शनाद्युद्दीपितस्य प्राणपरित्यागोद्यममहीतललुठनादिभिरनुभावैर्मोहस्मृत्युन्मादादिभिर्व्यभिचारिभिश्च परिकरितस्य प्रथमाङ्कगतब्रह्मचारिसंवादादिषु 'इदं च मुखमाधुर्यं कथं दूषितमग्निना' इति षष्ठाङ्कपद्यान्तेषु सन्दर्भेषूद्भेदः प्रस्फुटः । प्रवासविप्रलम्भस्य तु कैश्चिदुक्तब्रह्मचारिसंवादे चतुर्थाङ्कगते च पद्मावतीसंवादे श्रुतैः, कैश्चिन्नायकविदूषकसंवादे नायकमुखादवगतैः, कैश्चिन्नायकजागरस्वप्नयोः स्वयं प्रत्यक्षितैश्च नायकगतशोकानुभावैरुद्दीपितस्य रुदितानलङ्कारादिभिरनुभावितस्य निर्वेदचिन्तादिव्यभिचारिसहकृतस्य परिपोषः 'का गई एसा गच्छामि मन्दभाआ' इति प्रथमाङ्कवासवदत्तावाक्यप्रभृतिषु 'दिट्ठिआ दाणिं पि सुमरदि' इति षष्ठाङ्कतद्वाक्यप्राचीनेषु सन्दर्भेषु परां कोटिं प्राप्तः । अनयोश्च विप्रलम्भकरुणयोर्भिन्नविषयतया पूर्वं प्रति परस्य न विरुद्धता; प्रत्युत तदुपकारकतयाङ्गत्वम्, उच्चावचानां नायकगतशोककार्याणां विज्ञानेन वासवदत्ताया नायकविषयरतेः साम्राज्ये प्रतिष्ठापनात् । तदिदमनन्यत्रदृष्टं करुणशृङ्गारयोरङ्गाङ्गिभावसौभाग्यमिह सङ्घटितं द्रष्टव्यम् । यस्तु पद्मावतीगतो नायकविषयो रतिभावः 'अय्ये ण जाणामि, अय्यउत्तेण विरहिदा उक्कण्ठिदा होमि' (अङ्कः ४) इत्यादिभिः पद्मावतीवाक्यैः प्रकाशितः 'इअं वि णाम एव्वं मन्तेदि' इति वासवदत्ताश्लाघितः, यश्च नायकगतः पद्मावतीविषयः 'पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः' (अङ्कः ४) 'लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः' (अङ्कः ५) इत्यादिनायकवाक्यप्रकाशितः, तौ विवाहोत्तरकालाभिव्यक्ततरावाश्रित्य शृङ्गारोऽन्यः प्रगल्भते । सोऽपि वासवदत्तावगतसकलानुभावो विप्रलम्भस्यैवाङ्गं यतो निर्विंद्यमानपद्मावतीसम्भोगसाम्राज्यापेक्षयात्मगोचरे नायकगते भावे कमपि कमनीयं परभागमवधारयन्त्या वासवदत्ताया नायकविषया रतिरुच्चैः प्रकृष्यते ।

यत्तच्छत्रुजयफलकं पद्मावतीपरिणयलक्षणं कार्यं, तस्य 'श्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः' (अङ्कः १) इति भर्तृविजये, 'भर्तृदाराभिलाषित्वादस्यां मे महती स्वता' (अङ्कः १) इति पद्मावतीपरिणये च यौगन्धरायणेन सूचितमात्मौत्सुक्यं तावद् आरम्भावस्था भवति । पद्मावत्यान्तिके वासवदत्ताया अज्ञातवासकल्पनं पद्मावत्युदयनयोः परस्परवरणानुकूलं तस्य प्रयत्नावस्था । सा च 'हन्त भोः! अर्धमवतरं भारस्य' (अङ्कः १) इत्यादौ यौगन्धरायणोक्तौ परिस्फुटा । 'भट्टिदारिए! दिट्ठिआ' 'वच्छराअस्स उदअणस्स' (अङ्कः २) इत्यादिकया पद्मावतीधात्र्युक्त्या

(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥ १९ ॥

(निष्क्रान्ताः सर्वे ।)

षष्ठोऽङ्कः ।

इति स्वप्ननाटकमवसितम् ।

वत्सराजप्राप्तिनिश्चयात् तस्य नियताप्तिरूपावस्था प्रकाशिता । निश्चयसामर्थ्याच्च पद्मावत्याः स्वसमीहितसाधनानुकूलस्वभ्रातृदर्शकप्रयत्नज्ञानं तन्निमित्ता च वत्सराजप्राप्तिप्रत्याशा पूर्वं स्थितेत्यनुमानतः कार्यस्य प्राप्त्याशावस्थापि सिद्धैव । "दिट्ठिआ तत्तहोदो वच्छराअस्स अभिप्पेदविवाहमङ्गळरमणिज्जो काळो दिट्ठो" (अङ्कः ४) इति विदूषकोक्त्या फलागम उक्तः; फलस्य च समग्रत्वं राज्यलाभोपहितत्वलक्षणं "दिष्ट्या परैरपहृतं राज्यं पुनः प्रत्यानीतम्" (अङ्कः ६) इति महासेनसन्देशेन प्रकाशितमिति सेयं पञ्चमी समग्रफलसम्पत्त्यवस्था । आभिः पञ्चभिः कार्यावस्थाभिरुपाधिभिः मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्याः पञ्च सन्धयः इतिवृत्तस्य वेदितव्याः । यदाह धनिकः — "अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः । आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः" ॥ "अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः । यथासंख्येन जायन्ते मुखाद्याः पञ्च सन्धयः ॥" "मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः ।" (दशरू० १) इति । एषां चाङ्गानि वस्तुस्वभावानुगुण्येन यथापेक्षं तत्र तत्रोपनिबद्धान्यनया दिशानुसन्धेयानि ॥

तदेवं नायकस्य पद्मावतीलाभपूर्वकराज्यप्रतिलम्भमहाभ्युदयानुबन्धिना वासवदत्तासमागममङ्गलेन नाटकार्थे परिसमापिते 'प्रशस्तिः शुभशंसनम्' इत्युक्तलक्षणा निर्वहणसन्धिचरमाङ्गभूता प्रशस्तिर्वक्तव्या । तस्याश्च वक्ष्यमाणाया अनुकार्यवाक्यत्वायोगादाह — भरतेति । भरतवाक्यं भरतस्य नटस्यानुकर्तुर्वाक्यं, वक्ष्यमाणमित्यार्थम् ।

प्रशस्तिमाह — इमामिति । नः अस्माकं प्रजानां । राजसिंहः राजा सिंह इव शौर्यधैर्यादियोगाद् राजसिंहः, प्रशस्तगुणो राजेत्यर्थः । सागरपर्यन्तां सागराः समुद्राः

पर्यन्ताः परितस्सीमाः यस्यास्तां तथाभूतां। हिमवद्विन्ध्यकुण्डलां हिमवद्विन्ध्यौ आर्यावर्तस्य उत्तरदक्षिणसीमभूतौ पर्वतविशेषौ कुण्डले शोभाकरत्वात् कुण्डलस्थानीयौ यस्यास्तां तथाभूताम् । इमां महीं भूमिम् । स्त्रियमिति च रूपणं गम्यम् । एकातपत्राङ्कां प्रशास्तु, एकः अधिपत्येकत्वाद् एक एव, न त्वनेकः आतपत्राङ्कः श्वेतच्छत्ररूपमधिपतिचिह्नं यस्यास्तां तथाभूतां प्रशास्तु एकाधिपतिविशिष्टत्वाकारेण शासनविषयीकरोतु । अस्माकं राजा भारतभूमेरस्याः कृत्स्नायाः सार्वभौमो भूयादिति श्लोकपरमार्थः ॥ १९ ॥

निष्क्रान्ताः सर्वे इति षष्ठाङ्कपरिसमाप्तिः ॥

ताम्रपर्ण्यमृतार्द्रपूततरुवाग्रहारगतशैशवो
वञ्चिमूलकरामवर्मकुलशेखरक्षितिपरक्षितः ।
स्वप्नवासवदत्तमूर्जितगुणाकरे गणपतिः सुधी-
र्भासनाटकमण्डलेऽतिगुरु लेशतो विवृतवानिति ॥
वाग्देव्या वरिवस्यैव यदिदं मम जल्पितम् ।
भूयान्मय्येतया नित्यं सुप्रसन्ना सरस्वती ॥

इति श्रीमदनन्तशयनवास्तव्यस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य श्रीसीताम्बारामसुब्रह्मण्यार्यसूनोः
गणपतिशास्त्रिणः कृतिषु
स्वप्नवासवदत्तव्याख्यानं
सम्पूर्णम् ॥

शुभं भूयात् ॥

श्लोकानुक्रमणिका ।

अनाहारे तुल्यः (शिखरिणी) ३२
अनेन परिहा ८३
अस्य स्निग्धस्य १३३
अहमवजितः (हरिणी) १२८
इमां सागरप १४६
इयं बाला नवो ८८
उदयनवेन्दु (आर्या) १
उपेत्य नागेन्द्रतुरङ्ग (उपेन्द्रवज्रा) ११६
ऋज्वायतां च वि (वसन्ततिलकम्) ७०
ऋज्वायतां हि मु (तथा) ९८
कस्यार्थः कल (शार्दूलविक्रीडितम्) १९
कः कं शक्तो रक्षि (शालिनी) १३०
कातरा येऽप्यश १२८
कामेनोज्जयिनीं (शार्दूलविक्रीडितम्) ६९
कार्यं नैवार्थैः (वैश्वदेवी) २०
किं वक्ष्यतीति हृ (वसन्ततिलकम्) १२५
किन्नु सत्यमिदं १३९
खगा वासोपेताः (शिखरिणी) ३७
गुणानां वा वि ९०
चिरप्रसुप्तः का १२२
तीर्थोदकानि (वसन्ततिलकम्) १४
दुःखं त्यक्तुं बद्ध (शालिनी) ८४
धीरस्याश्रमसं (शार्दूलविक्रीडितं) ९
निष्क्रामन् सम्भ्र ११०
नैवेदानीं ता (शालिनी) ३१
पद्मावती नर (वसन्ततिलकं) २४
पद्मावती बहु (आर्या) ८०
परिहरतु भवान् (पुष्पिताग्रा) १२
पूर्वं त्वयाप्यभि (वसन्ततिलकं) ११
पृथिव्यां राजवं १२७
प्रच्छाद्य राजम (वसन्ततिलकम्) १३६
प्रद्वेषो बहुमा १५
बहुशोऽप्युपदे १०३
भारतानां कुले १३८
भिन्नास्ते (शार्दूलविक्रीडितम्) ११५
भृत्यैर्मगधरा ६
मधुमदकला (आर्या) ७४
महासेनस्य दु १३१
मिथ्योन्मादैश्च यु १४०
यदि तावदयं ११२
यदि विप्रस्य भ १३४
योऽयं सन्त्रस्तया ११४
रूपश्रिया समु (वसन्ततिलकम्) ९६
वाक्यमेतत् प्रिय १३२
विस्रब्धं (शार्दूलविक्रीडितम्) २५
शय्या नावनता (तथा) ९९
शय्यायामव ११९
शरच्छशाङ्कगौ ८८
श्रुतिसुखनिन (पुष्पिताग्रा) १२०
श्रोणीसमुद्वह (वसन्ततिलकम्) १२९
श्लाघ्यामवन्तिनृ (तथा) ९५
षोडशान्तःपुर १२९
सम्बन्धिराज्यम् (वसन्ततिलकम्) १२६
सविभ्रमो ह्ययं ३३
सुखमर्थो भ २१
स्मराम्यवन्त्याधि (उपजातिः) १०३
स्वप्नस्यान्ते विबु ११३

वृत्तलक्षणम् ।

'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।'
'रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ।'
'यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥'
'उपेन्द्रवज्रा जतजास्ततो गौ ।'
'उक्तं वसन्ततिलकं तभजा जगौ गः ।'
'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।'
'शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ।'
'पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ।'
'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ।'
'स्यादिन्द्रवज्रा यदि तौ जगौ गः ।'
'उपेन्द्रवज्रा जतजास्ततो गौ ।' } (इत्यनयोरुपजातिः ।)

नाटकादिलक्षणम् ।

नाटकं — 'वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते ।
प्रख्यातनायकोपेतं नाटकं तदुदाहृतम् ॥'

पूर्वरङ्गः — 'यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥'

नान्दी — 'आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥'

सूत्रधारः— "आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुनः ।
रङ्गप्रसाधनप्रौढः सूत्रधार इहोदितः ॥"

नेपथ्यं— "कुशीलवकुटुम्बस्य स्थलं नेपथ्यमुच्यते"

[illegible] "सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
[illegible] वा — स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ।
प्रस्तावना वा "

शुद्धमिश्रविष्कम्भौ — "वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥
एकानेकगतः शुद्धः संकीर्णो नीचमध्ययोः । "

प्रवेशकः— "तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः । प्रवेशः "

प्रकाश-स्वगते — "सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् "

अपवारितं — "रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् "

आकाशभाषितं — "किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ॥ "

शृङ्गारः— "रम्यदेशकलाकालवेषभोगादिसेवनैः ।
[illegible] या रतिः सैव यूनोरन्योन्यरक्तयोः ॥
[illegible] रो मधुराङ्गविचेष्टितैः । "

करुणः— "इष्ट[illegible] करुणः "

विदूषकः— "विकृताङ्गवचोवेषैर्हास्यकारी विदूषकः ॥ "

काञ्चुकीयः— 'ये नित्यं सत्यसंपन्नाः कामदोषविवर्जिताः ।
ज्ञानविज्ञानकुशलाः काञ्चुकीयास्तु ते स्मृताः ॥ "

शुभम् ।

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

PK 3791 B4S8 1916
Bhāsa
Svapnavāsavadattam